No 87

॥अथकृत्यरत्नावलिप्रारंभः॥पत्र१७७॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

कृ० रत्ना०

१

॥श्रीगणेशायनमः॥ ॥नमस्कृत्यरमानाथंभृगुविठ्ठलसूनुना॥कृत्य
रत्नावलीरम्यारामचंद्रेणरच्यते॥१॥ ॥तत्रतिथिकृत्येतुकृष्णादिव्रतेशुक्ला
दिमेवचेतिवचनाच्चैत्रकृष्णप्रतिपदमारभ्यतिथिकृत्यान्युच्यंते॥तत्रचैत्र
कृष्णप्रतिपदिकृत्यविशेषः पद्मपुराणे॥चैत्रेमासिमहाबाहोपुण्याप्रति
पदुत्तमा॥तस्यांयःश्वपचंस्पृष्ट्वास्नानंकुर्यान्नरोत्तम॥नतस्यदुरितंकिंचि
न्नाधयोव्याधयोन्नृप॥भवंतिकुरुशार्दूलतस्मात्स्नानंसमाचरेत्॥नारीनी
राजनंतत्रसर्वरोगविनाशनं॥गोमहिष्यादियत्किंचित्तत्सर्वंभूषयेन्नृप॥ १

तेलवस्त्रादिभिःसर्वास्तोरणाधस्ततोनयेत्॥ब्राह्मणानांततोभोज्यं
कुर्यात्कुरुकुलोद्वहेति॥अत्रप्रतिपदोदयिकीग्राह्या॥प्रवृत्तेमधुमासेतु
प्रतिपद्युदितेरवाविति भविष्योत्तरादितिकेचित्॥होलिकादीपना
व्यवहितोत्तरदिनंग्राह्यमितितुयुक्तं॥अतएववसिष्ठेनपूर्वाविद्धे
ना॥वत्सरादौवसंतादौबलिराज्यंतथैवच॥पूर्वविद्धैवकर्तव्याप्रतिप
त्सर्वदाबुधैरिति॥अत्रतैलाभ्यंगोनित्यः॥वत्सरादौवसंतादौबलिरा
ज्यंतथैवच॥तैलाभ्यंगमकुर्वाणोनरकंप्रतिपद्यतइतिवृद्धवसिष्ठ

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

वचनात्।चैत्रकृष्णद्वादश्यांवैराजकल्यादिः।चैत्रकृष्णत्रयोदश्यांशततभि
षायुतावारुणीतत्रगंगास्नानंमहाफलं।तदुक्तंस्कांदे॥वारुणेनसमायुक्ता
मधोःकृष्णात्रयोदशी।गंगायांयदिलभ्येतसूर्यग्रहशतैःसमेति॥इयमे
वशतभिषारयोगेमहावारुणी।शुभयोगयोगेमहामहावारुणीमहाफला
च।तथाचतत्रैव।शतभिषारसमायुक्तासामहावारुणीस्मृता॥गंगायांयदि
लभ्येतकोटिसूर्यग्रहैःसमा।शुभयोगसमायुक्तासाज्ञेयाशतभिषायदि।
महामहेतिविख्यातात्रिकोटिकुलमुद्धरेदिति॥चैत्रकृष्णचतुर्दश्यां २

कृत्यविशेषःपुराणसमुच्चये।चैत्रकृष्णचतुर्दश्यांयःस्नायाच्छिवसंनिधौ।
गंगायांचविशेषेणसनप्रेतोभिजायते।चैत्रकृष्णचतुर्दश्यामंगारकदिनंय
दि।पित्र्याचत्वंपुनर्नस्याद्गंगायांस्नानभोजनात्।भोजनंजलपानं।चैत्रीअ
मावास्यामन्वादिः।फाल्गुनस्यत्वमावास्येतिमात्स्यात्॥अत्रफाल्गुनशब्दो
मांतमासाभिप्रायेण।साचश्राद्धेत्र पराह्णिकीयाह्या।तत्रचैत्रशुक्लप्रतिप
दिसंवत्सरारंभविधिः।तथाचकल्पतरौब्रह्मपुराणे॥चैत्रेमासिजगद्ब्रह्मास
सर्जप्रथमेहनि॥शुक्लपक्षेसमग्रंतुतदासूर्योदयेसति॥ततःप्रवृत्तोयोधर्मः

पूर्वैः पूर्वतरैः कृतः॥ अद्यापिगूढःसुतरांकर्तव्योसौप्रयत्नतः॥ तत्रकार्यामहा
शांतिःसर्वकल्मषनाशिनी॥ सर्वोत्पातप्रशमनीकलिदुःस्वप्ननाशिनी। आयुः
प्रदापुष्टिकरी धनसौभाग्यवर्धिनी। मंगल्याच पवित्राचलोकहृद्यसुखावहा।
यस्यामादौचसंपूज्योब्रह्माकमलसंभवः। पाद्यार्घ्यपुष्पधूपैश्चवस्त्रालंका
रभोजनैः॥ होमैर्बल्युपचारैश्चतथाब्राह्मणतर्पणैः॥ तथाक्रमेणदेवेभ्यः पू
जाकार्यापृथक्पृथक्। देवेभ्योवक्ष्यमाणेभ्यः कालादिभ्यः प्रयत्नतः॥ कृत्वा
कारनमस्कारंकुशोदकतिलाक्षतैः। पुष्पधूपप्रदीपैश्चभोजनैश्चयथा॥ ३

क्रमं॥ मंत्रंसंपूजनार्थंतुबहुरूपंपरिस्फुरेत्॥ मंत्रमितिजातावेकवचनं॥
नानारूपान्मंत्रान्परिस्फुरेत्पठेदित्यर्थः॥ तेचवक्ष्यमाणब्रह्मादिविष्णवंत
देवतानांप्रणवादिचतुर्थ्यंतनमोंतनामरूपाः॥ ॐ नमोब्रह्मणेतुभ्यंकाला
यचमहात्मने। नमस्तेस्तुनिमेषायत्रुट्येचनमोनमः॥ लवायचनमस्तुभ्यं
नमस्तेस्तुक्षणायच। नमोनमस्तेकाष्ठायेकालायेचाथसर्वदा॥ नाडिकायेमु
हुर्त्तायनमोनमः॥ नमोनिशाभ्यःपुण्येभ्योदिवसेभ्यश्चनित्यशः॥
पक्षाभ्यांचाथमासेभ्योऋतुभ्यःषड्भ्य एवच॥ अयनाभ्यांचपंचभ्योवत्सरे

भ्यश्चसर्वदा॥पंचभ्योवत्सरेभ्यःसंवत्सरपरिवत्सरेदुवत्सरानुवत्सरवत्सरे
भ्यः॥नमःऋतयुगादिभ्योग्रहेभ्यश्चनमोनमः॥अष्टाविंशतिसंख्येभ्योनक्ष
त्रेभ्योनमोनमः॥अभिजितासहाष्टाविंशतिसंख्यत्वं॥राशिभ्यःकरणेभ्य
श्चव्यतीपातेभ्यएवच॥प्रतिवर्षाधिपेभ्यश्चविज्ञानेभ्योनमःसदा॥नमोस्तु
कुलनागेभ्यःसान्वयात्रिभ्यएवच॥सान्वयात्रिभ्यःसारथिवरेभ्यः॥नमश्च
तुर्दशाभ्यस्कमनुभ्यश्चपुनःपुनः॥नमःपुरंदरेभ्यश्चतत्संख्येभ्योनमोनमः॥
तत्संख्येभ्यश्चतुर्दशसंख्येभ्यः॥पंचाशद्भ्योनमोनित्यंरक्षकन्याभ्यएवच॥ ४

नमोदित्येसुव्रतायेजनायेचाथसर्वदा॥कुशाग्रायनमस्तुभ्यंसर्वास्त्रजनका
यच॥नमोस्कबहुपुत्रायपत्नीभिःसहितायच॥नमोरुध्येतथाऋध्येनिद्रा
येधनदायच॥नलकूबरयक्षायगुह्यकस्वामिनेनमः॥नमोस्कशंखपद्मा
भ्यांनिधिभ्यामपिनित्यशः॥भद्रकाल्येनमोनित्यंसुरभ्येचनमोनमः॥वेद
वेदांतवेदांगविद्यास्थानेभ्यएवच॥नागयक्षसुपर्णेभ्योनमोस्कगरुडा
यच॥अरुणायनमस्कभ्यंसप्तद्वीपेभ्यएवच॥सप्तभ्यश्चसमुद्रेभ्यस्सप्त
रेभ्यश्चसर्वदा॥उत्तरेभ्यःकुरुभ्यश्चनमोह्येरावतायच॥भद्राश्वकेतुमा

५

लाभ्यांनमःसर्वत्रसर्वदा॥इलावृत्तायचनमोहरिवर्षायचैवहि॥नमः
किंपुरुषेभ्यश्चभरतायनमोनमः॥नमोभारतभेदेभ्योनवभ्यश्चाथस
र्वदा॥पातालेभ्यश्चसप्तभ्योनरकेभ्योनमोनमः॥कालाग्निरुद्रत्रोषाय्यं
हरयेक्रोडरूपिणे॥सप्तभ्यस्त्वथलोकेभ्योमहाभूतेभ्यएवच॥नमसेरज
सेचैवनमःप्रकृतयेतथा॥पुरुषायाभिमानायनमोस्त्वव्यक्तमूर्तये॥हि
मवत्पुरुषेभ्यश्चपर्वतेभ्योनमःसदा॥पुराणीभ्यश्चगंगाभ्यःसप्तभ्यंनमो श्र
नमः॥नमोस्त्वद्यतनीभ्यश्चसमभ्यश्चाथसर्वदा॥नमोस्तुपुष्करादिभ्य ५

स्तीर्थेभ्यश्चपुनःपुनः॥निम्नगाभ्योनमोनित्यंवितस्तायाभ्यएवच॥चतु
र्दशभ्योदीर्घेभ्योधारिणीभ्योनमोनमः॥नमोधात्रेविधात्रेचछंदोभ्यश्च
नमोनमः॥सुरभ्येरावणाभ्यांचनमोभूयोनमोनमः॥नमस्त्वथोच्चैःश्रवसे
ध्रुवायचनमोनमः॥नमोस्तुधन्वंतरयेशस्त्रास्त्राभ्यांनमःसदा॥विनाय
कुकुमाराभ्यांविघ्नेभ्यश्चनमःसदा॥शारवायचविशारवायनैगमेयाय
चेनमः॥नमःस्कंदग्रहेभ्यश्चस्कंदमातृभ्यएवच॥ज्वरायरोगपतयेभ
स्म प्रहरणायच॥ऋषिभ्योवालखिल्येभ्यःकाश्यपायनमःसदा॥

असोमपेभ्यश्चनमस्कृषितेभ्योनमःसदा॥आदित्येभ्योनमोनित्यंद्वाद
शभ्यश्चसर्वशः॥एकादशभ्योरुद्रेभ्यःसगणेभ्योनमोनमः॥दशभ्योवि
श्वदेवेभ्यःपुण्येभ्यश्चनमःसदा॥नमोबसुभ्यस्त्वष्टभ्योनमोयोगिभ्यए
वच॥द्वादशभ्योभृगुभ्यश्चनमःसर्वत्रसर्वदा॥दशभ्यस्त्वंगिरोभ्यश्चतप
स्विभ्योनमोनमः॥नमोनासत्यदस्राभ्यामश्विभ्यांनित्यमेवहि॥साध्येभ्यो
द्वादशभ्यश्चपौराणेभ्योनमःसदा॥एकोनपंचाशद्भ्योथमरुद्भ्यश्चनमो
नमः॥त्रिलोच्यार्यायदेवायनमस्तेविश्वकर्मणे॥अष्टभ्योलोकपालेभ्यः ६

सायुधेभ्यश्चसर्वदा॥आयुधेभ्योवाहनेभ्योधर्मेभ्यश्चनमःसदा॥आस
नेभ्योदुंदुभिभ्योदेवीभ्यश्चनमोनमः॥दैत्यराक्षसगंधर्वपिशाचेभ्यश्चनि
त्यशः॥पितृभ्यःसप्तभेदेभ्यःप्रेतेभ्यश्चनमोनमः॥सुसूक्ष्मेभ्यश्चदेवेभ्यो
भागवतेभ्यएवच॥नमस्तेबहुरूपायविष्णवेपरमात्मने॥अथकिंबहुनो
क्तेनमंत्रेणानेनचार्चयेत्॥प्राङ्मुखोदङ्मुखोविप्रान्देवानुद्दिश्यपूर्ववत्॥
अर्घ्यैःपुष्पैश्चधूपैश्चवस्त्रैर्माल्यैश्चदिष्टवान्॥धनधान्यादिविभवैर्दक्षि
णाभिश्चसर्वदा॥अथवाकिंविस्तारेणविप्रानेवदेवतोद्देशेनपूजयेदि

त्यर्थः॥इतिहासपुराणाभ्यांप्रवक्तृभ्रह्मोत्तमान्॥इतिहासपुराणाभ्यां
तत्पुस्तंदानेनेत्यर्थः॥कालज्ञान्वेदशास्त्रज्ञान्भृत्यान्संबंधिबांधवान्॥अनेनै
वतुमंत्रेणस्वाहांतेनपृथक्पृथक्॥यविष्ठायाग्नयेहोमःकर्तव्यःसर्वत्र
त्रये॥वेदवच्चाहुतिंदत्वास्थानेप्राधानिकेसति॥वेदवत्वेदेतिकर्तव्यतायुक्तं॥
प्राधानिकेस्थानेप्रधानेहोमारंभे॥आत्म शोभाततःकार्यामंगलालंभनं
तथा॥भोजयित्वाद्विजान्सर्वान्मुनीन्संबंधिबांधवान्॥विशेषेणतुभोक्तव्यं
कार्यश्चापिमहोत्सवः॥नवसंवत्सरारंभेसर्वसिद्धिःप्रवर्ततइति॥तत्रप्रति ७

पदोदयिकीग्राह्या॥चैत्रेमासिजगद्ब्रह्मासससर्जप्रथमेहनि॥शुक्लपक्षेसम
ग्रंतुतदासूर्योदयेसतीतिब्रह्मपुराणात्॥दिनद्वयेतद्योगेतूत्तरैवापू
र्वा॥वत्सरादौवसंतादावितिवृद्धवसिष्ठोक्तेः॥अस्यमलमासत्वेनत्रैवसंव
त्सरारंभः॥तस्याएवसंवत्सराद्यतिथित्वात्॥अत्रतैलाभ्यंगोनित्यः॥क्ष
यादौवसंतादावितिवृद्धवसिष्ठवचनात्॥अत्रैवनवरात्रारंभः॥मलमास
पातेतूत्कर्षः॥अत्रप्रपादानमुक्तंभविष्यपुराणे॥अतीतेफाल्गुनेमा
सिप्राप्तेचैत्रमहोत्सवे॥पुण्येहिविप्रकथितेप्रपादानंसमारभेदिति॥त

त्रमंत्रः॥प्रपेयंसर्वसामान्याभूतेभ्यःप्रतिपादिता॥अस्याःप्रदानात्वितरस्तुष्येत्तु
हिषितामहाइति॥तत्रैवअविचार्यततोदेयंजलंमासचतुष्टयं॥तथा॥प्रपादा
तुमशक्तेनविशेषाद्धर्मलिप्सुना॥प्रत्यहंधर्मघटकोवस्त्रसंवेष्टितानन॥
ब्राह्मणस्यगृहेदेयःशीतामलजलःशुचिः॥तत्रमंत्रः॥एषधर्मघटोदत्तोब्र
ह्म विष्णुशिवात्मकः॥अस्यप्रदानात्सकलममसंतुमनोरथाः॥अनेनवि
धिनायस्तुधर्मकुंभंप्रयच्छति॥प्रपादान फलंसोपिप्राप्नोतीहनसंशय
इति॥इयंश्वेतकल्पादिः॥अत्रश्राद्धादिमहाफलं॥इतित्रिंशादमीकल्पा ॥८॥
स्त्रयःपरमेष्ठिनः॥आरंभ नियय स्तासुशुक्लाःपुण्यतमामताः॥ता

सुश्राद्धेहनेपुण्यमाकल्यस्थायिकल्पइति नागरखंडात्॥चैत्रशुक्लतृ
तीयायामीश्वरयुतांगौरींसंपूज्यांदोलयेत्॥तथाचदेवीपुराणेत्रतीयायां
यजेद्देवींशंकरेणसमन्वितां॥कुंकुमागरुकर्पूरमणिवस्त्रसुगंधकैः॥स्त्र
ग्गंधधूपदीपैश्चदमनेनविशेषतः॥आंदोलयेत्ततोवत्सशिवोमातुष्टये
सदा॥रात्रौजागरणंकार्यं प्रातर्देयाचदक्षिणा॥हेमवस्त्रान्नपान
दितांबूलानिस्त्रजस्तथेति॥मूर्तिस्वरूपमुक्तंदेवीपुराणे॥सोवर्णीतुउ
माकार्यारजतेशंकरस्तथा॥चतुर्भुजस्तुदेवेशोद्विभुजाचउमाभवे
दिति॥इयंमुहूर्तमात्रापिपरागाह्यागौरीदेवत्यत्वात्॥इयंचमन्वादिः

साचश्राद्धेऽपराह्णव्यापिनीग्राह्या॥स्नानदानादावुत्तराअत्रश्राद्धमुक्तं
मात्स्ये॥कृतेश्राद्धेविधानेनमन्वादिषुयुगादिषु॥हायनान्नाद्विसाहस्रं
पितॄणांतृप्तिदंभवेदिति॥अधिकमासेपीदंकर्तव्यं॥मन्वादिकंतिथिं
कंचकुर्यान्मासद्वयेपिचेतिस्मृतिचंद्रिकोक्तेः॥अत्रपिंडदानंनास्ति॥
तथाचकात्यायनः॥विषुवायनसंक्रांतिमन्वादिषुयुगादिषु॥विद्ध
यपिंडनिर्वापंसर्वंश्राद्धंसमाचरेदिति॥एतदकरणेप्रायश्चित्तमुक्तं
मृग्विधाने॥तंमुक्त्वातिमंत्रंचशतवारंजलेजपेत्॥मन्वादयोयदान्यू ॥९॥
नाकुरुतेनेवंवाय दीनि॥एवंषण्णवतिश्राद्धान्यपिनित्यानितेषाम

यंसंग्रहः॥अमा१२मनु१४युगध्रांति१२धृति१३पात१३महालय१५ध
अन्वष्टकाश्च पूर्वेद्युः षण्णवत्योष्टकास्त्रयोति१५चैत्रशुक्लतृतीया
मत्स्यजयंती॥चैत्रशुक्लपंचमी स्यन्ये॥आषाढशुक्लैकादश्यपरे
इयंचमध्याह्नव्यापिनीग्राह्या॥तदुपासकानांचनित्याअन्येषांका
म्या॥अस्यामेवश्रीपूजाहेमाद्रौविष्णुधर्मोत्तरे॥वैशाखशुक्लपंचम्यां
भवान्याउत्पत्तिः॥तत्रभवानीयात्रोक्ताकाश्मीरखंडे॥भवानीय
स्तुपश्येतशुक्लाष्टम्यांमधोनरः॥नजातुशोकंलभतेसदानमया चा
भवेदिति॥अत्रैवाशोककलिकाप्राशनमुक्तंलिंगे॥अशोककलि

साचश्राद्धेऽपराह्णव्यापिनीग्राह्या॥स्नानदानादावुत्तराअत्रश्राद्धमुक्तं
मात्स्ये॥कृतेश्राद्धेविधानेनमन्वादिषुयुगादिषु॥हायनानांहिसाहस्रं
पितॄणांतृप्तिदंभवेदिति॥अधिकमासेपीदंकर्तव्यं॥मन्वादिकंतिथिं
कंचकुर्यान्मासद्वयेपिचेतिस्मृतिचंद्रिकोक्तेः॥अत्रपिंडदानंनास्ति॥
तथाचकात्यायनः॥विषुवायनसंक्रांतिमन्वादिषुयुगादिषु॥विद्ध
यपिंडनिर्वापंसर्वंश्राद्धंसमाचरेदिति॥एतदकरणेप्रायश्चित्तमुक्तं
मृग्विधाने॥तंमुक्त्वाप्रतिमंत्रंचशतवारंजलेजपेत्॥मन्वादयोयदान्यू ॥९॥
नाकुरुतेनैवंवाय दीति॥एवंषण्णवतिश्राद्धान्यपिनित्यानितेषाम

यंसंग्रहः॥अमा१२मनु१४युगध्रुति१३पात१३महालयः१६
अन्वष्टकासुचपूर्वेद्युःषण्णवत्योष्टकास्त्वथेति१५चैत्रशुक्लतृतीया
मत्स्यजयंती॥चैत्रशुक्लपंचमीस्वन्ये॥आषाढशुक्लैकादश्यीत्यपरे
इयंचमध्याह्नव्यापिनीग्राह्या॥तदुपासकानांचनित्याअन्येषांका
म्या॥अस्यामेवश्रीपूजाहेमाद्रौविष्णुधर्मोत्तरे॥वैशाखशुक्लपंचम्यां
भवान्याउत्पत्तिः॥तत्रभवानीयात्रोक्ताकाशीखंडे॥भवानीय
स्तुपश्येतशुक्लाष्टम्यांमधोनरः॥नजातुशोकंलभतेसदानमया चा
भवेदिति॥अत्रैवाशोककलिकाप्राशनमुक्तंलिंगे॥अशोककलि

काश्चाष्टोयेपिबंतिपुनर्वसौ॥चैत्रेमासिसि ताष्टम्यांननेतेशोकमवाप्नुयुः॥
पुनर्वसुयोगोऽनावश्यकः॥किंतुप्राशस्त्यातिशयार्थः॥तिथिःशरीरंदेवस्य
तिथौनक्षत्रमाश्रितं॥तस्मात्तिथिंप्रशंसंतिननक्षत्रंतिथिंविनेतिज्योतिः
शास्त्रात्॥तथातिथितत्वेस्कांदे॥मीनेमधौशुक्लपक्षेअशोकाख्यातथाष्ट
मी॥पिबेदशोककलिकांस्नायाल्लोहित्यवारिणीतिअत्रमधुश्चोट्टः॥पृथ
ङ्नामग्रहणात्ज्येष्ठेमासिरूपेरवावितिवत्॥मीनेफलाधिक्यं॥फलंतुमंत्रलिं
गाच्छोकराहित्यं॥प्राशनमंत्रस्तु॥त्वमशोकहरानीष्टमधुमाससमुद्भव॥ १०

पिबामिशोकसंतप्तोमामशोकंसदाकुरुवितिविष्णुः॥पुनर्वसुबुधोपेताचैत्रे
मासिसिताष्टमी॥प्रातस्तुविधिनास्नात्वावाजपेयफलंलभेदिति॥स्कांदे॥
पुनर्वसोवृषेलग्नेचैत्रेमासिसिताष्टमी॥लोहित्येविरजेस्नायात्सर्वपापैःप्र
मुच्यते॥पृथिव्यांयानितीर्थानिसरितःसागरादयः॥सर्वेलोहित्यमायांति
चैत्रेमासेसि ताष्टमी॥स्नानमंत्रः॥ब्रह्मपुत्रमहाभागशांतनोःकुलनंदन॥
अमोघागर्भसंभूतपापंलोहित्यमेहरेति॥कालिकापुराणेपि॥चैत्रेमा
सिसिताष्टम्यांयोनरोनियतेंद्रियः॥स्नायाल्लोहित्यतोयेषुसयातिब्रह्मणः

पदं॥लोहितात्सरसोजातोलोहित्याख्यस्ततोभवत्॥चैत्रंतुसकलं मासंशुचिः
प्रयतमानसः॥लोहित्यतोयेयःस्नायात्सकैवल्यमवाप्नुयात्॥इति॥ ॥चैत्रशुक्ल
नवमीरामनवमी॥सामध्याह्नयोगिनीग्राह्या॥अगस्तिसंहितायां॥चैत्रेशुक्लेतुनवमी
पुनर्वसुयुतायदि॥सैवमध्याह्नयोगेनमहापुण्यतमाभवेदिति॥दिनद्वयेतादृशी
चेत्पुनर्वसुयुतायाह्या॥तादृग्द्वयेपिदिनद्वयेचेत्तदापरायाह्या॥नवमीचाष्ट मीविद्धा
त्याज्याविद्धुपरायैरित्यगस्त्यसंहितावचनात्॥इयंतदुपासकानांनित्या।का
म्यातुसर्वेषांभवतीत्य न्यत्रविस्तरः॥अत्रमध्याह्नेपूजारात्रौजागरणंपरेद्युःप्रा
तःपायसहोमब्राह्मणभोजनपारणादिचेतिदिनद्वयात्मकंव्रतंकर्तव्यं॥इयंम ११

लमासेनकार्या।स्पष्टमासविशेषाख्याविहितंवर्जयेन्मलेइतिवचनात्॥ ॥अथव्रत
विधिः॥ ॥प्रातःकृतनित्यक्रियःसूर्यःसोमोयमःकालःसंध्येभूतान्यहःक्षपा॥पवनो
दिक्पतिर्भूमिराकाशःखचरानराः॥ब्राह्मंत्रासनमास्थायकल्पध्वमिहसंनिधि
मिति मंत्रेणसूर्यादिदेवताभ्योव्रतंनिवेद्याचम्यप्राणानायम्यसंकल्पंकुर्यात्॥
तत्रसंकल्पमंत्रःउपोष्यनवमीत्वयामेघष्टसुराघव॥तेनप्रीतोभवत्वंभोसंसा
राच्चाहिमांहर इति।ततः कोमलांगंविशालाक्षमिंद्रनीलसमप्रभं॥पार्श्वेभरत
शत्रुघ्नौतालवृंतकरावुभौ॥अग्रेग्रंहन्मंतंरामानुग्रहकांक्षिणमितिध्या
त्वारामप्रतिमासमीपेषट्कोणमध्येकोमल्यादशरथंचपूजयेत्॥षट्कोणकोणे

षुरं हृदयायनमइत्यादिरूपेणहृदयादीनिषट्षट्कोणबाह्याष्टदलकम
लमूलेषुहनूमंतंसुग्रीवंभरतंविभीषणंलक्ष्मणंअंगदंशत्रुघ्नंजांबवंतंचद
लमध्येषुदृष्टिंजयंतंविजयंसुराष्ट्रंराष्ट्रवर्धनंअकोपंधर्मपालंसुमंत्रंचपूज
येत्॥दलाग्रेषुपूर्वादिक्रमेणाष्टौलोकपालान्तदग्रेवज्रंशक्तिंखड्गंपाशमं दंडं
कुशंगदांशूलंचेतितेषामायुधानिचपूजयेत्॥रामपूजायांमूलमंत्रः॥इदंवि
ष्णुरितिवा॥ॐरामायनमइतिनाममंत्रोवा॥ॐनमोदशरथायेतिदशरथपू
जायाअन्येषांनाममंत्रः॥इंद्रोग्निश्चयमश्चैवनैर्ऋतोवरुणोनिलः॥कुबेरईशो ९२

ब्रह्माहिर्दिक्पालाःस्नापयंतुनइतिस्नानेमंत्रः॥रामस्यजननीचासिरामा
मकमिदंजगत्॥अतस्त्वांपूजयिष्यामिलोकमातर्नमोस्तुत इतिकौसल्यापू
जयं॥उच्चस्थेग्रहपंचकेसुरगुरौसेंदौनवम्यांतिथौलग्नेकर्कटकेपुनर्वसुदिनेम
ंगलेपूषणि॥निर्दग्धुंनिखिलाःपलाशसमिधोमध्यादयोध्यारणेराविर्भूत
मभूतपूर्वविभवंयत्किंचिदेकंमहदितिमध्याङ्गेजन्मभावना॥वाद्यादिवादनंचपु
ष्पांजलेःपूर्वंफलपुष्पांबुअशोकरत्नतुलसीदलयुक्तंशंखंगृहीत्वार्घ्यंदद्यात्॥
तत्रमंत्रः॥दशाननवधार्थायधर्मसंस्थापनायच॥राक्षसानांविनाशायदै

त्यानांनिधनायच॥परित्राणायसाधूनांजातोरामःस्वयंहरिः॥इत्युक्त्वार्घ्यंमयाद
त्तंभ्रात्रभिःसहितोनघेति।ततःपुष्पांजलिंदद्यात्॥रात्रौजागरणंकृत्वापरदि
नेहोमंकृत्वाप्रतिमादानंकुर्यात्॥तत्रमंत्रस्तु।इमांस्वर्णमयींरामप्रतिमांसमलं
कृतां॥चित्रवस्त्रयुगच्छन्नांरामोहंराघवायते॥श्रीरामप्रीतयेदास्येतुष्टोभवतुराघ
वः॥इतिदत्वाविधानेनदद्याद्दक्षिणांभुवं॥ब्रह्महत्यादिपापेभ्योमुच्यतेनात्र
संशयइति॥ ॥चैत्रशुक्लैकादश्यांदोलोत्सवउक्तोब्राह्मे॥चैत्रमासस्यशुक्लाया
मेकादश्यांतुवेश्मवैः॥आंदोलनीयोदेवेशःसलक्ष्मीकोमहोत्सवैरिति॥ ॥ १३

चैत्रशुक्लद्वादश्यांदमनोत्सवः॥ ॥द्वादश्यांचैत्रमासस्यशुक्लायांदमनोत्स
वः॥बोधायनादिभिःप्रोक्तःकर्तव्यःप्रतिवत्सरमितिरामार्चनचंद्रिकायां॥
अत्रपारणाहर्विवक्षितं॥पारणाहेनलभ्येतद्वादशीकलयापिचेत्॥तदा
त्रयोदशीग्राह्यापवित्रदमनार्पणेइतितत्रैवोक्तेः॥नित्यंचेदं॥ऊर्जेव्रतंमधोदो
लंश्रावणेतंतुपूजनं॥चैत्रेचदमनारोपमकुर्वाणोव्रजत्यधःइतिपद्मपुराणा
त्॥इदंशुक्लास्तावपिकार्यं॥उपाकर्मोत्सर्जनंचपवित्रदमनार्पणं॥ईशानस्य
बलिंविष्णोःशयनंपरिवर्तनं॥कुर्याच्छुक्लस्यचगुरोर्मौंजीपीतिविनिश्चयइति

वृद्धगार्ग्यवचनात्॥चैत्रशुक्लत्रयोदश्यांमदनंचंदनात्मकं॥कृत्वासंपूज्यय
त्नेनवीजयेद्व्यजनेनच॥ततःसंफलितःकामःपुत्रपौत्रसमृद्धिदइति॥इयमु
शनःकल्पादिः॥चैत्रशुक्लचतुर्दशीदमनकारोपणेरात्रिभोगिनीपूर्वाग्राह्या॥
मधोःश्रावणमासस्यशुक्लायातुचतुर्दशी॥सारात्रिव्यापिनीग्राह्येतिबोधा
यनवचनात्॥चैत्रपौर्णमास्यांकृत्यविशेषोविष्णुस्मृतौ॥चैत्रीचित्रायुताचे
त्स्यात्तस्यांचित्रवस्त्रप्रदानेनसौभाग्यमाप्नोतीति॥तथाब्राह्मे॥मंदेवार्केगु
रोवापिवारेष्वेतेषुचैत्रिकी॥तत्राश्वमेधजंपुण्यंस्नानश्राद्धादिभिर्भवेत्॥॥ १४

वायवीये॥संवत्सरकृतार्चायाःसाफल्यायाखिलान्सुरान्॥दमनेनार्चयेद्वै
ष्णवीविशेषेणसदाशिवं॥अत्रपरयाह्या॥सावित्रीव्रतमंतरेणभवतोमापो
र्णमास्योपरइतिदीपिकोक्तेः॥इयंमन्वादिः॥इतिचैत्रकृत्यनि॥॥अथवैशा
खकृत्यं॥॥पाद्मे॥तीर्थेचानुदिनंस्नानंतिलैश्चपितृतर्पणं॥दानंधर्मघटा
दीनांमधुसूदनपूजनं॥माधवेमासिकुर्वंतमधुसूदनतुष्टिदं॥॥अथवै
शाखस्नानंविष्णुस्मृतिपाद्मयोः॥तुलामकरमेषेषुप्रातःस्नानंविधीयते॥
हविष्यंब्रह्मचर्यंचमहापातकनाशन मिति॥अत्रसोरमासउक्तःअन्यद्

पिपक्षद्वयमुक्तंपाद्मे॥मधुमासस्यशुक्लायामेकादश्यामुपोषितः॥पंचद
श्यांचभोवीरमेषसंक्रमणेपिवा॥वैशाखस्याननियमंब्राह्मणानामनुज्ञ
या॥मधुसूदनमभ्यर्च्यकुर्यात्संकल्पपूर्वकमिति॥तत्रमंत्रः॥वैशाखंसक
लंमासंमेषसंक्रमणेरवेः॥प्रातःसनियमःस्नास्येप्रीयतांमधुसूदनः॥म
धुहंतुःप्रसादेनब्राह्मणानामनुग्रहात्॥निर्विघ्नमस्तुमेपुण्यंवैशाखस्ना
नमन्वहं॥माधवेमेषगेभानोमुरारेमधुसूदन॥प्रातःस्नानेनमेनाथफ
लंदेभवपापहन्निति॥तीर्थनामापरिज्ञानेतत्रैव॥यदानज्ञायतेनाम

नस्यतीर्थस्यभोद्विजाः॥तत्रेयुच्चारणंकार्यंविष्णुतीर्थमिदंतिति॥अत्रत्रिका
लंविष्णुपूजाकार्या॥अश्वत्थमूलेजलदानंचेत्यादितत्रैवोक्तं॥अशक्तस्यत्य
हंस्नानमुक्तंपाद्मे॥त्रयोदश्यांचतुर्दश्यांवैशाख्यांचदिनत्रयं॥अपिसम्यग्वि
धानेननारीवापुरुषोपिवा॥प्रातःस्नातःसुनियतःसर्वपापैःप्रमुच्यते॥यदा
नुवैशाखोमलमासस्तदासमाप्तिःशुद्धमासेपूर्णिमायांकार्या॥॥वैशाख
शुक्लप्रतिपन्नारसिंहकल्यादिः॥त्रयोदशीगौरीकल्यादिः॥वैशाखशुक्ल
द्वितीयानीललोहितकल्यादिः॥वैशाखशुक्लतृतीयाअक्षयतृतीया॥इ

यंगौरीव्रतेऽनराकार्या।रंभारूप्यंवर्जयित्वातृतीयांद्विजसत्तम॥अन्ये
षुसर्वकार्येषुगणयुक्तापशस्यतइतिब्रह्मवैवर्तात्॥गणोगणेशस्तेनलक्ष
णयातद्देवत्याचतुर्थी॥द्वितीययातुयाविद्धातृतीयानकदाचन॥कर्तव्याव्रति
भिस्नातधर्मकामार्थतत्परैरितिस्कंदपुराणेद्वितीयाविद्धानिषेधाच्चप्रयोज
कशेश्राद्धेद्वितीयावेधोनत्रिमुहूर्तात्मकःकिंतुकलाकाष्ठादिरूपोपि।अत
एवतृती यागौरीव्रतेस्वल्पापिपराग्राह्या।व्रतांतरेषुत्रिमुहूर्तवेधेनत्याज्य
तंद्वितीयदिनेत्रिमुहूर्तीयाएवग्राह्य त्वमित्याद्यन्यत्रमत्कृतौदृष्टव्यं॥यदा १६

नुचचतुर्थीयुताकिंचिदपिनलभ्यते॥तदागौरीव्रतेत्रिमुहूर्तीलाभेचइत
रव्रतेघपिद्वितीयाविद्धापिग्राह्या॥एकादशीतृतीयाचषष्ठीचैवत्रयोद
शी॥॥पूर्वविद्धापिकर्तव्यादिनस्यात्परेहनीतिदृढवसिष्ठवचनात्
इयंचत्रेतायुगादिः॥तत्रश्राद्धंनित्यंकाम्यंचयुगाद्यादीन्यक्रम्यपा
नीयमप्यत्रनिक्षेपंविमिश्रंदद्यात्पितृभ्यःप्रयतोमनुष्यइतिविष्णुपुरा
णात्॥युगादयःस्मृताह्येतापितॄणांतृप्तिहेतवइतिमत्स्यपुराणाच्च॥
इयंचश्राद्धेपराह्णव्यापिनीग्राह्यानस्यापराह्णकालत्वात्॥काल

व्याप्तिशास्त्रस्यचसर्वापेक्षयाबलवत्त्वात्॥अतएवामावास्याश्राद्ध
निर्णयमुक्तोक्तेकालादर्शे॥एवंमन्वंतरादीनांयुगादीनांविनिर्णयः॥
महालयस्यपक्षस्यअष्टकानामपिस्मृतइति॥यत्तु॥देवलेन
थाह्नेयुगादावयोविदुः॥शुक्लेपूर्वाह्णिकेग्राह्येकृष्णेचैवापराह्णि
कइतिवचनंतदपिउपक्रमकालपरं॥शुक्लपक्षस्यपूर्वाह्णेश्राद्धंकु
र्याद्विचक्षणः॥कृष्णपक्षेऽपराह्णेतुरोहिणेनातिलंघयेदितिवा
यवीयवचनात्॥यद्वा॥यदाशुक्लपक्षगतायुगादितिथिः पूर्वदि ॥१७॥

नकुतपोत्तरार्द्धमेवारभ्यप्रवृत्तोत्तरदिनेवृध्याऽपराह्णेपिकिंचिद्वर्तते
तदासंपूर्णोऽपराह्णोव्यापित्वेनपूर्वदिनगतायाएवग्राह्यत्वेप्राप्तेतदपवा
दत्वेनकुतपपूर्वार्धरूपपूर्वाह्णव्यापिन्यल्पापराह्णस्पर्शिन्युत्तरा
ग्राह्येतिविधीयते॥नचतदाऽपराह्णशास्त्रस्याप्यत्यंतबाधः॥अपराह्णेपि
किंचित्तस्याविद्यमानत्वात्॥हेमाद्रेस्तुमन्वादिषष्ठयंनिर्णयःसंमतः॥
मन्वादयोयुगाद्याश्चतिथयस्तासुमानवः॥स्नात्वाहुत्वाचजप्त्वाचदत्वानंतफ
लंलभेदितिभारतोक्तस्नानादौतत्तरा॥केचित्तुवेशाखस्यतृतीयायांयःपूर्वदि

ङ्कारोतिवे॥इदंदेवानगृह्णंतिकर्त्रंचपितरस्तथेतिगोभिलवचनात्पूर्वा
ह्णेतुसदाकार्यशुक्लामनुयुगादयइतिनारदवचनाच्चश्राद्धेपिपूर्वाह्णव्यापिन्यु
त्तराकार्यतिवदंतितत्कालादर्शादिविरुद्धमयुक्तंच।अपराह्णःपित्रृणां।अप
राह्णेतुपैतृकं।अपराह्णेपित्रर्थक्रियेत्यादिवचनेरपराह्णकालत्वाभिधानात्॥
कर्मण्योयस्ययःकालस्तत्कालव्यापिनीतिथिः॥तस्यांकर्माणिकुर्वीतह्रासवृ
द्धीनकारणमितिवाक्यादपराह्णव्यापिन्याएवश्राद्धेग्राह्यत्वात्॥पूर्वलिखित
गोभिलवचनंत्वनाकरंसाकरत्वेपिपित्रुद्देशेनक्रियमाणतर्पणादिविषयंव्या १८

ख्येयं॥नारदवचनंतुहेशुक्लइतिवचनंव्याख्येयं॥इदंचयुगादिःकृत्येयुगादितिथिम
ध्यएवकर्त्तव्यं॥मन्वादौचयुगादौचयहणेचंद्रसूर्ययोः॥व्यतीपातेवैधृतौचतत्का
लव्यापिनीक्रियेतिस्कंदपुराणात्॥भविष्ये॥वैशाखेशुक्लपक्षेतुतृतीयायांतथै
वच॥गंगातोयेनरःस्नात्वामुच्यतेसर्वकिल्बिषैः॥तस्यांकार्योयवैर्होमोयवैर्वि
ष्णुंसमर्चयेत्॥यवांदद्याद्द्विजातिभ्यःप्रयतःप्राशयेद्यवानिति॥अत्रदानविशे
षोभविष्ये॥इमांप्रकृम्यउदकुंभान्सकनकांसान्नान्सर्वरसैःसह॥यवगोधूम न
चणकानूसक्तूंदध्योदनंतथायेप्यिकंसर्वमेवात्रसस्यंदानेप्रशस्यतइति॥
देवीपुराणे॥तृतीयायांतुवैशाखेरोहिण्यृक्षेप्रपूज्यच॥उदकुंभप्रदा

नेनशिवलोकेमहीयते॥मंत्रस्तु॥एषधर्मघटोदत्तइतिपूर्वमुक्तः॥पित्रुद्देशेनोद
कुंभदानेतु॥एषधर्मघटोदत्तोब्रह्म विष्णुशिवात्मकः॥अस्यप्रदानात्तृप्यंतुपि
तरोपिपितामहाः॥गंधोदकतिलैर्मिश्रंसान्नंकुंभंफलान्वितं॥पितृभ्यःसंप्रदास्या
मिअक्षय्यमुपतिष्ठतु इति॥युगादिषुरात्रिभोजनेप्रायश्चित्तमुक्तमग्निधाने
॥रात्रौभुंक्तेवत्सरेतुमन्वादिषुयुगादिषु॥अभि स्वदृष्टिंमंत्रंचजपेद्ज्ञानपा
तकंइति॥दत्तावारमितिशेषः॥यमःक्रतोपवासाःसलिलंयेयुगादिदिनेषुतु दास्यं
त्यन्नादिसहितंतेषांलोकामहोदयाइति॥उपवासेपूर्वासंवेधतिथ्यनीपा १९
तोयुगमन्वादयस्तथा सन्मुखाउपवासेस्युर्दानादावंतिमास्मृता इत्यन्यदा

दाहृतवचनात्॥मलमासपातेनत्रापियुगादिनिमित्तंश्राद्धंकार्यं॥मन्वादौच
युगादौचतन्मासोरुभयोरपीतिमरीचिवचनात्॥अत्रसमुद्रस्नानंमहाफलं
मुक्तंसौरपुराणे॥युगादौतुनरःस्नात्वाविधिवद्भ्रुवणोदधौ॥गोसहस्रप्रदान
स्यकुरुक्षेत्रेफलंचयत्॥तत्फलंलभतेमर्त्योभूमिदानस्यचध्रुवमिति॥दृश्यमे
वतृतीयापरशुरामजयंतीसाचप्रदोषव्यापिनीग्राह्या॥तथाचभार्गवार्चनदी
पिकायांस्कांदे॥वैशाखस्यसितेपक्षेतृतीयायांपुनर्वसौ॥निशायाःप्रथमेय
मेरामाख्यःसमयेहरिः॥रेणुकायास्तुयोगर्भादवतीर्णोभुविस्वयमिति॥दिन
द्वयेतद्व्याप्तौअंशतःसमव्याप्तौचपरा॥अन्यथापूर्वैवतदुक्तंत्रैवभविष्ये॥

शुक्लातृतीयावैशाखेशुद्धोपोष्यादिनद्वये॥निशायांपूर्वयामेचेदुत्तरान्यत्रपूर्विकेति॥ ॥वैशाखशुक्लसप्तम्यांगंगोत्पत्तिः॥तदुक्तंएथ्वीचंद्रोदयेब्राह्मे॥वैशाखशुक्लसप्तम्यांजह्नुनाजाह्नवीपुरा॥क्रोधात्पीतापुनस्त्यक्ताकर्णरंध्रात्तुदक्षिणात्॥तांतत्रपूजयेद्देवींगंगांगगनमेखलामिति॥इयंचत्रिष्टाचारान्मध्याह्नव्यापिनीग्राह्येतिवदंति।दिनद्वयेतद्व्याप्तावव्याप्तौवापूर्वा।षण्मुन्योरितियुग्मवाक्यात्॥ ॥वैशाखशुक्लद्वादश्यांयोगविशेषोहेमाद्रौ॥पंचाननस्थेगुरुभूमिपुत्रेमेषेरविःस्याद्यदिशुक्लपक्षे॥मासाभिधानाकरभेणयुक्तातिथिर्द्वयंतीपातइतीहयोगः॥अस्मिंस्तुगोभूमिहिरण्यवस्त्रदानेनसर्वंपरिहायपापं॥

सुरत्वमिंद्रत्वमनामयत्वंमर्त्याधिपत्यंलभतेमनुष्यइति॥पंचाननःसिंहः।मासाभिधातिथिर्द्वादशी।करभोहस्तः॥ ॥वैशाखशुक्लचतुर्दशीनृसिंहजयंती।साचप्रदोषयोगिनीग्राह्या॥वैशाखशुक्लपक्षस्यचतुर्दश्यांविवस्वति॥अस्तंगामिनिसर्वेषांपुरतस्तंभमध्यतः॥प्रबभूवमहाविष्णुर्नरसिंहाकृतिर्नृप॥तस्योव्रतंनरैःकार्यंमहाविष्णोरतिप्रियमिति नृसिंहप्रसादेदाहृतनृसिंहपुराणेऽस्तमयस्यजन्मकालत्वोक्तेः॥जयंतीपुजन्मकालस्यैवपूजारूपकर्मकालत्वात्।दिनद्वयेतद्व्याप्तावव्याप्तौवापरा।संकल्परूपव्रतोपक्रमकालत्वात्॥चतुर्दश्यांचपूर्णिमेतियुग्मवाक्यात्च॥अस्यांप्रातःस्नात्वविधायसूर्यादिदेवताभ्योव्रतंनिवेद्यच

स्यप्राणानायम्योदङ्मुखोवारिपूर्णंताम्रपात्रंगृहीत्वासंकल्पंकुर्यात्।तदु
क्तंहेमाद्रौदानेनृसिंहपुराणे॥नियमंचप्रकुर्वीतदंतधावनपूर्वकं॥नियमः
संकल्पःदंतधावनग्रहणं प्रातःस्नानोपलक्षणं।दंतधावनंचतृणपर्णादिना
द्वादशगंडूषैर्वाकार्यं॥उपवासदिनेकाष्ठस्यनिषेधात्॥संकल्पमंत्रस्तत्रैव॥
श्रीनृसिंहमहोग्रस्त्वंदयांकृत्वाममोपरि॥आवाहंचविधास्यामिव्रतंनिर्विघ्न
तांनयेति॥ततःव्रतस्थेननकर्तव्यासंगतिःपापिभिःसहेत्यादिवचनात्॥
मिथ्यालापपाखंडादिसंभाषणवर्जनंकुर्यात्॥ततोमध्याह्नवेलायांनद्या २९

दौमृद्गोमयतिलामलकैःस्नात्वानित्यकर्मकृत्वागृहंगछेत्॥केचित्तुअस्य
व्रतस्यसंकल्पोमध्याह्नएवकर्तव्यइत्युक्तातत्रप्रमाणत्वेनततोमध्याह्नवे
लायांनद्यादौविमलेजलेइत्युपक्रम्यपरिधायशुचिर्वासोव्रतकर्मसमारभे
दितिनृसिंहपुराणंलिखितंनदृश्यते॥तत्रनियमंचप्रकुर्वीतेत्यादिनासंकल्प
मभिधायव्रतस्थेनेत्यादिनामिथ्यालापादिवर्जनप्रदर्शनपूर्वकंततोमध्या
ह्नइत्यादिनास्नानमभिधायपरिधायशुचिर्वासोनित्यकर्मसमारभेदित्य
भिधानात्॥नित्यंमध्याह्नसंध्यादि॥ततोगोमयोपलिप्तेःस्थंडिलंकृत्वातत्र

कलशंसंस्थाप्यहैमीपलतदर्धतदर्धार्धमितांप्रतिमांसंस्थाप्यप्राणप्रतिष्ठां
कृत्वामूलमंत्रेणवैदिकेननाम्नावाऽवाहनादिकृत्वास्नानसमयेपंचामृतैःस्ना
पयित्वायज्ञोपवीतवस्त्रेदत्वागंधादिभिःपूजयेत्॥तत्रमंत्रः॥चंदनंशीतलं
दिव्यंचंद्रकुंकुममिश्रितं॥ददामितवतुष्ट्यर्थंनृसिंहपरमेश्वरेतिचंदनमंत्रः॥
कालोद्भवानिपुष्पाणितुलस्यादीनिवैप्रभो॥पूजयामिनृसिंहत्वांलक्ष्म्या
सहनमोस्तुतेइतिपुष्पं॥कालागरुमयंधूपंसर्वदेवसुवल्लभं॥करोमितेम राम
हाविष्णोसर्वकामसमृद्धये॥इतिधूपं॥दीपःपापहरःप्रोक्तस्तमोराशिनिना २२

शनः॥दीपेनलभ्यतेतेजस्तस्माद्दीपंददामिते॥इतिदीपं॥नैवेद्यंसुखदंचारु
भक्ष्यभोज्यसमन्वितं॥ददामितेरमाकांतसर्वपापक्षयंकुरु॥नैवेद्यं॥फलतां
बूलदक्षिणादत्वाऽर्घ्यंदद्यात्॥तत्रमंत्रः॥नृसिंहाच्युतदेवेशलक्ष्मीकांतजगत्प
ते॥अनेनार्घ्यप्रदानेनसफलाःस्युर्मनोरथाः॥ततोनीराज्यपुष्पांजलिंदत्वा
स्तोत्रादिनास्तुत्वाप्रार्थयेत्॥तत्रमंत्रः॥पीतांबरमहाबाहोप्रह्लादभयनाशन॥
यथाभूतेनार्चनेनयथोक्तफलदोभव॥ततोरात्रौगीतवाद्यपुराणश्रवणादि
भिर्जागरणंकृत्वाप्रभातेपुनःपूजयित्वाविष्णुदेशेनब्राह्मणान्भोजयित्वा

स्वर्णमयं सिंहं गोभूहिरण्यतिलशय्यादिदत्वाप्रार्थयेत्॥मद्वंशेयेनराजाता
यैजनिष्यंतितत्पशः॥नात्समुद्धरदेवेशदुस्तराद्भवसागरात्॥पातकार्णवमग्न
स्यव्याधिदुःखांबुचारिणः॥जीवेस्तुपरिभूतस्यमहादुःखगतस्यमे॥करावलं
बनंदेहिशेषशायिन्जगत्पते॥श्रीनृसिंहरमाकांतभक्तानांभवनाशन॥क्षीरा
बुधिनिवासस्त्वंचक्रपाणिर्जनार्दन॥व्रतेनानेनदेवेशभुक्तिमुक्तिप्रदोभवेति॥
एवंप्रार्थ्यतनोदेवंविसृज्यचयथाविधि॥उपहारादिकंसर्वमाचार्यायनिवेदयेत्॥
दक्षिणाभिःसुसंतोष्यब्राह्मणांस्तविसर्जयेत्॥मध्याह्नेतुसमायुक्तोभुंजीतबंधु
भिर्नरइति॥अस्याएवंयोगविशेषेणप्राशस्त्यंतत्रैवोक्तं॥स्वातीनक्षत्रयोगेच २३

शनिवारेमहाव्रतं॥सिद्धयोगस्यसंयोगेवणिजेकरणेतथा॥पुंसांसौभाग्य
योगेनलभ्यतेदेवयोगतः॥सर्वैरेतैस्तयुक्तंतद्हत्याकोटिविनाशनं॥एतद
न्यतरेयोगेमहिनंपापनाशनमिति॥तथा॥सर्वेषामपिवर्णानामधिकारोस्तु
मद्व्रते॥इदंचनित्यं॥वैशाखशुक्लपक्षेचचतुर्दश्यांसमाचरेत्॥मज्जन्मसंभ
वंपुण्यंव्रतंपापप्रणाशनं॥वर्षेवर्षेचकर्तव्यंममसंतुष्टिकारकं॥वर्षेवर्षेइतिवी
प्साश्रवणात्॥अन्यथानरकंयांतियावच्चंद्रदिवाकरावितिअकरणेदोषश्रवण
च्च॥काम्यंच॥अपुत्रोलभतेपुत्रानित्यादिफलश्रवणात्॥इयमेवगारुडकल्पा
दिः॥॥वैशाखशुक्लपौर्णमास्यांविशेषोभविष्ये॥वैशाखीकार्तिकीमाघीतिथ

योतीवपूजिताः॥स्नानदानविहीनास्तानने याःपांडुनंदनेति॥पाद्मे॥वैशाख्यां
विधिवत्स्नात्वासोजये द्ब्राह्मणान्दश॥दशसंसर्वपापेभ्योमुच्यतेनात्रसंशय
इति॥विष्णुधर्मोत्तरे॥वैशाख्यांपौर्णमास्यांतु ब्राह्मणान्सप्तपंच च॥क्षौद्रयुक्तैस्तिल
लैःकृष्णैर्वाचयेद्यदिचेन्नरः॥प्रीयतांधर्मराजेतियद्वामनसिवर्तते॥तिलैर्दत्तैरि
तिशेषः॥वाचयेत्स्वस्तिवाचयेदित्यर्थः॥यावज्जीवकृतात्पापात्तत्क्षणादेवमुच्यत
इति॥यद्वामनसिवर्ततेयत्फलकामःस्यादित्यर्थः॥ ॥इतिवैशाखकृत्यानि॥अथ
ज्येष्ठकृत्यानि॥ ॥ज्येष्ठकृष्णद्वितीयासमानकल्पादिः॥ज्येष्ठकृष्णचतुर्दशीमाह
श्वरकल्पादिः॥ज्येष्ठशुक्लतृतीयायांरंभाव्रतं॥तथाचभविष्ये॥भद्रेकुरुष्वयत्ने २४

नरंभाव्रतमुत्तमं॥ज्येष्ठशुक्लतृतीयायांस्नात्वानियमतत्परेति॥इयंपूर्वविद्ध
ग्राह्या॥बृहन्नारदीयेतथारंभासावित्रीवटपेतकी॥रूक्षाष्टमीचभूताचकर्तव्या
संमुखीतिथिरितिस्कांदोक्तेः॥इयमेववामनकल्पादिः॥ज्येष्ठशुक्लचतुर्थ्यांतु
स्नातापूर्वमुपासती॥तस्मात्सानत्रसंपूज्यास्त्रीभिःसौभाग्यवृद्धये॥उपहारैश्च
विविधैर्गीतनृत्योत्सवादिभिः॥होमैःपयोभिर्वस्त्रैश्चपत्रपुष्पैःसुगंधिभिरिति॥
ज्येष्ठशुक्लदशमीदशहरा॥तदुक्तंहेमाद्रौभविष्ये॥ज्येष्ठमासिसितेपक्षेदशमी
हस्तसंयुता॥हरतेदशपापानितस्माद्दशहरास्मृतेति॥वाराहेतुगंगायादशहरा
खमुक्तं॥दशम्यांशुक्लपक्षेतुज्येष्ठमासिकुजेहनि॥अवतीर्णाह्यतःस्वर्गाद्धस्त

र्क्षेचसरिद्वरा॥हरतेदशापापानितस्माद्दशाहरास्मृता॥तस्यांस्नानंप्रकुर्वीत
दानंचैवविशेषतइति॥स्कांदेतुदशायोगाउक्ताः॥यथा॥ज्येष्ठेमासिसितेपक्षे
दशम्यांबुधहस्तयोः॥गरानंदेव्यतीपातेकन्याचंद्रेवृषेरवौ॥दशायोगेनरःस्ना
त्वासर्वपापैःप्रमुच्यतइतिद्वयबुधभोमयोःकल्पभेदेनव्यवस्था॥इयंचखंड
त्रियत्रयोगबाहुल्यंसाग्राह्या॥अस्यांॐनमःशिवायेनारायणायेदशापापहरा
यैगंगायैनमोनमः॥इतिमंत्रेणगंगांपूजयित्वानारायणंमहेशंचब्रह्माणंभा
स्करंतथा॥भगीरथंहिमवंतंगंधपुष्पादिभिःपूजयित्वादशफलानिदत्वा

दीपान्दशाप्रस्तितिलान्गंगायैनमइतिमंत्रेणदत्वादशसक्तुपिंडान्दशगु
डपिंडानजलेक्षिपेत्॥ततोदशाप्रस्थतिलान्यथावान्दशागाश्चदशासंख्येभ्यो
ब्राह्मणेभ्योदद्यादिति॥एवंकृत्वाविधानेनवित्तशाठ्यविवर्जितः॥दशजन्मा
र्जितैःपापैर्मुच्यतेनात्रसंशयइति॥गंगायाअभावेअन्यस्मांसरितिकार्यं॥त
थाचस्कांदे॥अदत्तानामुपादानंहिंसाचैवविधानतः॥परदारोपसेवाचकायिकं
त्रिविधंस्मृतं॥पारुष्यमनृतंचैवपैशून्यंचापिसर्वशः॥असंबद्धप्रलापश्च
वाङ्मयंस्याच्चतुर्विधं॥परद्रव्येष्वभिध्यानंमनसानिष्टचिंतनं॥चित्तस्याभि
निवेशश्चमानसंत्रिविधंस्मृत मिति॥अत्रविशेषःकाशीखंडे॥ज्येष्ठेमासिसि

तेपक्षेप्राप्यप्रतिपदंतिथिं॥दशाश्वमेधिकेस्नात्वामुच्यतेसर्वपातकैः॥एवंस
र्वासुतिथिषुक्रमस्त्रायीनरोत्तमः॥आशुक्लपक्षदशमींप्रतिजन्माघमुत्सृजेदि
ति॥तथा॥लिंगंदशाश्वमेधेशंदृष्ट्वादशाहरातिथौ॥दशजन्मार्जितैःपापैर्मुच्यते
नात्रसंशयइति॥मलमासेतुतत्रापिदशाहराकृत्यंकर्तव्यं॥पुनःश्राद्धेतुसत्यत्ये
वेत्यन्यत्रमत्कृतोद्रष्टव्यं॥॥ज्येष्ठशुक्लैकादश्यांनिर्जलैकादशीव्रतंमदनरत्ने
स्कांदे॥ज्येष्ठमासिनृपश्रेष्ठयाशुक्लैकादशीभवा॥निर्जलंसमुपोष्यात्रजल
कुंभान्सशर्करान्॥प्रदायविप्रमुख्येभ्यस्तापत्रयविवर्जितः॥विष्णुलोकमवाप्य
थमोदतेविष्णुसंनिधाविति॥॥ज्येष्ठपौर्णमास्यांवटसावित्रीव्रतंस्कंदपुराणे॥

ज्येष्ठमासेतुसंप्राप्तेपौर्णमास्यांपतिव्रता॥स्नात्वाचैवशुचिर्भूत्वावटंसिंच्यव
हूदकैः॥रात्रौकुर्वीतनक्तंचअहमेकंसमाहिता॥तथैववटवृक्षंचपक्षेपक्षेच
पूजयेत्॥संप्राप्तेचपुनर्ज्येष्ठेलघुभुग्द्वादशींनयेत्॥दंतानांधावनंकृत्वानियमं
कारयेत्ततः॥नियममंत्रः॥त्रिरात्रंलंघयित्वाचचतुर्थेदिवसेह्यहं॥चंद्रायार्घ्यप्र
दत्वाचपूजयित्वाचतांसतीं॥मिष्टान्नानियथाशक्त्याभोजयित्वाद्विजोत्तमान्॥
मोक्ष्येहंचजगद्धात्रिनिर्विघ्नंकुरुमेशुभे॥ततोवंशमयेपात्रेवालुकाप्रस्थंगृह्य
तासप्तधान्यभृतंवंशपात्रंचवस्त्रद्वयोपरिस्थापयित्वाहेमीब्रह्मणासहसा
वित्रीप्रतिमांतत्रपूजयित्वान्यग्रोधतलेदिनत्रयमुपवासिनीतिष्ठेत॥पौर्णमा

स्यांमत्स्यर्षपैःस्नात्वासत्यवंतंसावित्रींस्वर्णमयींरौप्यपर्यंकमारोप्यरौप्यरथो
परिनिवेशयेत्॥तथारौप्यंकाष्ठभारंवटंचैवकुर्यात्॥ततोवर्तुलमंडलेपंचा
मृतेनसर्वाःस्नापयित्वागंधादिभिःपूजयेत्॥अंगपूजादिकंउद्यापनंचव्रत
कांडेद्रष्टव्यं॥विस्तरभयान्नात्रलिखितं॥दाक्षिणात्यास्त्विदमेवकुर्वंति॥पाश्चा
त्यकादयस्तुअमायामाचरंति॥उक्तंचनिर्णयामृतेभविष्ये॥अमायांचतथा
ज्येष्ठेवटमूले तथासती॥त्रिरात्रोपोषितानारीविधिनानेनपूजयेत्॥अत्रको
नुत्रयोदश्यांनक्तंकुर्यात्जितेंद्रिया॥अयाचितंचतुर्दश्यामुपोषणमिति॥ राम
अत्रपूर्णिमामावास्येपूर्वविद्धेवग्राह्ये॥बृहत्पातथारंभासावित्रीवटपैतृकी॥ २७

कृष्णाष्टमीचभूताचकर्तव्यासंमुखीतिथिरितिस्कांदात्॥भूतविद्धानक
र्तव्याअमावास्याचपौर्णिमा॥वर्जयित्वासुरश्रेष्ठसावित्रीव्रतमुत्तममिति
ब्रह्मवैवर्तोक्तेः॥अत्रपूर्णिमामावास्यानुरोधेनयथात्रिरात्रसंपत्तिर्भवतित
थात्रयोदश्यादिग्राह्यंतस्याःप्राधान्यात्॥अस्यामेवपौर्णमास्यांविशेष
आदित्यपुराणे॥ज्येष्ठमासितिलान्दद्यात्सौर्णमास्यांविशेषतः॥अश्वमे
धस्ययत्पुण्यंतत्प्राप्नोतिनसंशयइतिविष्णुधर्मोत्तरे॥सोपवासस्तथाज्ये
ष्ठेपूर्णेनुग्रंशलक्षणे॥उपानद्दोतथाछत्रंदत्वात्यंतंसुखीभवेत्॥तत्रमंत्रः॥

उपानहोप्रदास्यामिकंटकादिनिवारणे॥सर्वस्थानेषुसुखदेअतःशांतिंप्र
यछमे॥छत्रदानमंत्रः॥इहामुत्रातपत्राणंकुरुमेकेशवप्रभो॥छत्रंतवप्रीतये
दत्तंब्राह्मणायमयासहेति॥मयालक्ष्म्या॥विष्णुस्मृतौ॥ज्येष्ठीज्येष्ठायुताचै
स्याछत्रोपानत्प्रदानेननरोनराधिपत्यमाप्नोतीति॥इयंरौच्यमन्वादिः॥
कौर्मकल्पादिश्च॥तथाचवामनपुराणे॥उदकुंभांबुदानंचतालवृंतंसचंद्र
नं॥त्रिविक्रमस्यप्रीत्यर्थंदातव्यंज्येष्ठमासिसर्वदेति॥ ॥इतिज्येष्ठकृत्यानि॥
॥अथाषाढकृत्यानि॥ ॥आषाढकृष्णतृतीयाआग्नेय कल्पादिः॥ २८

तिथितत्वेआषाढशुक्लद्वितीयाकूर्मसंस्कांदे॥आषाढस्यसितेपक्षेद्वितीयापु
ष्यसंयुता॥तस्यांरथेसमारोप्यरामंमांभद्रयासह॥यात्रोत्सवंप्रकुर्यात्थप्रीण
येत्तुबहून्द्विजान्॥रक्षाभावेतिथौकार्यसदासाप्रीतयेममेति॥मांजगन्नाथं॥
आषाढशुक्लचतुर्थ्यांरथंतरकल्पादिः॥आषाढशुक्लदशमीपौर्णमासीचम
त्स्यादिःनिर्णयस्तूक्तपूर्वमुक्तः॥आषाढभाद्रपदकार्तिकशुक्लद्वादश्यांधनुराधा
श्रवणारेवतीयुक्तासुपारणंनकार्यं॥भविष्ये॥आभाकासितपक्षेषुमैत्रश्र
वणरेवतीः॥संगमेनेवमोक्तव्यंद्वादशाद्वादशीर्हरेदिति॥अत्रविशेषोविष्णु

धर्मे॥मैत्राद्यपादेस्वपतीहविष्णुःश्रुतेश्चमध्येपरिवर्तमेति॥पोष्ठ्यांत्यपादेप्र
तिबोधमेतिसुप्तिप्रबोधपरिवर्तनमेववर्ज्यमिति॥इदंतुवचनद्वयंमहानिबं
धेष्वदृष्टत्वादनाकरमपिलोकेबहुलप्रसिद्धेर्लिखितं॥आषाढशुक्लैकादश
यांतद्वादश्यांवाविष्णुशयनोत्सवःकर्तव्यः॥तदुक्तंब्राह्मे॥एकादश्यांतुशु
क्लायामाषाढेभगवान्हरिः॥भुजंगशयनेशेतेक्षीरार्णवजलेसदेति॥भविष्ये॥
द्वादश्यांशुक्लपक्षेचप्रस्वापावर्तनोत्सवइति॥तत्रविशेषः॥ निद्रास्वापोदि
वोत्थानंसंध्यायांपरिवर्तनमिति॥एताश्चद्वादश्योरात्रिसंध्यादिनेष्वनुरा २९

धाश्रवणरेवतीनामादिमध्यांतभागयुक्ताःक्रमेणप्रस्वापादिषुप्रशस्ताः॥
तथाचनारदीये॥मैत्राद्यपादेस्वपितीहविष्णुःश्रुतेश्चमध्येपरिवर्तमेति॥पो
ष्ठ्यावसानेचसुरारिरंतःप्रबुध्यतेमासचतुष्टयेनेति॥रात्र्यादिषुनक्षत्रभागा
नामभावेद्वादशीनक्षत्रमात्रयोगोपिरात्र्योगतोग्राह्यः॥अत्रद्वादश्यामितिपा
रणाहर्विवक्षितं॥पारणाहेपूर्वरात्रेघंटादीन्वादयन्मुहुरितिरामार्चनचंद्रिको
क्तेः॥यदातुद्वादशीषुनक्षत्राणिनसंत्येवकिंतुएकादशीषुत्रयोदशीषुवातदा
तत्रापितत्तन्नक्षत्रभागेएवनिशादिवेलानादरेणप्रस्वापादिकार्यं॥अप्राप्ते

द्वादश्यामृक्षेउ स्थानशयनेहरेः॥पादयोगेनकर्तव्येनाहोरात्रंविचिंतयेदि
तिजीमूतवाहनोदाहृतवचनात्॥क्वचित्तुआषाढकार्तिकपौर्णमास्यांसाप
प्रबोधावुक्तौ॥क्षीराब्धौशेषपर्यंकेआषाढ्यांसंविशेद्धरिः॥निद्रांत्यजतिका
र्तिक्यामितिचातुर्मास्यव्रतारंभोप्याषाढशुक्लैकादश्यांद्वादश्यांपौर्णमासी
षुकर्कसंक्रांतिदिनेवाविकल्पेनकर्तव्यः॥एकादश्यांतुगृह्णीयात्संक्रांतीकर्क
टस्यवा॥आषाढ्यांवानरैर्भक्त्याचातुर्मास्योदितंव्रतमितिसनत्कुमारवचना
त्॥आषाढशुक्लद्वादश्यांपौर्णमास्यामथापिवेतिवाराहपुराणाच्च॥भारते॥ ३०

आषाढेतुसितेपक्षेएकादश्यामुपोषितः॥चातुर्मास्यव्रतंकुर्याद्यत्किंचित्प्रय
तोनरइति॥अस्यनित्यत्वंतत्रैवोक्तम्॥वार्षिकांश्चतुरोमासान्वाहयेत्केनचिन्नरः॥
व्रतेननोचेदाप्नोतिकिल्बिषंवत्सरोद्भवं॥असंभवेतुलार्केतुकर्तव्यंतत्प्रयत्नत
इति॥अस्यारंभःशुक्लास्नादावपिकार्यः॥नक्षत्रेशयनमोद्यंचशुक्रगुर्वोर्नवाति
थिः॥खंडत्वंचिंतयेदादौचातुर्मास्यविधौनरइति॥इदंद्वितीयाद्यारंभविषयं॥
एवमाशौचादौद्वितीयाद्यारंभोभवत्येव॥अशुचिर्वाशुचिर्वापियदिस्त्री
यदिवापुमान्॥व्रतमेतन्नरःकृत्वामुच्यतेसर्वपातकैरितिस्कांदात्॥प्रार

ब्धेस्तूतकंनस्यादनारब्धेतुसूतकमितिविष्णुवचनाच्च॥व्रतग्रहणप्रकारस्तु
हेमाद्रौभविष्ये॥एवंतांप्रतिमांविष्णोःपूजयित्वास्वयंनरः॥प्रभाषेताग्रतोवि
ष्णोःकृतांजलिपुटस्तथा॥चतुरोवार्षिकान्मासान्देवस्योत्थापनावधि॥इमं
करिष्येनियमंनिर्विघ्नंकुरुमेच्युत॥गृहीतेस्मिन्व्रतेदेवयद्यपूर्णंमृतोह्यहं॥
तन्मेभवतुसंपूर्णंत्वत्प्रसादात्सुरेश्वरेतिसंकल्पमंत्रः॥अत्रइमंमित्यस्य
स्थानेकरिष्यमाणव्रतस्यनिर्देशःकार्यः॥चातुर्मास्यव्रतानिचैतत्रैव॥मधु
रस्वरोभवेद्गायन्युरुषोगुडवर्जनात्॥तैलस्यवर्जनाद्गायन्सुंदरांगःप्रजाय ३१

ते॥दद्युतैलपरित्यागाच्छत्रुनाशमवाप्नुयात्॥योगाभ्यासीभवेद्यस्तुसब्रह्मप
दमाप्नुयात्॥फलत्यागाच्चमतिमान्बहुपुत्रश्चजायते॥तांबूलवर्जनाद्भोगिकं
ठश्चजायते॥शाकपत्राशनत्यागीअपक्वादोषमलोभवेत्॥पादाभ्यंगपरि
त्यागाच्छिरोभ्यंगविवर्जनात्॥दीप्तिमान्दीपकरणोयशोदद्यपतिर्भवेत्॥द
धिदुग्धतक्रनियमीगोभक्तोगोपतिर्भवेत्॥इंद्रातिथिलमाप्नोतिस्थालीपा
कस्यवर्जनात्॥लभतेसंततिंदीर्घांतैलपक्वविवर्जनात्॥भूमौप्रस्तरशायी
चविष्णोरनुचरोभवेत्॥भूमौमुंक्तेयस्तुनरःसपृथिव्याःपतिर्भवेत्॥सदा

मुनिः सदा योगी मधुमांसस्य वर्जनात्॥ निर्व्याधिर्निरुजो जस्वी सुरा मद्य विवर्जनात्॥ एकांतरोपवासेन ब्रह्मलोके महीयते॥ धारणाभिर्नरो नित्यं गंगा स्नान फलं लभेत्॥ धारणान्नखलोम्नां च गंगा स्नानं दिने दिने॥ मौनव्रती भवेद्यस्तु तस्याज्ञाः स्खलिता भवेत्॥ नमो नारायणायेति जपन्यज्ञ फलं लभेत्॥ पादाभिवंदनाद्विप्रो लभेद्गोदान जं फलं॥ प्रदक्षिणत्रयं तस्य स्तुकरोति स्तुतिपाठकः॥ हंसयुक्त विमानेन स च विष्णुपुरं व्रजेत्॥ एकभक्तान्नानान्नित्यमग्नि होत्र फलं लभेत्॥ उपोषणफलं भुंक्ते रंभापालाश पत्रजे॥ अन्येषु योनरो ३२

भुंक्ते कुरुक्षेत्र फलं लभेत्॥ अन्येषु पत्रेषु॥ एवमादिव्रते पार्थ तुष्टिमायाति केशवः इति॥ अत्र एकभक्त व्रते विप्रमिथुनं पूजयित्वा धेनुदानमंते कार्यं॥ संध्यादीपदाने समाप्ते सुवर्णदीपिकां वस्त्रयुतां दद्यात्॥ पत्रभोजने कांस्यपात्रं गोयुतं दद्यात्॥ यत्रोक्तं तत्र धेनुं दद्यात्॥ चातुर्मास्यव्रतं कृत्वा व्रतांते गोवृषप्रदइति वचनात्॥ प्रदक्षिणं कृत्वा वस्त्रं दद्यात्॥ तत्रैव॥ चतुरो वार्षिकान्मासान्नियमो येन यः कृतः॥ कथयित्वा द्विजेभ्यस्तं दद्याद्धेन्या सदक्षिणं॥ दत्वा विसर्जयेद्विप्रांस्ततो भुंजीत वाग्यतइति॥ श्रावणादिषु मासेषु प्रत्येकं व्रतान्याह भ

विष्णो॥श्रावणेवर्जयेच्छाकंदधिभाद्रपदेतथा॥दुग्धमाश्वयुजेमासिकार्ति
केद्विदलंत्यजेत्॥स्कांदे॥चत्वार्येतानिनित्यानिचतुराश्रमवासिनां॥प्रथम
मासिकर्तव्यंनित्यंशाकव्रतंनरैः॥द्वितीयेमासिकर्तव्यंदधिव्रतमनुत्तमं॥प
योव्रतंतृतीयेचचतुर्थेपिनिशामय॥द्विदलंबहुबीजंचवृंताकंचैववर्जयेत्॥
नित्यान्येतानिविप्रेंद्रव्रतान्याहुर्मनीषिणः॥तथा॥जंबीरंराजमाषांश्चमूलकं
रक्तचंदनं॥कूष्मांडंचेक्षुदंडंचचातुर्मास्येत्यजेद्बुधः॥तथा॥विशेषाद्वदरीधा
त्रीकूष्मांडंतिन्तिणीत्यजेत्॥जीर्णधात्रीफलंग्राह्यंकथंचित्कायशोधनमिति॥ ३३

स्कांदे॥वार्षिकांश्चतुरोमासान्प्रसुप्तेवैजनार्दने॥मंचरत्वङ्मादिशयनंवर्जये
द्भक्तिमान्नरः॥अन्नतोवर्जयेद्भार्यामासंमधुपरोदनं॥पटोलंमूलकंचैववृंताकं
चनभक्षयेदित्यादि॥शाकशब्दश्चदशासुरूढः॥मूलपत्रकरीराग्रफलकांडा
धिरूढकाः॥त्वक्पुष्पकवचंचैवशाकंदशविधंस्मृतमितियुक्तेः॥करीरंवंशाग्रं॥
अधिरूढंअंकुरः॥कवचंछत्राकसदृशं॥आचारप्रदीपे॥वृंताकंचकलिंगंच
बिल्वोदुंबरफिंसटाः॥उदरेयस्यजीर्यतेनस्यदूरतरोहरिः॥फिंसटंदग्धां
नं॥फीःसटेतिदीर्घपाठेतुफीःसटंश्लेष्मातकमितिधन्वंतरिनिघंटुः॥तथा॥

निष्पावान्राजमाषांश्चमसूरंसंधितानिच॥शृंताकंचकलिंगंचसुस्नेदेवेविव
र्जयेत्॥संधितानिलवणशाकादीनि॥ ॥आषाढ्यांकोकिलाव्रतारंभउक्तोभ
विष्ये॥आषाढपौर्णमास्यांतुसंध्याकालउपस्थिते॥संकल्प्यैवंमासमेकंश्रा
वणेप्रत्यहंह्यहं॥स्नानंकरिष्येनियताब्रह्मचर्यैस्थितासती॥शोक्ष्यामिनक्तंभ
ञ्यांकरिष्येप्राणिनांदयामिति॥अस्यनक्तव्रतत्वात्प्रदोषव्यापिनीग्राह्या॥
अस्यांकिंचिद्दानमावश्यकं॥तदुक्तमयोध्याकांडेभरतंप्रतिकैकेयीवाक्ये॥आषाढी
कार्तिकीमाघीतिथयःपुण्यसंमताः॥अन्नदानवतोयांतुयस्यांयोनियमोमत ३४

इति॥अत्रैवव्यासपूजोक्ता॥तत्रमध्याह्नव्यापिनीग्राह्यादिनद्वयेतादृशीचे
त्परैवेतिसंन्यासपद्धतौ॥इयंमन्वादिः॥ ॥इत्याषाढकृत्यानि॥ ॥अथश्रावण
कृत्यानि॥ ॥श्रावणादिमासचतुष्टयेशुक्लपक्षेद्वितीयासुअशून्यशयनव्रतं॥
तत्रचंद्रोदयव्यापिनीग्राह्या॥एकभक्तेदिवानक्तेनिशिचंद्रोदयव्रते॥तिथिस्त
त्कालिकीग्राह्येतिमदनरत्नेस्मृतिसंग्रहवचनात्॥चंद्रोदयव्रतलंबास्यचंद्रा
यार्घ्यदानव्योदध्यक्षतविभूषितइतिचंद्रोदयेचंद्रार्घ्यदानविधानात्॥
दिनद्वयेतत्रसतेःसतेवापरा॥चतुर्षुसितपक्षेषुमासेषुश्रावणादिषु॥अ

शून्याख्यंव्रतंकुर्याज्जयायातुफलाधिकमितिमदनरत्नोदाहृतवचनात्॥अत्र
त्रयोदशीमांतोमासोग्राह्यइतिहेमाद्रौ॥श्रवणतृतीयाकज्जलीसंज्ञासापरे
तिदिवोदासीये॥श्रावणकृष्णचतुर्थ्यबहुलाख्यामध्यदेशेप्रसिद्धासाच
सायाह्नव्यापिनीग्राह्या।दिनद्वयेतथातेपूर्वा॥अत्रगोपूजायवान्नाशनंच
कार्यमितिदिवोदासीये॥श्रावणकृष्णतृतीयायांश्रवणयुक्तायांविघ्नपू
जा॥तदुक्तंहेमाद्रौविघ्नधर्मोत्तरे॥तृतीयाश्रावणेकृष्णायास्याद्भ्रवणा
संयुता॥तस्यांसंपूज्यगोविंदंतुष्टिमग्र्यामवाप्नुयादिति॥श्रावणकृष्णच ३५

तुर्थ्यसोमकल्यादिः॥श्रावणशुक्लतृतीयामधुश्रवाख्यागुर्जरेषुप्रसिद्धा
सापरयुताग्राह्या॥श्रावणशुक्लचतुर्थ्यांदूर्वागणपतिव्रतं॥तत्रसामध्याह्न
व्यापिनीग्राह्यादिनद्वयेतद्व्याप्तौअव्याप्तौवापूर्वा॥तथाचबृहस्पतिः॥चतु
र्थीगणनाथस्यमातर्विद्धाप्रशस्यते॥मध्याह्नव्यापिनीसातुपरतश्चेत्परेह्नि
नीति॥श्रावणशुक्लपंचम्यां नागपूजोक्ताभविष्ये॥श्रावणेमासिपंचम्यां
शुक्लपक्षेनराधिप॥द्वारस्योभयतोलेख्यागोमयेनविषोल्बणाः॥पूजये
द्विधिवद्वीरदधिदूर्वाकुरैःकुशैः॥गंधपुष्पोपहारैश्चब्राह्मणानांचतर्पणैः॥

येतस्यांपूजयंतीहनागाश्चक्रिपुरःसराः॥नतेषांसर्पतोवीरभयंभवतिकु
त्रचिदिति॥इयमेवरोरवकल्पादिः॥श्रावणशुक्लद्वादश्यांदधिव्रतारंभःश्रा
वणुक्तः॥तत्रतत्कादीनांननिषेधः॥अत्रैवद्वादश्यांविष्णोःपवित्रारोपणंहेमा
द्रौविष्णुरहस्ये॥श्रावणस्यसितेपक्षेकर्कटस्थेदिवाकरे॥द्वादश्यांवासुदेव
स्यपवित्रारोपणंस्मृतं॥द्वादश्यांश्रवणेवापिपंचम्यामथवाद्विज॥आनु
कूल्येषुकर्तव्यंपंचदश्यामथापिवेति॥शिवेतुतत्रैवकालोत्तरे॥आषाढां
तेचतुर्दश्यांनभस्यनभसोस्तथा॥अष्टम्यांचचतुर्दश्यांपक्षयोरुभयोःस ३६

मिति॥अधिवासनंदीपिकायां॥गोदोहांतरितेकालेपूर्वेह्युरधिवासनमि
ति॥गोणकालउक्तोरामार्चनचंद्रिकायां॥पवित्रारोपणंविघ्नाछ्रावणेनभ
वेद्यदि॥कार्तिकावधिशुक्लास्तेकर्तव्यमितिनारदः॥शुक्लास्तेपीत्यर्थः॥त
था॥हेमरौप्यताम्रक्षौमसूत्रैःकौशेयपट्टजैः॥कुशैःकाशैश्चकार्पासैर्ब्रा
ह्मण्याकर्तितैःशुभैः॥कृत्वात्रिगुणितंसूत्रंत्रिगुणीकृत्यशोधयेत्॥तत्रो
नमंपवित्रंतुषष्यासहशतैस्त्रिभिः॥सप्तत्यासहितंद्वाभ्यांशताभ्यांम
ध्यमंस्मृतं॥साशीतिनाशतेनैवकनिष्ठंतत्समाचरेत्॥साधारणपवि

३७ त्राणित्रीणिसूत्रैःसमाचरेत्॥उत्तमंतुशतग्रंथिपंचाशद्ग्रंथिमध्यमं॥कनि
ष्ठंतुपवित्रंस्यात्षट्त्रिंशद्ग्रंथिशोभितं॥षड्विंशच्चतुर्विंशद्द्वादशेतिचकेचन॥
चतुर्विंशद्द्वादशाष्टावित्येकेमुनयोविदुरिति॥हेमाद्रेर्विष्णुरहस्ये॥कनिष्ठं
तंतुभिर्ज्ञेयंसप्तविंशतिभिःशुभं॥चतुःपंचाशताज्ञेयंतंतूनांमध्यमंपरं॥उ
त्तमंचैवतंतूनांशतमष्टोत्तरंस्मृतं॥॥श्रीवपवित्रंतुश्रीवागमे॥एकादशाभि
र्वसूत्रैस्त्रिंशतावाष्टयुक्तया॥पंचाशतावाकर्तव्यंतुल्यग्रंथ्यंतरालकं॥द्वाद
शांगुलमानानित्यासादष्टांगुलानिवा॥॥लिंगविस्तारमानानिचतुरंगुलि ३७

कानिचेति॥तत्रमंत्रः॥देवदेवनमस्तुभ्यंगृहाणेदंपवित्रकं॥पवित्रीकरणार्थं
यवर्षपूजाफलं॥पवित्रकंकुरुष्वाद्ययन्मयादुष्कृतंकृतं॥शुद्धोभवाम्यहंदेवत्व
त्प्रसादात्सुरेश्वरेतिमूलमंत्रः॥संपुटितेनानेनदद्यात्॥प्रार्थना॥मणिविद्रुम
मालाभिर्मंदारकुसुमादिभिः॥इयंसांवत्सरीपूजातवास्तुगरुडध्वज॥वनमा
लांयथादेवकौस्तुभंसततंहृदि॥पवित्रमस्तकेतद्वत्पूजांचहृदयेवहेति॥एतच्च
नित्यं॥तत्रैवानकरोतिविधानेनपवित्रारोपणंतुयः॥तस्यसांवत्सरीपूजानिष्फ
लामुनिसत्तम॥तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः॥वर्षेवर्षेविधात

कुरु

यंपवित्रारोपणंहरेरिति॥तथा॥पवित्रारोपणंकालेनकरोतिकथंचन॥तदा
युतंजपेन्मंत्रंस्तोत्रंवापिसमाहितइति॥ ॥श्रावणशुक्लचतुर्दश्यांपवित्रारोपणंपू
र्वविद्धायाह्या॥चैत्रशुक्लचतुर्दश्यांवत्॥अथोपाकर्म॥तच्चबह्वृचैःश्रावणेश्रव
णेकार्यं॥याजुषैःपौर्णमास्यां।सामगैःसिंहस्थेसूर्येहस्तनक्षत्रे।एषांखंडत्वे
औदयिकानियाह्याणि॥उदयेसंगवस्पर्शेश्रुतौपर्वणिचार्कभे॥कुर्युर्नभ
स्युपाकर्मऋग्यजुःसामगाःक्रमादितिपृथ्वीचंद्रोदयधृतवचनात्॥एषांग्रहण
संक्रांतिदुष्टत्वेबह्वृचैःश्रावणशुक्लपंचम्यांयजुर्वेदिभिर्भाद्रपद्यां॥येषांगृ ३८

ह्येआषाढीउक्तातेराषाढ्यांकार्यं॥वाजसनेयिभिस्तुपंचम्यां॥उपाकृतिस्तु
पंचम्यांकार्यावाजसनेयिभिरितिवचनात्॥वाजसनेयिग्रहणंयेषांगृह्योपंच
म्युक्तातेषामुपलक्षणं॥ग्रहसंक्रांतियोगश्चार्धरात्रात्पूर्वंविद्यमानएवदूषको
नान्यथा॥तथाचगार्ग्यः॥अर्धरात्रादधस्ताच्चेत्संक्रांतिर्ग्रहणंतथा॥उपाकर्म
नकुर्वंतपरतश्चेन्नदोषइति॥इदंचकर्कटस्थेभानोर्निषिद्धं॥सत्वनिषे
धोनर्मदोत्तरभागविषयः॥नर्मदोत्तरभागेतुकर्तव्यंसिंहयुक्तके॥कर्कटेसं
स्थितेभानावुपाकुर्यात्तुदक्षिणइतिवचनात्॥कथंतर्हिनर्मदोत्तरभागग

तानांत्रिष्टानांकर्कटस्थेरवावुपाकर्मानुष्ठानं॥अत्रकेचित्प्रस्यवचनद्वयस्यसामग
विषयत्वान्नद्यतिरिक्तानांकर्कटस्थेपिसूर्येनदोषइत्याहुः॥अन्येतुसामगविषयत्व
स्यायुक्त्वादेतस्यवचनद्वयस्यप्राच्यग्रंथेषुदाक्षिणात्यप्राचीननिबंधेषुचादृष्टत्वा
दनाकरत्वमाहुः॥एतच्चशुक्लास्तादावपिकार्यं॥प्रथमारंभस्तुतत्रनकर्तव्यः॥अधि
मासेनभवत्येव॥सामगानांतधिमासेभवति॥तेषांसिंहस्थेसूर्येविधानात्॥एतच्च
सामगेरपराह्णेकार्यं॥शुक्लपक्षेतुहस्तेनउपाकर्मापराह्णिकमितिगार्ग्यवचनात्॥
इतरैःपूर्वाह्णइत्याद्य न्यत्रमत्कृतोद्दष्टव्यं॥श्रावण्यामाश्वलायनेनश्रवणाकर्मो
क्तं॥श्रावण्यांपौर्णमास्यांश्रवणकर्मेति॥तत्रास्तमययुग्ग्राह्या॥अस्तमितेस्था

लीपाकंश्रपयित्वेतिअस्तमयकालेविधानात्॥कर्मणोयस्ययःकालइतिवचना
त्॥याज्ञिकास्तुपौर्णमासीशब्दस्यपर्वसक्षणवचनत्वात्सर्वसंधिदिवसेरात्रौश्रव
णाकर्मानुष्ठानंवदंति॥अत्रैवरक्षाबंधनमुक्तंभविष्योत्तरे॥ततोऽपराह्णसमयेकु
र्यात्पोटलिकांशुभां॥कारयेच्चाक्षतैस्तद्वत्सिद्धार्थैर्हेमचर्चितां॥तत्रमंत्रः॥येनब
द्धोबलीराजादानवेंद्रोमहाबलः॥तेनत्वामभिबध्नामिरक्षेमाचलमाचलेति॥
अत्रापराह्णव्यापिनीग्राह्या॥उभयत्रतद्व्याप्तौपूर्वाग्राह्या॥श्रावणीदुर्गनव
मीदर्वीचेबहुनात्रनी॥पूर्वविद्धैवकर्तव्याशिवरात्रिर्बलेर्दिनमितिदृढद्यमवच
नात्॥अस्मादेवविशेषवचनादन्येष्वपिउपाकर्मव्यतिरिक्तेषुपवित्रारोपणादि

षुपूर्वैवग्राह्या॥पूर्वस्यांभद्रासत्वेतुउत्तरस्यामेवरक्षाबंधनं॥भद्रायांह्येनकर्तव्ये
श्रावणीफाल्गुनीतथा॥श्रावणीनृपतिंहंतिग्रामंदहतिफाल्गुनीतिवचनात्॥अद्भु
तसागरेनारदः॥भानोःसिंहगतेचैवयस्यगोःसंप्रसूयते॥मरणंतस्यनिर्दिष्टंषड्भि
र्मासैर्नसंशयः॥तत्रशांतिंप्रवक्ष्यामियेनसंपद्यतेशुभं॥प्रसूतातक्षणादेवतांगां
विप्रायदापयेत्॥ततोहोमंप्रकुर्वीतघृताक्तैराज्यसर्षपैः॥आहुतीनांघृताक्तानाम
युतंजुहुयात्ततः॥व्याहृतिभिश्चायंहोमः॥सोपवासःप्रयत्नेनदद्याद्विप्रायदक्षि
णामिति॥अथर्ववेदिनांग्रह्यपरिशिष्टे॥माघेबुधेचमहिषीश्रावणेवडवादिव॥ ४०

सिंहेगावःप्रसूयंतेस्वामिनोमृत्युदायकाइति॥अत्रतंत्रोक्ताःमृताशांतिःका
र्या॥ ॥इतिश्रावणकृत्यानि॥ ॥अथभाद्रपदकृत्यानि॥ ॥भाद्रपदकृष्णच
तुर्थ्यांसंकष्टचतुर्थीव्रतंस्कांदे॥श्रावणेबहुलेपक्षेचतुर्थ्यांतुविधूदये॥गणेशं
पूजयित्वातुचंद्रायार्घ्यंचदीयतइति॥श्रावणेत्रामांतमासेनग्राह्यः॥शुक्लादिमे व्रते
वचेतिवचनात्॥इयंचंद्रोदययोगिनीग्राह्या॥तत्कालेचंद्रार्घ्यदानविधानेनचं
द्रोदयव्रतत्वाच्चंद्रोदयव्रतेचैवतिथिस्तात्कालिकीस्मृतेतिवचनात्॥दिनद्वयेचं
द्रोदयसत्वेऽसत्वेचपूर्वाग्राह्या॥चतुर्थीचतुर्दशीयायांमहापुण्यफलप्रदा॥क

र्तव्याव्रतिभिर्वत्सगणनाथसुतोषिणीतिब्रह्मवैवर्तात्॥गणेशागौरीबहुला
व्यतिरिक्ताःप्रकीर्तिताः॥चतुर्थ्यःपंचमीविद्धादेवतांतरयोगतइतिवचनात्॥
नचतृतीयाविद्धाविधायकानिवचनानिदिवात्रिमुहूर्तवेधेसत्येवप्रवर्तंते
नरात्रियोगमात्रइतिवाच्यं॥रात्रिसाध्यकर्मसुरात्रावपिवेधस्यजन्माष्टमी
प्रकरणेमाधवादिभिर्दर्शितत्वात्॥अतएवमहालक्ष्मीव्रतसमापनेदि
नद्वयेऽष्टम्याश्चंद्रोदयकालव्यापित्वे।कृष्णपक्षेष्टमीचैवकृष्णपक्षेचतुर्द
शी॥पूर्वविद्धैवकर्तव्यापरविद्धानकुत्रचिदितिवचनात्पूर्वविद्धाग्राह्येयुक्तं ४१

हेमाद्रौमदनरत्नेच॥यानितुचतुर्थ्यंगणनाथस्यमात्रविद्धाप्रशस्यते॥मध्या
ह्नव्यापिनीसातुपरतश्चेत्परेह्नीत्यादीनिवचनानितानिसिद्धिविनायकादित्र
तविषयाणितेषुमध्याह्नस्यकर्मकालत्वात्॥प्रातःशुक्लतिलैःस्नात्वामध्याह्नेपू
जयेन्नृपेतिवचनात्॥अतएवमाधवेनमध्याह्नस्यकर्मकालत्वमंगीकृत्यै
वविनायकव्रतेमध्याह्नव्यापिनीग्राह्येत्युक्तं।तस्मादुभयत्रचंद्रोदयकाले
सत्येऽसत्येवापूर्वेवेतिन्याय्यःपंथाइत्यलंबहुना॥ ॥भाद्रपदकृष्णपंचमी
मानवकल्पादिः॥ ॥अथजन्माष्टमी॥ ॥साचामांतमासेनश्रावणकृष्णा

ष्टमीपूर्णिमांतमासपक्षेभाद्रपदकृष्णाष्टमी॥शुद्धविद्धभेदेनद्विधाप्य
ष्टमीप्रत्येकंद्विधा॥द्वितीयदिनेसूर्योदयोत्तरंसप्तमीच॥तादृश्यपिपुनः
प्रत्येकंद्विधा॥रोहिणीसहितातद्रहिताच॥तत्रशुद्धायांविद्धायांवाद्वितीं
यदिनेसूर्योदयादूर्ध्वमसत्यांविवादएवनास्तिद्वितीयदिनेऽष्टम्यभावात्॥
शुद्धाधिकायांविद्धाधिकायांवादिनद्वयेऽप्यर्धरात्रंविहायरोहिणीयोगेस
प्तमीविद्धानिषेधान्नवमीयुक्तायाःप्राशस्त्यादुत्तराग्राह्या॥यदात्वेकस्मि
न्नेवदिनेऽर्धरात्रेरोहिणीयोगस्तदासैवग्राह्या॥अर्धरात्रेतुयोगोयंनाराय ४२

युदयेतथा॥नियतात्माशुचिःस्नातःपूजांतत्रप्रवर्तयेदितिविष्णुधर्मोत्त
रात्॥दिनद्वयेऽप्यर्धरात्रेरोहिणीयुक्तापरेव॥सऋक्षापिनकर्तव्यासप्तमी
संयुताष्टमीतिवचनेनसप्तमीविद्धायानिषेधात्॥दिनद्वयेपिरोहिणीयोगा
भावेऽर्धरात्रव्यापिनीग्राह्या॥अर्धरात्रस्यकर्मकालत्वात्॥दिवावायदिवा
रात्रौनास्तिचेद्रोहिणीकला॥रात्रियुक्तांप्रकुर्वंतविशेषेणेंदुसंयुतामिति
वचनाच्चदिनद्वयेप्यर्धरात्रेसत्वेऽसत्वेवापरा॥सप्तमीविद्धायानिषेधात्॥
इदं चनित्यं॥वर्षेवर्षेचकर्तव्यंतुष्ट्यर्थंचक्रपाणिन इतिवीप्साश्रवणात्॥

अकुर्वन्नरकंयातियावदिंद्राश्चतुर्दशेत्यकरणप्रत्यवायश्रवणा च्च॥का
म्यंचेदं फलस्यश्रवणात्॥तथाचस्कांदे॥सिध्यंतिसर्वकार्याणिकृतेजन्माष्टमी
व्रतेइति॥यत्तुकैश्चिदुपवासस्यांगत्वमुक्तंतदयुक्तं॥उपवासस्तुतत्रोक्तोमहा
पातकनाशनइतिवह्निपुराणात्॥उपोष्यासाप्रयत्नतइतितत्रैवोक्तेश्च॥विष्णु
रहस्येपिमुहूर्तमपिलभ्येतसोपोष्यासामहाफलेति॥उपवासाकरणेदोषश्रव
णात्॥तथाचस्कंदपुराणे॥शूद्रान्नेनतुयस्तापंशवहस्तस्यभोजने॥तस्यापंल
भ्यतेपुंभिर्जयंत्यांभोजनेकृतेइति॥शवहस्तस्यभोजनेशवस्तूतकिहस्तस्य ४३

भोजनइत्यर्थः॥तथागृध्रमांसंखरंकाकंश्वेनंवामुनिसत्तम॥मांसंवाद्विप
दांभुंक्तेकृष्णजन्माष्टमीदिनेइति॥तथा॥कृष्णाष्टमीदिनेप्राप्तेयेनभुक्तंद्विजो
त्तम॥त्रैलोक्यसंभवंपापंतेनभुक्तंनसंशयं॥ब्रह्मघ्नस्यसुरापस्यगोवधेस्त्री
वधेपिवा॥नलोकोमुनिशार्दूलजयंतीविमुखस्यवा॥जयंतीवासरेप्राप्तेकरोत्यु
दरपूरणं॥खंडयतेतिलमात्रंतुयमदूतैःकलेवरमिति॥नहिक्वचिदंगाकरणेप्र
त्यवायःश्रूयते॥एकप्रयोगत्वंचजन्माष्टमीव्रतस्याब्देनोभयोरेकफलोद्देशे
नविधानादेकसंकल्पविषयत्वाच्चाविहनमेव॥पारणंतुकेवलाष्टम्युपवासे

दिवातिथ्यंतलाभेदिवैवतिथ्यंतेकर्तव्यं॥रोहिणीयुक्ताष्टम्युपवासेतद्भयं
तेकर्तव्यमितिमुख्यःकल्पः॥अन्यतरांतेगौणः॥यदिरात्रावुभयोरन्यत
रेवांतस्तदारात्रावपिपारणंकार्यं॥नरात्रौपारणंकुर्याद्यतेवैरोहिणीव्रता
त्॥तत्रनिश्चयपितकुर्याद्भर्जयित्वामहानिशामितिवचनात्॥अस्यत्रैकेनतु
जागरांतेप्रातरेवपारणंकार्यं॥तिथ्यंतेचोत्सवांतेवाव्रतीकुर्वीतपारणामि
तिकालादर्शोदाहृतवचनात्॥ ॥अथसंक्षेपतोव्रतानुष्ठानप्रकारः॥प्रातः
स्नातनित्यक्रियःसूर्यादिदेवताभ्योव्रतंनिवेद्याचम्यप्राणानायम्योदङ्मु ४४

खोवारिपूर्णेताम्रपात्रंगृहीत्वामासायुल्लिख्यामुकफलकामःपापक्षयकामो
वाजन्माष्टमीव्रतमहंकरिष्येइति॥तथा॥वासुदेवंसंमुद्दिश्यसर्वपापप्रशांतये॥
उपवासंकरिष्यामिकृष्णाष्टम्यांनभस्यहं॥अथकृष्णाष्टमीदेवीनभश्चंद्रसरो
हिणी॥अर्चयित्वोपवासेनभोक्ष्येहमपरेहनि॥एनसोमोक्षकामोस्मियद्भोवि
दत्रियोनिजं॥तन्मेमुंचतुमांत्राहिपतितंशोकसागरे॥आजन्ममरणंयावद्यन्म
यादुष्कृतंकृतं॥तत्सर्वंक्षयगोविंदप्रसीदपुरुषोत्तमेति पठित्वा जलमुत्सृजेत्
ततोमध्याह्नेतिलैःस्नात्वार्धरात्रेपूर्ववदर्घसपरीवारश्रीकृष्णपूजांकरिष्येइतिसंक
ल्यसमीपप्रसुप्तस्तनपायिश्रीकृष्णप्रतिमोपेतांलक्ष्म्यादेवक्याश्चरणोसंवाहयं

स्याचोपेतांदेवकीप्रतिमांप्रसुप्तांमंचकोपरिस्थापयेत्॥तथातत्रैवप्रसूतवरकन्य
कयशोदाप्रतिमांचस्थापयेत्॥प्रतिमापूजनंचप्राणप्रतिष्ठापूर्वंकर्तव्यं॥प्रतिमायाः
कपोलोद्वोस्पृष्ट्वादक्षिणपाणिना॥प्राणप्रतिष्ठांकुर्वंततस्यादेवस्यवाहरेः॥अ
रुतायांप्रतिष्ठायांप्राणानांप्रतिमासुच॥यथापूर्वंतथाभावःस्वर्णादीनांनदेव
ता॥अन्येषामपिदेवानांप्रतिमास्वपिपार्थिव॥प्राणप्रतिष्ठाकर्तव्यातस्यांदे
वत्वसिद्धये॥वासुदेवस्यबीजेनतद्विन्योरित्यनेनच॥तथैवहृदयंगुह्यंदत्वान्या
श्चमंत्रवित्॥एभिर्मंत्रैःप्रतिष्ठांतुहृदयेपिसमाचरेत्॥अस्यैप्राणाःप्रतिष्ठ
न्तुअस्यैप्राणाःक्षरंतुच॥अस्यैदेवत्वसंरयायैस्वाहेतियजुरीरयन्॥अंगमं ४५

त्रैरंगिमंत्रैर्वैदिकैरित्यनेनच॥प्राणप्रतिष्ठांसर्वत्रप्रतिमासुसमाचरेदिति॥
कालिकापुराणात्॥बीजेनमूलमंत्रेण।इदंचप्रकृतविष्ण्वग्निप्रायेण।यदास्व
हृदयेपूजाक्रियतेतदाहृदयेगुह्यंदत्वामंत्राःपठनीयाः॥प्रतिमायांतुकपोलोस्पृ
ष्ट्वेतिविशेषः॥तेनात्रापिप्रतिप्रतिमांकपोलोस्पृष्ट्वातत्तद्देवतानांमूलमंत्रान्वै
दिकमंत्रांस्तदभावेप्रणवादिचतुर्थ्यंतनमोंतनामानिअस्माइत्यस्यस्थाने
तत्तद्देवतानामयुक्तमस्माइत्यादिस्वाहांतंचमंत्रंपठन्प्राणप्रतिष्ठांकुर्यात्॥त
थातत्रैवपीठाद्युपरिदेवकीसहितंवसुदेवंयशोदासहितंनंदंश्रीकृष्णसहितं

बलदेवंचंडिकांचप्रतिमासुपूजयेत्॥तत्रादौ॥गायद्भिःकिंनरादौःसततपरिवृ
तावेणुवीणानिनादैःशृंगारादर्शकुंतप्रवरशुतकरैःकिंकरैःसेव्यमानापर्यंके
स्वास्तृतेयामुदिततरमुखीपुत्रिणीसम्यगास्तेसादेवीदेवमाताजयतिसुवद
नादेवकीदेवरूपेतिदेवकींध्यात्वा॥मांचापिबालकंसुप्तंपर्यंकेस्तनपायिनं॥
श्रीवत्सवक्षसंशांतंनीलोत्पलदलछविमितिश्रीवृक्षंचध्यात्वादेवक्येनमः
ॐवासुदेवायनमःॐनमोदेव्यैश्रियेइतिदेवक्यादीन्मंचकोपरिॐदेवक्ये
नमःॐवसुदेवाय॰ॐयशोदायै॰ॐनंदाय॰ॐवासुदेवाय॰ॐबलदेवाय॰

ॐचंडिकायै॰इतिपीठांतरस्थान्देवक्यादींश्चषोडशोपचारैःपूजयेत्॥के
षुचिदुपचारेषुमंत्राःभविष्योत्तरे॥योगेश्वरायदेवाययोगानांपतयेविभो॥
योगोद्भवायनित्यायगोविंदायनमोनमः॥स्नानं॥यज्ञेश्वरायदेवायतथायज्ञो
द्भवायच॥यज्ञानांपतयेनाथगोविंदायन॰धूपादौ॥विश्वेश्वरायविश्वायत
थाविश्वोद्भवायच॥विश्वस्यपतयेतुभ्यंगोविंदाय॰इतिनैवेद्यं॥गारुडेतु॥यज्ञा
ययज्ञेश्वरायायज्ञपतयेयज्ञसंभवायगोविंदायनमोनमइत्यर्थः॥धर्मायध
र्मेश्वरायधर्मपतयेधर्मसंभवायगोविंदायनमोनमइतिस्वाहांतोघृताक्त

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

तिलहोमे॥सोमायसोमेश्वरायसोमपतयेसोमसंभवायसोमायनमो
नमश्इतिचंद्रपूजायांमंत्राउक्ताः॥ततोगव्यघृतेनाग्नौवसोर्धारांकार्या॥
क्वचिद्गुडघृतेनेति॥ततोजातकर्मनालछेदनंषष्ठीपूजनंनामकर्मचसं
क्षेपेणकार्यं॥ततश्चंद्रोदयेरोहिणीयुतंचंद्रंप्रतिमादौसंपूज्य॥शंखेतोयं
समादायसपुष्पकुशचंदनं॥जानुभ्यांधरणींगत्वाचंद्रायार्घ्यंनिवेदये
त्॥क्षीरोदार्णवसंभूतअत्रिगोत्रसमुद्भव॥गृहाणार्घ्यंशशांकेमंरोहि
ण्यासहितोममेतिमंत्रेण॥ततोज्योत्स्नायाःपतयेतुभ्यंज्योतिषांपतये ४७

नमः॥नमस्तेरोहिणीकांतसुधावासनमोस्तुते॥नक्षत्रमंडलदीप्यश्रिरोर
त्नायधूर्जटेः॥कलाभिर्वर्धमानायनमश्चंद्रायचारवइतिमंत्राभ्यांप्रणा
मेत्॥ततः॥अनघंवामनंशौरिंवैकुंठंपुरुषोत्तमं॥वासुदेवंहृषीकेशंमाध
वंमधुसूदनं॥वाराहंपुंडरीकाक्षंनृसिंहंदैत्यसूदनं॥दामोदरंपद्मनाभंके
शवंगरुडध्वजं॥गोविंदमच्युतंकृष्णमनंतमपराजितं॥अधोक्षजंजगद्यो
निंसर्गस्थित्यंतकारिणं॥अनादिनिधनंविष्णुंत्रिलोकेशंत्रिविक्रमं॥नारा
यणंचतुर्बाहुंशंखचक्रगदाधरं॥पीतांबरधरंनित्यंवनमालाविभूषितं॥

श्रीवत्सांकंजगत्सेतुंश्रीरुक्मंश्रीधरंहरिं।प्रपद्येहंसदादेवंसर्वकामप्रसिद्धये।
प्रणमामिसदादेवंवासुदेवंजगत्पतिमितिमंत्रेर्नामकीर्तनपूर्वकंप्रणम्य॥
त्राहिमांसर्वलोकेशहरेसंसारसागरात्।त्राहिमांसर्वपापघ्नदुःखशोकार्ण
वात्प्रभो।सर्वलोकेश्वरत्राहिपतितंचभवार्णवे।देवकीनंदनश्रीशहरेसंसा
रसागरात्।त्राहिमांसर्वदुःखघ्नरोगशोकार्णवाद्धरे।दुर्गतांस्त्रायसेविश्वो
स्मरंतिसकृत्सकृत्।सोहंदेवातिदुर्दैवत्रस्त्राहिमांशोकसागरात्।पुष्करा क्ष
निमग्नोहंमायाविज्ञानसागरे।त्राहिमांदेवदेवेशत्वन्नोनान्योस्तिरक्षिता॥ ४८

यद्बाल्येयच्चकोमारेयौवनेयच्चवार्धके।तत्सुएयंरद्धिमाप्नोतुपापंहनहलायु
धेतिमंत्रैःप्रार्थयेत्।ततःस्त्रोत्रपुराणपठनादिभिःरात्रिंनयेत्।एवमतिवाह्यपर
दिनेप्रातःस्नानादिनित्यकृत्यंविधायपुनःसपरिवारंश्रीरुक्मंयथासंभवंस
पूज्यचंडिकायाश्चयथाविभवंमहोत्सवंकृत्वायथाशक्तिब्राह्मणान्भोज
यित्वातेभ्यःसुवर्णमेदिनीधेनुवस्त्रादियद्यदिष्टंतत्तल्लोकमेप्रीयतामितिदत्वा।
यंदेवंदेवकीदेवीवसुदेवाइजीजनत्।भोमस्यब्रह्मणोगुप्त्येतस्मैब्रह्मात्मने
नमः।सुजन्मवासुदेवायगोब्राह्मणहितायच।शांतिरस्तुशिवंचास्तियु

क्काब्राह्मणान्विसृज्यइष्टैःसहस्वयंपारणंकुर्यादिति॥ ॥इयंमन्वादिः॥ ॥भा
द्रपदामावास्यायांकुशग्रहणमुक्तंमदनरत्नेमरीचेन।मासेनभस्यमावास्या
तस्यांदर्भोच्चयोमतः।अयातयामास्तेज्ञेयाविनियोज्याःपुनःपुनरितिनभ
स्यमावास्येतिपाठोऽमांतमासेन॥भाद्रपदशुक्लतृतीयायांहरितालिकाव्र
तं॥तत्रसामुहूर्तमात्रापिपरा।रंभाख्यांवर्जयित्वातुतृतीयांद्विजसत्तम।अ
न्येषुसर्वकार्येषुगणैर्युक्ताप्रशस्यतेतिब्रह्मवैवर्तात्।द्वितीयायातुयाविद्धा
तृतीयानकदाचन।कर्तव्याव्रतिभिस्नातधर्मकामार्थतत्परैः।विहायैकांतु ४९

रंभाख्यांतृतीयांपुण्यवर्द्धनीमितिस्कांदेद्वितीयाविद्धायानिषेधाच्चनिषेधप्र
योजकश्चात्रद्वितीयावेधोनत्रिमुहूर्तः।किंतुकलाकाष्ठादिरूपोपि।तदुक्तंस्कां
दे।कलाकाष्ठापिवाचैवद्वितीयासंप्रदृश्यते।सातृतीयानकर्तव्याकर्तव्यागणसं
युतेति।अतएवस्वल्पापितृतीयाचतुर्थ्यायुताएकादशीवद्ग्राह्या।अयंचात्यवे
धप्रयुक्तोनिषेधोगौरीव्रतविषयः।विहायैकांतुरंभाख्यामितिपर्युदासेनतत्स
दृशानामेवव्रतांतराणांप्रतीतेः।नचैवयुक्तमयंसदृशार्थइतिन्यायात्।तथैव
शिष्टसमाचाराच्चेति।इयंमन्वादिः॥ ॥भाद्रपदशुक्लचतुर्थ्यांसिद्धिविनायकव्र

तमुक्तंस्कंदपुराणे॥स्कंदउवाच॥ ॥गजवक्त्रंतुशुक्लायांचतुर्थ्यांतुप्रपूजयेत्॥
यदावोत्सद्यतेभक्तिस्तदापूज्योगणाधिपः॥प्रातःशुक्लतिलैःस्नात्वासमध्याह्ने
पूजयेन्नृप॥स्वशक्त्यागणनाथस्यस्वर्णरूप्यामथाकृतिं॥अथवामृन्मयींकुर्या
द्विघ्नशांत्यैनकारयेत्॥गणनाथस्यसिद्धिविनायकस्य॥तत्स्वरूपमुक्तंतत्रैव॥ए
कदंतंशूर्पकर्णंगजवक्त्रंचतुर्भुजं॥पाशांकुशधरंदेवंध्यायेत्सिद्धिविनायकमि
ति॥कृत्वापूजांप्रयत्नेनस्नाप्यपंचामृतैःपृथक्॥गणाध्यक्षेतिनाम्नावैगंधंदद्या
च्चभक्तितः॥विनायकेतिपुष्पाणिधूपंचोमासुतेतिच॥दीपंरुद्रप्रियायेतिनै ५०

वेद्यंविघ्ननाशिने॥वस्त्रंसर्वप्रदेरक्तंयुग्मंदद्यात्सुभावितः॥ततोदूर्वांकुरान्गृह्य
विंशतिंचैकमेवच॥पूजनीयःप्रयत्नेनएभिर्नामपदैःपृथक्॥तानिवक्ष्यंते॥दूर्वा
युग्मं गृहीत्वातुगंधयुक्तंप्रपूजयेत्॥एकैकेनतुनाम्नावैदलैकंसर्वनामभिः॥
तथैकविंशतिंगृह्यमोदकान्घृतपाचितान्॥स्थापयित्वागणाध्यक्षसमीपेकु
रुनंदन॥दद्याद्विप्रायदातव्याःस्वयंचाद्यात्तथादृशा॥एकंगणाधिपेदद्यात्स
वेद्यान्नृपोत्तम॥विप्रायभोजनंदद्याद्भुंजीयात्तैलवर्जितमिति॥अथसंक्षेपेण
प्रयोगः॥प्रातःकृतनित्यक्रियःशुक्लतिलैःस्नात्वासूर्यादिदेवताभ्योव्रतंनि

वेद्याचम्यप्राणानायम्योदङ्मुखोवारिपूर्णंताम्रपात्रंगृहीत्वामासाद्यु
ल्लिख्यममसर्वकर्मनिर्विघ्नसिद्धिपुत्रसौभाग्यादिसिद्धिद्वारास्त्रीसिद्धि
विनायकप्रीत्यर्थंसिद्धिविनायकव्रतंकरिष्येइतिसंकल्प्यप्रतिमायांप्रा
णप्रतिष्ठांकृत्वाॐसिद्धिविनायकायनमइतिआवाहनाद्याचमनदानां
तंकृत्वापंचामृतैःपृथक्संस्नाप्यशुद्धोदकेनसंस्नाप्याचमनीयंदत्त्वा।
ॐगणाध्यक्षायनमइतिगंधंॐविनायकायनमइतिपुष्पाणिॐ
उमासुताय॰धूपंॐरुद्रप्रियाय॰दीपंॐविघ्ननाशिने॰एकमोदकस ५१

हितनैवेद्यं॰ॐसर्वप्रदेनमइतिरक्तवस्त्रयुग्मंदद्यात्।ततएकविंशतिदूर्वाः
सगंधागृहीत्वाएकैकेननाम्नादूर्वायुग्मंदद्यात्।तद्यथाॐगणाधिपाय
दूर्वायुग्मंसमर्पयामि।ॐउमापुत्राय॰ॐअघनाशनाय॰ॐविनायकाय॰
ॐईशपुत्राय॰ॐसर्वसिद्धिप्रदायकाय॰ॐएकदंताय॰ॐइभवक्त्राय॰ॐ
मूषकवाहन नाय॰ॐकुमारगुरवे॰।ततोवशिष्टामेकांगणाधिपेत्यादिना
मभिःसमर्प्यविंशतिमोदकान्गणेशाग्रेसंस्थाप्यदक्षाब्राह्मणायसदक्षि
णान्दत्त्वाब्राह्मणायभोजनंदत्त्वास्वयंदशमोदकसहितमतैलपक्वमन्नंभुंजी
तेति॥अत्रचतुर्थ्यमध्याह्नव्यापिनीग्राह्या।प्रातःशुक्लतिलैःस्नात्वामध्याह्ने

पूजयेन्नृपेतिस्कंदपुराणेमध्याह्नस्यकर्मकालत्वाभिधानात्। चतुर्थ्यागणनाथस्यमातृविद्धाप्रशस्यते।मध्याह्नव्यापिनीसातुपरतश्चेत्परेह्नीतिवचनाच्च।अत्रपरतश्चेदितिपरदिनएवमध्याह्नव्यापित्वेपरा।अन्यथासर्वपक्षेषुपूर्वा।मातृयोगस्यप्रशस्तत्वात्।यत्तुवैष्ण्येणमध्याह्नव्याप्तिस्तदाअधिकैकदेशयोगिनीग्राह्या।अस्यांचंद्रदर्शनंनकार्यं।तथाचमार्कंडेयः।सिंहादित्येशुक्लपक्षेचतुर्थ्यांचंद्रदर्शनं।मिथ्याभिदूषणंकुर्यात्तस्मात्तत्परिवर्जयेन्नतंसदेति।पराशरः।कन्यादित्येचतुर्थ्यांतुशुक्लेचंद्रस्यदर्शनंमि ५२

थ्याभिदूषणंकुर्यात्तस्मात्तत्परिवर्जयेन्नतंसदेति।दोषस्यशांतयेसिंहःप्रसेनमितिवेपठेत्।अत्रसिंहादित्यकन्यादित्यशब्दाभ्यांचांद्रोभाद्रपदउपलक्ष्यते।। श्लोकस्तुविष्णुपुराणे।सिंहःप्रसेनमवधीत्सिंहोजांबवताहतः।सुकुमारकिमारोदीस्तवह्येषस्यमंतक इति।तिथितत्त्वे।पंचाननगतेभानौपक्षयोरुभयोरपि।चतुर्थ्यांनेक्षणीयइतिसंबंधः।सिंहःप्रसेनमितिमंत्रेणाभिमंत्रितंजलंपेयंस्यमंतकोपाख्यानंचश्रोतव्यमाचारादितिस्मार्तः।अथास्यामेवभाद्रविष्योक्तंकृत्यं।माघेभाद्रपदेशुक्लाशिवलोकेप्रपूजिता।चतुर्थ्यनुषंगः।

तस्यांस्नानंतथादानमुपवासोर्चनंतथा।क्रियमाणंशतगुणंप्रसादाद्देवितोन्नृपेति॥ ॥भाद्रपदशुक्लपंचम्यांऋषिपंचमीव्रतं।ब्रह्मांडपुराणे।नभस्येशुक्लपक्षेतुयदाभवतिपंचमी।नद्यादिषुतदास्नानंकृत्वानियममेवच।विधायनित्यकर्मादिगत्वाद्वारवतीमृषीन्।स्नापयेद्विधिवद्भक्त्यापंचामृतरसैःशुभैः।द्वारवतीमग्निहोत्रशालांधूमनिर्गमद्वारैर्बहुभिर्युतत्वात्।चंदनागरुकर्पूरैर्विलिप्यचसुगंधिभिः।पूजयेद्विविधैःपुष्पैर्गंधधूपादिदीपकैः॥ समाछाद्यशुभैर्वस्त्रैःसोपवीतै र्यथाविधि ।ततोनैवेद्यसंपन्नमर्घ्यंदद्या ५३

शुभैःफलैः।अर्घ्यमंत्रः।कश्यपोत्रिर्भरद्वाजोविश्वामित्रोथगोतमः।जमदग्निर्वसिष्ठश्चसप्तैतेऋषयःस्मृताः।गृह्णीतार्घ्यमयादत्तंतुष्टाभवतसर्वदेति।ब्रह्मपुराणे।अकृष्टपृथ्वीसंजातंशाकाहारंप्रकल्पयेत्।शयीतब्रह्मचर्येणऋषीन्ध्यात्वासमाहितः।अनेनविधिनासम्यग्वर्षाणिव्रतमाचरेदिति। अत्रब्राह्मणादीनांसर्वासामधिकारः।ब्राह्मणीक्षत्रियावैश्याशूद्रावापिवरयारानन इतिब्रह्मपुराणात्।इयंमध्याह्नव्यापिनीग्राह्या।पूजाव्रतेषुसर्वेषुमध्याह्नव्यापिनीतिथिरितिमाधवोदाहृतवचनात्।मनुष्यदेवसत्वाच्च।

मध्याह्नव्यापित्वेननिर्णयासंभवेपूर्वविद्धाग्राह्या।षण्मुन्योरितियुग्मवा
क्यात्॥॥भाद्रशुक्लषष्ठीप्राणकल्पादिः।अस्यामेवषष्ठ्यांभौमवि शाखा
वैधृतियोगेचंपाषष्ठीव्रतमुक्तंस्कांदे।षष्ठीभाद्रपदेशुक्लावैधृत्यासमन्वि च
ता।विशाखाभौमयोगेनसाचंपेतीहविश्रुता।देवासुरमनुष्याणांदुर्लभाष
ष्टिहायनी।कृतेत्रेतायांपंचाब्दायनी द्वापरेपुनः।चत्वारिंशत्कलौत्रिंशद्वा
यनीदुर्लभाततइत्यादिना पंचम्यामेकभक्तपूर्वकंषष्ठ्यामुपवासोरथेसू ५४
र्यपूजाद्वादशदले।आदित्यस्तपनःपूषाभानुमान्भानुरर्यमा।विश्वश्चक्रो

श्रुमान्देवःसहस्रांशुःखनायकः।सूरःसूर्यःखगइतिनामभिः।अत्रादित्य
इत्यनेनकर्णिकायांपूजा।इतरेद्वादशदलेषुपूर्वादिक्रमेण।ततःसप्तम्यां
तिलहोमःसावित्र्याततोधेनुदानमितिक्रमइतिमदनरत्ने।भाद्रपदशुक्ल
सप्तम्यामामुक्ताभरणव्रतं।तद्रसप्तमीपूर्वविद्धाग्राह्या।भाद्रशुक्लाष्टम्यांदू
र्वाव्रतं।साचपूर्वविद्धाग्राह्या।श्रावणीदुर्गनवमीतिपूर्वलिखितद्वैधम
वचनात्।शुक्लाष्टमीतिथिर्यातुमासिभाद्रपदेभवेत्।दूर्वाष्टमीतुसाज्ञेया
नोत्तरासाविधीयतइतिहेमाद्युदाहृतपुराणसमुच्चयवचनेऽत्तरविद्धा

निषेधाच्च। इदं च दूर्वाव्रतं ज्येष्ठामूलरहितायां सिंहस्थेसूर्येऽगस्त्योऽनुदिते मध्याह्नव्यापिन्यां कर्तव्यं। शुक्लभाद्रपदे मासि दूर्वा संज्ञा तु याष्टमी। सिंहार्केण व कर्तव्या नकन्यार्केकदाचन। सिंहस्थेसोत्तमा सूर्येऽनुदितेमुनिसत्तमे तिस्कांक्षता। अगस्त्यउदितेतातपूजयेदमतोद्भवां। वेधव्यंपुत्रशोकंचदशवर्षाणिपंचचेतितत्रैवदोषविधानाच्च। हेमाद्रौलोगाक्षिरपि। उद्यानिकाश्रिवपवित्रकमेघपूजादूर्वाष्टमीफलविरूढकजागराणिस्त्रीणांव्रतानिनिरिवलान्यपिवार्षिकाणिकुर्यादगस्त्यउदितेनशुभानिलिप्सुरि ति। मुहूर्तेरो

द्दिणोऽष्टम्यांपूर्वविद्धायदिवापरा। दूर्वाष्टमीतुसाकार्याज्येष्ठांमूलंचवर्जयेदिति पुराणसमुच्चयवचनाच्च। तथाचेंद्रेणैपूजितादूर्वाहंसपसानिनाम्यथा। भर्तुरायुर्हरामूलेतस्मात्तांपरिवर्जयेदितिनिषेधाच्च। इदंस्त्रीणांनित्यं। यानपूजयतेदूर्वांमोहादिहयथाविधि। त्रीणिजन्मानिवैधव्यंलभतेनात्रसंशयः। तस्मात्संपूजनीयासाप्रतिवर्षंवधूजनैः। सुखसंतानजननीभर्तुःसौख्यकरीसदेतिपुराणसमुच्चयोक्तेः। तेनपूर्वस्यांज्येष्ठामूलान्यनस्योगेउत्तरापितद्रहिताकर्मकालस्पर्शिनी दूर्वाव्रतेग्राह्यानित्यत्वाच्च।

यस्मिन्वर्षेज्येष्ठामूलयोगरहितायाअलाभस्तत्राप्यनुकल्पेनानुष्ठानं
नतुसर्वथात्यागः।अनुकल्पश्चकर्तव्यालेकभुक्तेनज्येष्ठामूलंयदाभवेत्।
दूर्वाभिश्चर्चयेद्भक्त्यानवंध्यंदिवसंनयेदितितत्रैवोक्तेः।ज्येष्ठामूलग्रह
णंनिषिद्धकालमात्रोपलक्षणंतत्राप्यपेक्षासत्यात्।अत्रकर्तव्यमुक्तंमद
नरत्नेभविष्ये।शुचौदेशेप्रजातायांदूर्वायांब्राह्मणोत्तमः।स्थाप्यलिंगंततो
गंधैःपुष्पैर्धूपैःसमर्चयेत्।दध्यक्षतैर्द्विजश्रेष्ठअर्घ्यंदद्यात्त्रिलोचने।दू
र्वाग्रामीत्यांविधिवत्पूजयेच्छ्रद्धयान्वितः।मंत्रस्तु।त्वंदूर्वेऽमृतजन्मासिवं ५६

दितासिसुरासुरैः।सौभाग्यंसंततिंदेहिसर्वकार्यकरीभव।यथाशाखाप्रशा
खाभिर्विस्तृतासिमहीतले।तथाममापिसंतानंदेहित्वमजरामरमिति।अ
त्रानग्निपक्वंभक्षयेत्।अनग्निपक्वमश्नीयादन्नंदधिफलंतथा।अक्षारल
वणंब्रह्मन्नश्नीयान्मधुनान्वितमिति।अत्रनिषिद्धयोगाभावेस्त्रीभिःस्वयं
दूर्वासंपूज्यानग्निपक्वभक्षणंकार्यं।तद्योगेब्राह्मणद्वारापूजांकारयित्वाए क
भक्तंकार्यमिति।अस्यामेवज्येष्ठापूजाकार्या।कन्यास्थार्कोष्टमीशुक्लाज्येष्ठ
र्क्षमहतीस्मृता।अलक्ष्मीपरिहारायज्येष्ठांतत्रप्रपूजयेत्इतिलिंगपुराणा
त्।अत्रकन्यास्थार्कयोगेनप्राशस्त्यमात्रं।मासस्तुभाद्रपदश्चांद्रएव।अत्राष्ट

म्याःखंडत्वेज्येष्ठायुतापूर्वापरावाग्राह्या।यत्तुज्येष्ठानक्षत्रमात्रापेक्षंतिथिव्रता
द्भिन्नंज्येष्ठाव्रतंतुयस्यांतिथौज्येष्ठानक्षत्रंभवतितस्यांतिथौकर्तव्यं।मासिभा
द्रपदेशुक्लपक्षेज्येष्ठर्क्षसंयुते।यस्मिन्कस्मिन्दिनेवापिज्येष्ठांदेवींप्रपूजयेदि
तिस्कंदपुराणात्।यस्मिन्कस्मिन्दिनेयस्यांकस्यांचित्तिथावित्यर्थः।ज्येष्ठानक्ष
त्रस्यखंडत्वेऽष्टमीभानुवारयुगन्यतरयुग्वाज्येष्ठानक्षत्रंग्राह्यं।तत्राष्टम्योंयदा
वारोभानोर्ज्येष्ठर्क्षमेवच।नीलज्येष्ठेतिसाप्रोक्तादुर्लभाबहुकालिकेतिस्कंदा
त्।अन्यतरयोगस्याप्यभावेमध्याह्नादूर्ध्वम णुवर्तमानंग्राह्यं।।यस्मिन्दिने ५७
भवेज्ज्येष्ठामध्याह्नादूर्ध्वमप्यणु।तस्मिन्हविष्यंपूजांचन्यूनाचेत्सूर्ववासरइति

स्कांदात्।तथाभैत्रेणवाहयेद्देवींज्येष्ठायांतुप्रपूजयेत्।मूलेविसर्जयेद्देवींत्रिदि
नंव्रतमुत्तममिति।मंत्रस्तु।ज्येष्ठायैतेनमस्तुभ्यंश्रेष्ठायैतेनमोनमः।ऋद्धयैतेनम
स्तुभ्यंऋद्धिंकुर्यैतेनमोनमइति।अस्यामेवमहालक्ष्मीव्रतारंभः।तत्रसाज्येष्ठायुता
पूर्वापरावाग्राह्यातदभावेकेवलापिपरा॥ ॥भाद्रपदशुक्लैकादश्यांवामनावतारः॥
तथाचभविष्योत्तरेवामनावतारमभिधायबलिनिग्रहांते।एतत्सर्वंसमभवदे
कादश्यांनराधिपेशुक्ला।एषाऋद्धिःसमाख्याताएकादश्यामयातवेत्यभिधाना
त्।भाद्रपदशुक्लद्वादश्यांश्रवणयोगेपारणंनकार्यं।आभाकासितपक्षेश्विनिपू
र्वेदाहृतवचनात्।उपोष्यैकादशींमोहात्पारणंश्रवणेयदि।करोतिहंतितत्पुण्यं

द्वादश्यां द्वादशीभवमितिस्कांदाच्च। अत्रचत्रेधाविभक्तश्रवणमध्यभागएवपार
णंवर्ज्यमित्युक्तंविष्णुधर्मे।श्रुतेश्चमध्येपरिवर्तमितिसुप्तिप्रबोधपरिवर्तनमेववर्ज्यमिति। अत्रैवपरिवर्तनोत्सवंकुर्यात्।श्रुतेश्चमध्येपरिवर्तमेतीतिवाक्यात्। अत्रैवशक्रध्वजोत्थापनमुक्तमपरार्केण। द्वादश्यांतुसितेपक्षेमासिप्रोष्ठपदेपिवा।शक्रमुत्थापयेद्राज्ञाविश्वश्रवणवासवे।गोडास्तु।श्रवणाद्यपादेशक्रध्वजोत्थापनंभरण्यांपूजनमाहुः।मैथिलास्तुद्वादश्यादिदिनसप्तकंपूजामाहुः। इयमेवश्रवणद्वादशी। अस्याश्चाल्पश्रवणयोगेपितन्निमित्तमुपवासादिभवति।तदुक्तंमात्स्ये।द्वादशीश्रवणस्पृष्टाकृत्स्नापुण्यतमातिथिः।नतुसातेनसंयु ५८

क्तावत्सेवप्रशस्यतइति।तत्रैकस्मिन्नेवश्रवणयोगेयेवश्रवणयुतासेवग्राह्या। विद्धाधिकायादिनद्वयेश्रवणयोगेएकादशीयुताग्राह्या। द्वादशीश्रवणस्पृष्टास्यशेदेकादशीय दासएववैष्णवोयोगोविष्णुशृंखलसंज्ञितः।उपोष्यविधिवत्तत्रनरःसंक्षीणकिल्बिषः।प्राप्नोत्यनुत्तमांसिद्धिंपुनरावृत्तिदुर्लभामितिमात्स्यात्। तथानारदीये।संस्पृश्येकादशींराजन्द्वादशींयदिसंस्पृशेत्।श्रवणंज्योतिषांश्रेष्ठंब्रह्महत्यांव्यपोहतीति।तंत्रेणचनदैकादशीद्वादशीप्रयुक्तमुपवासद्वयं।शुद्धाधिकायादिनद्वयेपिश्रवणयोगेऽदयेनद्योगवतीग्राह्याऽदयचापिनीग्राह्याश्रवणद्वादशीव्रतइतिबृहन्नारदीयात्।यदातुएकादश्येवश्रवणयुक्तानद्वाद

शीतदातस्यामपिव्रतंभवति।यदानप्राप्यतेऋक्षंद्वादश्यांवैष्णवंक्वचित्।एकाद
शीतदोपोष्यापापघ्नीश्रवणान्विततिनारदीयात्।विद्धायाएवश्रवणयोगेविद्धापि
ग्राह्या।दशम्येकादशीयत्रसानोपोष्याभवेन्निथिः।श्रवणेनतुसंयुक्तासाशुभास
र्वकामदेतिवह्निपुराणात्।इयंचबुधवारेतिप्रशस्ता।अत्रव्रतंकाम्यंनित्य मिति
केचित्।पारणेउभयांतोमुख्यः।अन्यतरांतोगौणः।दिवान्यतरांतस्याप्यलाभेतुदि
वैवपारणं।न रात्रौपारणंकुर्यादितिरात्रिपारणनिषेधात्।अत्रसंगमस्नानादि
कार्यं।श्रवणेसंगमाःसर्वेपरंपुष्टिप्रदाःसदा।विशेषाद्वादशीयुक्तेबुधयुक्तेविशे
षतइति।तथा।दध्योदनयुतंतस्यांजलपूर्णंघटंद्विजे।वस्त्रसंवेष्टितंदत्वाछत्रो ५९

पानहमेवच।नदुर्गतिमवाप्नोतिगतिमग्र्यांचविंदति।तथा।स्नानंजप्यंतथादानं
होमंश्राद्धंसुरार्चनं।सर्वमक्षयमाप्नोतितस्यांभृगुकुलोद्वहेतिब्रह्मवैवर्तेपि।बुध
श्रवणसंयुक्तासंगमेविजयास्मृता।वारिधानींप्रदायास्यादध्योदनसमायुताम्।
प्रेतयोनौनजायेतपूजयित्वात्रवामनं।वंशःसमुद्धृतस्तेनमुक्तःपितृऋणादसा
विति।अस्यामेवदुग्धव्रतारंभः।दुग्धव्रतेपायसादिवर्ज्यं।दधिघृतादयस्तद्वि
कारास्त्याज्याः॥ ॥भा द्रशुक्लचतुर्दश्यामनंतव्रतं॥तत्रपूर्वाह्णव्यापिनीग्राह्या।
दैवकर्मत्वात्।चतुर्दश्याचपूर्णिमेतियुग्मवाक्याच्च।नचमध्याह्नेभोज्यवेलाया
मितीतिहासेमध्याह्नेपूर्वगृहीतव्रतानांस्त्रीणांव्रताचरणप्रतीतेः।शीलाया

श्चापूर्वव्रतारंभप्रतीतेर्मध्याह्नस्येवतत्कालत्वान्मध्याह्नव्यापिनीचतुर्दशी
ग्राह्येतिवाच्यं।पूजाविधेःप्रत्यक्षत्वेनेतिहासरूपार्थवादेनान्यथात्वाभावात्तत्रम
ध्याह्नश्रवणात्प्रत्य क्षविहितदेवकर्मांगभूतपूर्वाह्नविरोधेइतिहासात्त
न्मात्रकल्पनासंभवात्। पूर्वाह्नएवतस्यकालः।नचपूजाव्रतेषुसर्वेषुमध्याह्न
व्यापिनीतिथिरितिमाधवोदाहृतवचनान्मध्याह्नव्यापिनीग्राह्येतियुक्तं।मु
हूर्तमपिचेद्भाद्रेपूर्णिमायांचतुर्दशी।संपूर्णेतांविदुस्तस्यांपूजयेद्धिहरिंमम्यय
मितिनिर्णयामृतोदाहृतस्कंदविश्वेषवचनविरोधात्।माधवादयोप्येवं।सिंह
संक्रांतिदिनमारभ्येककविंशतिमेदिनेऽगस्योदयः।तदुक्तंदिवोदासीये।उदेति ६०

याम्यांहरिसंक्रमाद्वेरेकाधिकेविंशतिमेह्यगस्यइति।तत्रकाशपुष्पमयीमगस्य
प्रतिमांसंपूज्य।अगस्त्यःखनमानःखनित्रेरित्यर्घ्यंदद्यादित्यादित्रतकांडेद्रष्ट
व्यं॥ ॥भाद्रपदपौर्णमास्यांभविष्योत्तरोक्तंब्रह्मसावित्रीव्रतं।त्रयोदश्यांभाद्रपदे
दंतधावनपूर्वकं।त्रिरात्रंनियमंकुर्यादुपवासस्यशक्तितइति।अस्यांकन्यार्कसुक्ता
यांप्रपितामहात्सरांस्त्रीनुद्दिश्यश्राद्धंकार्यं।तदुक्तंमार्कंडेये।यथेति।नांदीमुखंत
दृश्रितंतत्रैव।पितापितामहश्चैवतथैवप्रपितामहः।त्रयोह्यभ्युदयाह्येतेपितरः
परिकीर्तिताः।तेभ्यःपूर्वतरायेचप्रजावंतःसुखेधिताः।तेतुनांदीमुखानांदीसमृ
द्धिरितिकथ्यतइति।एतच्चनित्यंप्रत्यब्दमित्युक्तेर्नित्यत्वाच्च।यस्मिन्वर्षेभाद्रप

घांकन्यार्कयोगाभावस्तदाश्वयुज्यांकन्यार्कयुक्तायांकार्यं।हेमाद्युक्तस्यभाद्रप
द्युपलक्षणंस्यायुक्तत्वात्।एतच्चपार्वणविधानेनकार्यं।मातामहास्तत्रनभवंति।
पितरोयत्रपूज्यंतइतिपित्रादिपार्वणएवतेषांविधानात्।विष्णुधर्मोत्तरे।गोदानं
प्रोष्ठपद्यांचपौर्णमास्यांमहाफलं।मदनरत्नेमात्स्येभागवतपुस्तकदानमुक्तं॥
यत्राधिकृत्यगायत्रीवर्ण्यतेधर्मविस्तराः।वृत्रासुरवधोपेतंतद्भागवतमुच्यते।लि
खित्वातच्चयोदद्याद्धेमसिंहसमन्वितं।पौर्णमास्यांप्रोष्ठपद्यांसयातिपरमंपदं।
अष्टादशसहस्राणिपुराणंतत्प्रकीर्तितमिति॥ ॥इतिभाद्रपदः॥ ॥अथमहालय
यः॥ ॥तत्रषट्पक्षाः॥कृष्णप्रतिपदादिशुक्लप्रतिपदंतएकः॥१॥प्रतिपदादिदर्शी ६१

तोद्वितीयः॥२॥पंचम्यादि३अष्टम्यादि४दशम्यादि५चतुर्दशीवर्जंदर्शांतमित्य
परेदशासन्नपंचतिथिपक्षाःएकदिनपक्षश्चेति६॥तत्रप्रथममाहरण्यायनिः॥
नभस्यस्यापरेपक्षेतिथिषोडशकस्तुयः।कन्यागतान्वितश्चेत्स्यात्सकालःश्रा
द्धकर्मणीति।चेदित्यसंदिग्धेसंदिग्धवचनान्नभस्यइतिअमांतमासेनतिथिषो
डशश्राद्धावास्यान्तरंप्रतिपदमादायेतिदेवलेनोक्तं।अहःषोडशकंयत्तुशुक्लप्र
तिपदासह।चंद्रक्षयाविशेषेणसापिदर्शात्मिकास्मृतेति।पंचदशादशासन्नपंचति
थिपक्षाब्रह्मपुराणे॥आश्वयुक्कृष्णपक्षेतुश्राद्धंकुर्याद्दिनेदिने।त्रिभागहीनंप
क्षंवात्रिभागंत्वर्द्धमेववेति।तृतीयोभागस्त्रिभागः।पक्षस्यत्रिभागहीनताचाघा

नांचतस्रृणांचतुर्दश्याश्चवर्जनात्। एवमर्धत्रिभागयोरपिचतुर्दशीवर्जनंन
भस्यस्यापरेपक्षेश्राद्धंकुर्याद्दिनेदिने।नैवनंदादिवर्ज्यस्यान्नैववर्ज्याचतुर्दशीति
वचनेनप्रतिपदादिपक्षएवचतुर्दशीवर्जननिषेधादितरपक्षेषुतद्वर्जनप्रतीतेः।
नंदादिवर्जनंतुनभवतिसंख्याहानिप्रसंगात्।गौतमः।अथापरपक्षेश्राद्धंपि
तृभ्योदद्यात्संचम्यादिदर्शीनमष्टम्यादिदशम्यादिसर्वस्मिंश्चेति।एकादिनपक्षो
नागरखंडे।आषाढ्याःपंचमेपक्षेकन्यासंस्थेदिवाकरे।योवैश्राद्धंनरःकुर्याद्दे
कस्मिन्नपिवासरे।तस्यसंवत्सरंयावत्तृप्ताःस्युःपितरोध्रुवमिति।अस्मिंश्चपक्षे
नंदादिवर्जनमपिभवति।अत्रतदप्रवृत्तौकारणाभावात्।नंदादिवर्जनमाह ६२

नारदः।ननंदासुभृगोर्वारेरोहिण्यांचत्रिजन्मसुरेवत्यांचमघायांचकुर्यादापर
पक्षिकमिति।नंदाःप्रतिपत्षष्ठ्येकादश्यः।त्रिजन्मान्याद्यदशमैकोनविंशानिन
क्षत्राणि।यत्तुकर्तुश्चपुत्रदाराणांत्रिजन्मर्क्षाणिवर्जयेदितिकश्चिल्लिखितंतच्च
नंतद्यदिसाकरंतदेवंवारयेयं।कर्तुस्तत्पुत्रदाराणांचयानित्रीणिजन्मर्क्षाणिआ
द्यदशमैकोनविंशानितानिवर्जयेदिति।अन्यथात्रिशब्दस्यबहुवचनस्यचवै
यर्थ्यात्।केश्चित्त्रिजन्मानीत्यत्रजन्मतत्पूर्वोत्तरनक्षत्राणीतिव्याख्यातं।तत्पूर्वोत्त
रनक्षत्रयोर्जन्मशब्दवाच्यत्वाभावान्मूलालेखनाच्चोपेक्षितं।अन्यत्रापि।नंदा
स्वकामरव्यारभृग्वग्निपितृकालभे।गंडेवैधृतिपातेचपिंडास्याज्याःसुतेप्सु

भिरिति। अभ्वः सप्तमी। कामस्त्रियोदशी। आरोग्यभीमः। अग्निपितृकालभानि। कृत्तिकामघाभरण्यारव्यानि नक्षत्राणि। पिंडदानग्रहणंश्राद्धोपलक्षणं। एकमूलकल्पनालाघवात्। अस्यापवादः प्रयोगपारिजातोदाहृतेसंग्रहवचने। अमापातेभरण्यांचद्वादश्यांपक्षमध्यके। तिथिंवारंचनक्षत्रंयोगंचनविचारयेदिति। मृततिथिसमानजातीयायामपियावत्संभवंशिष्टामहालयश्राद्धमाचरंति। आधुनिकग्रंथेवचनान्यपिलिखितानि। नागरखंडे। आषाढ्याः पंचमेपक्षेकन्यासंस्थेदिवाकरे। मृताहनिपितुर्योवैश्राद्धंदास्यतिमानवः। तस्यसंवत्सरंयावत्संतुष्टाःपितरोध्रुवमिति। कात्यायनः। यातिथिर्यस्य ६३

मासस्यमृताहेतुप्रवर्तते। सातिथिः पित्पक्षेतुपूजनीयाप्रयत्नतः। तद्यथा। अशक्तःपक्षमध्येतुकरोत्येकदिनेयदा। निषिद्धेपिदिनेकुर्यात्पिंडदानंयथाविधीति। एतानिवचनानिमहानिबंधेषुदर्शनादना करणि। तथामार्कंडेयः। कन्यागतेसवितरिदिनानिदशपंचच। पार्वणेनैवविधिनाश्राद्धंतत्रविधीयते। यस्कविवाहेवितनेमासांस्त्यजेयुर्दशैवतु। सपिंडाः पिंडनिर्वापंमोंजीबंधेषडेव हीति। विवाहानंतरंपिंडदाननिषेधोज्योतिःपराशरेणोक्तः। तस्यापवादः स्मृतिसंग्रहे। महालयेगयाश्राद्धेमातापित्रोर्मृतेहनि। यस्यकु

स्यापिमर्त्यस्यसपिंडीकरणेतथा।कृतोद्वाहोपिकुर्वीतपिंडनिर्वपणंसुत
इति।सन्यासिनांतुमहालयश्राद्धंद्वादश्यांकर्तव्यं।यतीनांचवनस्थानांवै
ष्णवानांविशेषतः।द्वादश्यांविहितंश्राद्धंकृष्णपक्षेविशेषतइतिपृथ्वीचंद्रो
दयोक्तेः।वायुपुराणेपि।सन्यासिनोप्याब्दिकादिपुत्रःकुर्याद्यथाविधि।।म
हालयेतुयच्छ्राद्धंद्वादश्यामेवतद्भवेदिति।इदंचान्नेनैवकर्तव्यं।मृताहंचस
पिंडंचगयाश्राद्धंमहालयाः।आपन्नोपिनकुर्वीतश्राद्धमामेनकर्हिचि
दितिस्मृतिदर्पणेगालवोक्तेः।अथात्रदेवताः।पितरोयत्रपूज्यंतेतत्रमा ६४

तामहाअपि।तथा।अन्वष्टकासुवृद्धौचप्रतिसंवत्सरंतथा।महालयेगया
यांचसपिंडीकरणात्पुरा।मातुःश्राद्धंसुतःकुर्यादन्यत्रपतिनासह।हेमाद्रौ।
महालयेगयाश्राद्धेवृद्धौचान्वष्टकासुच।नवदैवत्यमंत्रेष्टंश्रोषंषाद्धौरुषंवि
दुरिति।सापत्नमातुस्तन्मात्रासहैकतंत्रेणद्विपित्रुश्राद्धवत्।निगमे।महा
लयेगयाश्राद्धेवृद्धौचान्वष्टकासुच।ज्ञेयंद्वादशदैवत्यंतीर्थप्रोष्ठमघासु
च।तथाहेमाद्रौउपाध्यायगुरुश्वश्रूपित्र्याचार्यमातुलाः।श्वशुरश्चात्त
स्यत्रऋत्विक्शिष्यास्तपोषकाः।भगिनीस्वामिदुहितृजामातृभगिनीसु

ताः।पितरौपितृपत्नीनांपितुर्मातुश्चयास्वसा।सखिदुहितृशिष्याद्यास्तीर्थे
चैवमहालये।एकोद्दिष्टविधानेनपूजनीयाःप्रयत्नतइति।अत्रसंबंधास
साक्रमः।तत्तुल्यत्वेमरणक्रमात्तेनाप्यनिर्णयेपाठक्रमादितिबोध्यं।अ
त्रप्रयेकोद्दिष्टब्राह्मणभेदइतिमुख्यःपक्षः।अशक्तौचतुर्विंशतिमते।ए
कस्मिन्ब्राह्मणेसर्वानाचार्यादीन्प्रपूजयेत्।दशाद्दशवापिंडान्दद्याद्करे
णंनतु॥॥विधवायास्तुविशेषःस्मृतिसंग्रहे।चत्वारिपार्वणानीहविधवायाः ६५
सदैवहि।स्वभर्तृश्वशुरादीनांमातापित्रोस्तथैवच।ततोमातामहानांचश्रा

द्धानमुपक्रमेदिति।तथा।श्वश्रूणांचविशेषेणमातामह्यास्तथैवचेत्यपि
क्वचित्।तस्याःषडेवत्वेचविशेषःस्मृतिरत्नावल्यां।स्वभर्तृप्रभृतित्रिभ्यः
स्वपितृभ्यस्तथैवचे।विधवाकारयेच्छ्राद्धंयथाकालमतंद्रिते ति।विधवा
स्वयंसंकल्पंकृत्वाऽन्यद्वाराकारयेदितिप्रयोगपारिजाते।अत्रैकःपाकः।
वैश्वदेवंतत्रैवथावा।एकोद्दिष्टंचौकरणंनकर्तव्यं।कर्तव्यमितिशुद्धिका
राः।ब्राह्मेतु।स्त्रीक्षिर्वर्णावरैःशूद्रैर्दैवंविप्रानुज्ञासनात्।अमंत्रंविधिपू
र्वंचवह्निपाकविवर्जितमितियुक्तमेतत्स्त्रीशूद्रयोःसमानधर्मत्वात्।

अत्रपुरूरवाईवसंज्ञोविश्वेदेवौ।यत्तु श्रपिकन्यागतेसूर्येकाम्येचधुरिलो
चनाविसादिपुराणवचनंतत्काम्यबुध्याक्रियमाणमहालयश्राद्धविष
यमितिहेमाद्र्यादयः।केचिन्नित्येपिमहालयश्राद्धेताविछंति।मह्यंतेत
न्नरोचते।यतोनात्रमहालयपदंश्रूयते।किंतुकन्यागतेसूर्येश्राद्धइत्येव
तत्रकिंकन्यागतेसूर्येइतीयमधिकरणसप्तमीउतनिमित्तसप्तमी।आद्ये
कन्यागताधिकरणकेषुवार्षिकादिष्वप्यतिप्रसंगः।द्वितीयेमहालयश्रा
द्धस्यतन्निमित्तकत्वाभावेनतत्रधुरिलोचनोनस्यात्।आषाढीमवधिं ६६

कृत्वायःस्यात्पक्षस्तुपंचमः।श्राद्धंतत्रप्रकुर्वीतकन्यांगछतुवानवा।अग
तेपितरोकन्यांश्राद्धंकुर्वंतियत्नतः।आषाढ्याःपंचमःपक्षःप्रशस्तःपि
तृकर्मस्वितिजातूकर्ण्यजाबालिवचनाभ्यांमहालयश्राद्धस्यकेवलपंच
मपक्षप्रयुक्तत्वात्।तत्रैव।शाकध्वजनिपातांकोयःस्यात्पक्षस्तुपंचमः।सवि
ज्ञेयोवरःपक्षःश्राद्धंतत्रविधीयते।पुत्रानायुर्धनंधान्यमारोग्यंभूतिमेव
च।प्राप्नोतिपंचमेदत्वाश्राद्धंकामांस्तथापरान्।एतान्यपिहिदृष्टिंतिपं
चमंयोव्यतिक्रमेत्।तस्मान्नातिक्रमेद्विद्वान्पंचमेपेतृकंविधिमिति।क

न्यायोगस्तूक्तप्रायास्त्यार्थः।नतुतस्यनिमित्तत्वं।किंविषयंतर्हीदंवचनमिति
चेत्।श्रूयतामवधानेन।नांदीमुखानांप्रत्यब्दंकन्याराशिगतेरवौ।पौर्ण
मास्यांतुकर्तव्यमितिवचनविहितेश्राद्धेकन्यार्कयुक्तपौर्णमास्यानिमि
त्तत्वेनतत्रकन्यार्कस्यापिनिमित्तत्वात्। भवेतांधुरिलोचनौ।यद्वा क
न्यासंक्रांतिश्राद्धेभवेतां।नतुकदापिनित्येमहालयेश्राद्धइति।अत्रच
प्रतिदिनंप्रयोगभेदाद्दक्षिणाभेदः।यत्तुहेमाद्रिणाःभ्यासपक्षेतेदक्षि
णादानमित्युक्तं।तत्कर्मैक्येपिप्रतिदिनंप्रयोगभेदाद्दक्षिणायाश्चप्र ६७

योगांगत्वादयुक्तं।एतच्चगुर्विणीपतीनांपिंडरहितंकार्यं।तथाचदक्षः।मुंड
नंपिंडदानंचप्रेतकर्मचसर्वशः।नजीवत्पितृकःकुर्याद्गुर्विणीपतिरेवचेति।
जीवत्पितृकस्याष्टक्यमात्रंवार्षिकादौचवचनाद्भवति।नान्यत्रेतिकेचित्।
श्राद्धांगतर्पणंतुपक्षश्राद्धेश्राद्धोत्तरंप्रत्यहंसकृन्महालयेतुपरेद्युः।तदु
क्तंनारदीये।पक्षश्राद्धंयदाकुर्यात्तर्पणंतुदिनेदिने।सकृन्महालयेचैवप
रेह्निनिलोदकमिति।प्रयोगपारिजातेगर्गः।कृष्णेभाद्रपदेमासिश्राद्धं
प्रतिदिनंभवेत्।पितृणांप्रत्यहंकार्यंनिषिद्धेपिचतर्पणं।एतच्चश्राद्धं

नित्यं।आषाढ्याःपंचमेपक्षेयःश्राद्धंनकरिष्यति।ग्राकेनापिदरिद्रोपिसं
यजत्वमुपेक्षति।अन्नानंशयनंभोज्यंश्वसनंभाषणंतथा।तेनसार्धंकरि
ष्यंतियेतेपापतरानराइतिनागरखंडेऽकरणेप्रत्यवायश्रवणात्।काम्यं
च।पुत्रानायुस्तथारोग्यमैश्वर्यमतुलंतथा।प्राप्नोतिपंचमेदत्वाश्राद्धं का
मांश्चपुष्कलानितिकार्ष्णाजिनिवचनात्।यातुधानप्रियोमासःकन्या कं
जायतेयदा।देवंपित्र्यंतदाकर्मउत्तरेमासियुज्यतइतियदुक्तंतदाश्विने
धिमासेतत्रगोणकालेप्राप्तस्यमहालयश्राद्धस्योत्कर्षार्थमितिमन्यत्रमत्कृ ६८

तोद्रष्टव्यं।पित्तमरणप्रथमाब्देतुकृतांकृतं।कृतेप्युदयेऽकृतेप्रत्यवायोना
स्ति॥अत्रभरण्यांश्राद्धमतिप्रशस्तं॥भरण्यांपित्तपक्षेतुमहतीपरिकीर्ति
ता।तस्यांश्राद्धंकृतंयेनसगयाश्राद्धकृद्भवेदितिमात्स्यात्।इदंपिंडरहितंक
र्तव्यं।तथाचपुलस्त्यः।अयनद्वितयेश्राद्धंविषुवद्वितयेतथा।भरणीषुच
कुर्वंतिपिंडनिर्वपणंनहि।पाद्मेपि।संक्रांतिषुचसर्वासुपिंडनिर्वपणादृतइति।
पृथ्वींचंद्रोदये।नभस्यकृष्णपक्षेतुद्वितीयायदियाम्यभे।तृतीयालग्निता
राभिःसहितापूर्वाह्णेपितुरिति।अस्मिन्नेवपक्षेकपिलाषष्ठी।तदुक्तंवा

राहे।नभस्यकृष्णपक्षेतुरोहिणीपातभसुतैः।युताषष्ठीपुराणज्ञैःकपिला
परिकीर्तिता।व्रतोपवासनियमेभास्करंतत्रपूजयेत्।कपिलांचद्विजाय्याय
दत्वाक्रतुफलंलभेदिति।अत्रैवहस्तार्कैफलाति ज्ञायइतिनिर्णयामृते।
इयमेवचंद्रषष्ठी।तदुक्तंभविष्ये।तद्वद्भाद्रपदेमासिषष्ठ्यांपक्षेसितेनरे।
चंद्रषष्ठीव्रतंकुर्यात्पूर्ववेधःप्रशस्यते।चंद्रोदयेयदाषष्ठी पूर्वावाप्यपरेहनि।
चंद्रषष्ठ्यसितेपक्षेसैवोपोष्याप्रयत्नतइति।अत्रापिभाद्रपदोःमांतमासे
न।इयमेवतत्पुरुषकल्पादिः॥अत्रैवाष्टम्यामाश्वलायनेनमाघ्यावर्षसं ६९

ज्ञंश्राद्धमुक्तं।एतेनमाघ्यावर्षेप्रोष्ठपद्यांश्रपरपक्षइति।इदंचसप्तम्या
दिषुत्रिषुहःसुश्रष्टकावत्कार्यमेतेनेतिकृत्वातिदेशादितिवृत्तिकृत्।ह
रदत्तस्तुमाघावर्षमितिपाठमंगीकृत्यमघायुक्तवर्षासुभवंत्रयोदश्यांश्रा
द्धमितिव्याचख्यौ।।अत्रैवाष्टम्यांमहालक्ष्मीव्रतंसमापनं।तत्रचंद्रोदययो
गिनीग्राह्या।तत्कालेचंद्रार्घ्यदानविधानाच्चंद्रोदयव्रतत्वेन चंद्रोदयव्रतेचै
वतिथिस्तात्कालिकीस्मृतेतिवचनात्।उभयत्रचंद्रोदयेऽसत्येवाकृष्णपक्षे सत्ये
ष्टमीचैवकृष्णपक्षेचतुर्दशी।पूर्वविद्धैवकर्तव्यापरविद्धानकुत्रचिदितिवच

नास्तूर्वा। यद्युत्तरदिनेचंद्रोदयोत्तरंत्रिमुहूर्तातदोत्तरैव। पूर्वापरविद्धावा
ग्राह्याचंद्रोदयेतुया। त्रिमुहूर्तातुसापूज्यापरतश्चोर्ध्वगामिनीतिपुराणसमु
च्चयवचनात्। अर्धरात्रमतिक्रम्यवर्ततेयोत्तरातिथिः। तदातस्यांतिथौका
र्यंमहालक्ष्मीव्रतंसदेतिवचनाच्च। अस्यामेवाष्टम्यांश्राद्धंगयाश्राद्धतुल्यफ
लं॥ तथाचब्रह्मांडे। आषाढ्याः पंचमेपक्षेगयामध्याष्टमीस्मृता। त्रयोदशी
गजच्छाया गयातुल्येतुपैत्रकइति। अत्रैवनवम्यामन्वष्टकाश्राद्धं। तत्रका
त्यायनः॥ अन्वष्टकासुनवमिः पिंडैः श्राद्धमुदाहृतं। तातादिमातृमध्यंचत ७०

तोमातामहांतकं॥ हेमाद्रौछागलेयः॥ केवलास्तूक्षयेकार्यावृद्धावादौप्रकी
र्तिताः। अन्वष्टकासुमध्यस्थानांत्याः कार्याःकदाचनेति। दीपिकायांतुमातुःश्रा
द्धमाद्यैकार्यमित्युक्तंनिर्णयामृतेमैत्रायणीयगृह्यपरिशिष्टे। अन्वष्टक्यंगया
प्राप्तोसत्यांयज्ञमृतेःहनि। मातुःश्राद्धंसुतःकुर्यात्सितर्यपितृजीवति। यद्यपि
का जीवत्पितृकस्यपंचाग्न्यन्वष्टैनिसाक्षात्थापाचारादग्नौकृत्वेयमावश्यकीतिकेचि
त्। मातामहचरणेस्तूनवम्यांक्रियमाणंमातृश्राद्धं प्रतिपदिक्रियमाणंमाता
महश्राद्धंचमहालयापरपक्षनिमित्तकमेवेतिकालतत्त्वविवेचनेसप्रपंचंनि

रूपितं।अत्रस्वमातरिजीवत्यामपिसापत्नमातृभ्योदद्यादित्युक्तमाधुनिकग्रंथे
षु।सर्वासामेवमातॄणांश्राद्धंकन्यागतेरवौ।नवम्यांहिप्रदातव्यंब्रह्मलोकप्रा
वरायतइति।अत्रसर्वासांनामनिर्देशेनैकार्घ्यःपिंडश्च।नामैक्येतुद्विवच
नादिप्रयोगइतिदिक्।भर्तृमरणोत्तरंश्राद्धंनकार्यं।श्राद्धंनवम्यांकुर्या
न्नम्रतेभर्तरिलुप्यतइति वचनादितिकेचित्।अन्येतुएतद्वचनस्यनिर्मूल
त्वात्कर्तव्यमित्याहुः।मातामहचरणास्तुमृतपितृकेणपित्रश्राद्धदिनएवपृ
थग्वामातृतश्चेरपिसंपादितत्वाज्जीवत्पितृकेनैवकर्तव्यमित्याहुः।सर्वत्रै ७१

तत्कालतत्त्वविवेचनेद्रष्टव्यं। इदंजीवत्पितृकेणापिसपिंडकंकार्यं।हेमाद्रौ
विष्णुधर्मोत्तरे।अन्वष्टकासुचस्त्रीणांश्राद्धंकार्यंतथैवचेत्युपक्रम्यपिंडनिर्व
पणंकार्यंतस्यामपितुसत्तमेत्युक्त्वात्।तस्यामन्वष्टकायामित्यर्थः।अपिश्राद्धे
नतीर्थमहालयप्रस्थाद्धिकादीनांग्रहणं।तेनगुर्विणीपतेरप्येतेषुपिंडदानंभ
वत्येव।अत्रातिदेशादेवपिंडदानेप्राप्तेगुर्विणीपतित्वादिप्रयुक्तनिषेधप्रति
प्रसवार्थत्वाद्वचनस्यमातुःश्राद्धेसुवासिनीभोजनमुक्तं मार्कंडेयपुराणे।।
मातुःश्राद्धेतुसंप्राप्तेब्राह्मणैःसहभोजनं।सुवासिन्यैप्रदातव्यमितिश्रुता

७२ तपोब्रवीत्। भोजनंभोज्यमन्नं। भर्तुरग्रेमृतानारीसहदाहेनवामृता।तस्याः
स्थानेनियुंजीतविप्रैः सहसुवासिनीमिति।तत्रैवमदालसावाक्यं।स्त्रीश्रा
द्धेपुत्रदेयाःस्युरलंकाराश्चयोषितां।मंजीरमेखलादामकर्णिकाकंकणाद
यइति।अस्यामेवनवम्यांबिल्वशारवायांदेवीबोधनमुक्तंदेवीपुराणे।कन्या
यांशुक्लपक्षेतुपूजयित्वाईशंदिवा।नवम्यांबोधयेद्देवींगीतवादित्रनिःस्वने
रिति।अत्रैवत्रयोदश्यांश्राद्धंमहाफलं।मघायुक्तायांतुअतिप्रशस्तं।मघा
युक्ताथतत्रापित्रास्तारात्रंस्त्रयोदशीतिवचनात्।अत्रमलमासेपिश्राद्धं ७२

कार्यं।अनन्यगतिकत्वात्।मघात्रयोदशीश्राद्धंप्रत्युपस्थितिहेतुकं।अनन्य
गतिकत्वेनकर्तव्यंस्यान्मलिम्लुचे इतिकाठकगृह्यात्।इदंचयुगादिवि
षयुक्त्वासपिंडरहितंकार्यं।अयनद्वितयेश्राद्धंविषुवद्वितयेतथा।युगा
दिषुचकर्तव्यंपिंडनिर्वपणादृतइतिवचनात्।अपिंडकश्राद्धेविशेषमाह
छागलेयः॥ पिंडोयत्रनिवर्तेतमघादिषुकथंचन।सांकल्पंतुतदाकुर्यान्न
कुर्यात्पात्रपूरणं।नावाहनाग्नौकरणे नपिंडान्विकिरंनच।अशक्त्यासपिं
डकश्राद्धकरणेप्येवमेव।अशक्त्यापार्वणश्राद्धंयथावत्कर्तुमक्षमः॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

७२ पिंडार्घ्यादिविहीनंतुसांकल्यंश्राद्धमाचरेदितिवचनात्। एतच्चपुत्रवतापुत्रा
तरोद्देशेननकार्यं। कृष्णपक्षेत्रयोदश्यांयःश्राद्धंकुरुतेनरः। पंचत्वंतस्यजा
नीयाज्ज्येष्ठपुत्रस्यनिश्चितमितिवचनात्। अतएतयोर्वांछतिनरोमुक्तिं
पितृभिःसहचात्मनः। असंतानश्चयस्तस्यश्राद्धेप्रोक्तात्रयोदशीतिनाग
रखंडे। तत्रैव। अद्यप्रभृतियःश्राद्धंत्रयोदश्यांकरिष्यति। कन्यासंस्थेस
हस्रांशोतस्यस्याद्वंशसंक्षय इति। तत्रबहुभिर्वचनैर्बहुफलार्थतयावि
हितस्यात्यंतंनिषेधायोगाद्विषयभेदेवक्तव्येपिंडदानयुक्तत्वरूपावस्त ७३

रराहित्यरूपस्तावदेकस्तद्विषयोनागरखंडेऽुक्तः। अतःश्राद्धंविनादेयंत
द्दिनेमधुपायसं। खड्गमांसंकालशाकंमांसंवाधीमतस्यच। तस्याभावेपिरा
तृयंजलंतिलविमिश्रितमिति। अत्रश्राद्धशब्दःपिंडदानपरः। तस्यापिपित्
देवत्वेनश्राद्धशब्दवाच्यत्वात्। अग्नेब्राह्मणभोजनस्योक्तत्वेनतन्निषेधाः
संभवात्। अन्योप्येकवर्गोद्देश्यकरूपोनिषेधविषयः कार्ष्णाजिनेनोक्तः।
श्राद्धंनैवैकवर्गस्यत्रयोदश्यामुपक्रमेत्। नत्मासत्रयेयस्यप्रजाहिंसंतित
स्यतइति। एकवर्गस्यपित्वर्गमात्रस्यनकुर्यात्। किंतुमातामहवर्गस्यापि

७४ कुर्यादितिविधेर्विषयः।नचदर्शेश्राद्धातिदेशादेवत्रयोदश्यांश्राद्धेमातामह
वर्गस्यापिप्राप्तत्वादेकवर्गोद्देश्यकश्राद्धनिषेधानुपपत्तिः।दर्शश्राद्धेएवमाता
महश्राद्धानावश्यकत्वस्यमिताक्षरायामुक्तत्वात्।तदनावश्यकत्वेतुत्रयोद
श्यामेकवर्गश्राद्धनिषेधोवृद्धिश्राद्धादिषुच।षड्भ्यःपित्रभ्यस्तदनुश्राद्ध
दानमुपक्रमेत्यादिमातामहश्राद्धेपुनर्वचनमेवमूलं।हेमाद्युदाहृतव
चनेपिनेछेत्त्रयोदशीश्राद्धंपुत्रवान्यःसुतात्मये।एकस्येवनकुर्यात्सपार्वणं ७४
तुसमाचरेत्।एकस्येववर्गस्यपार्वणंपर्वणिदर्शेक्रियमाणेनामावास्याश्रा

द्धेनसदृशंषट्दैवत्यमित्यर्थः।केचित्तुनित्यास्तत्रयेयस्येतिदोषश्रवणात्ति
त्र्यादीनामपिमहालयवत्त्रयोदश्यांश्राद्धंकर्तव्यमितिवदंति।तदूषणंका
लतत्वविवेचनेद्रष्टव्यं।तेनकृष्णत्रयोदशीमात्रेपुत्रवद्गृहिणात्रयोदश्यांब
हुप्रजाइतिवचनविहितंबहुपुत्रेछयाश्राध्धंनकर्तव्यं।भाद्रपदकृष्णत्रयो
दश्यांतुपित्रवर्गमात्रस्यनकर्तव्यं।मातामहवर्गस्यापि।तत्रापिपिंडदानंन
कर्तव्यं।किंतुब्राह्मणभोजनमात्रंमधुघृतशुतपायसंसामान्यविशेषरू
पविधिनिषेधवचनानांव्यवस्थासिद्धा।अस्मिन्पक्षेकेवलमघापिश्राद्ध

कालः।तथाचवसिष्ठः।पितापितामहश्चैवतथैवप्रपितामहः।उपासते
सुतंजातंपिप्पलंन्नाकुनाइव।मधुमांसैश्चन्नाकैश्चपयसापायसेनच॥
एवंनोदास्यतिश्राद्धंवर्षासुचमघासुचेति।इदंचाविभक्तैरपिपृथक्का
र्यं।तथाचहेमाद्रौ।विभक्तावाविभक्तावाकुर्युःश्राद्धंपृथक्सुताः।मघा
सुचततोन्यत्रनाधिकारःपृथग्विनेति।नित्यंचात्रश्राद्धं।प्रोष्ठपद्यामतीता
यांतथाऽऽश्वयुज्यांत्रयोदश्यामुपक्रम्य।एतांस्तुश्राद्धकालान्वैनित्यानाहप्रजाप
तिः।श्राद्धमेतेषुकुर्वाणोनरकंप्रतिपद्यतइतिविष्णुधर्मोत्तरात्।इयमेव ७५

योगविशेषेणगजच्छाया।तदुक्तंब्राह्मे।योगोमघात्रयोदश्यांकुंजरच्छाय
संज्ञकः। चन्द्रादित्यकैकरेस्थितइति॥अस्मिन्नेवपक्षेच
तुर्दश्यांदुर्मरणमृतानांश्राद्धंकार्यं।तथाचमरीचिः।विषसर्पश्वापदादिति
र्यग्ब्राह्मणघातिनां।चतुर्दश्यांक्रियाकार्याअन्येषांतुविगर्हितेति।नाग
रखंडे।अपमृत्युर्भवेद्येषांशस्त्रमृत्युरथापिवा।उपसर्गमृतानांवाविष
मृत्युमुपेयुषां।वह्निनाचप्रदग्धानांजलमृत्युमुपेयुषां।सर्पव्याघ्रहतानां
चशृंगेरुद्बंधनेरपि।शृंगेःशृंगिभिः।श्राद्धंतेषांप्रकर्तव्यंचतुर्दश्यांनरा

धिपेति।मार्कंडेयपुराणे।युवानःपितरोयस्यमृताःशस्त्रैर्वाहताः।तेनकार्यं चतुर्दश्यांतेषांतत्रिमभीप्सतेति।प्रायोऽनशानाख्यांतुविधितोपिमृतानांभवति।प्रायोनशनशस्त्राग्निविषोद्बंधनिनांतथा।चतुर्दश्यांभवेच्छ्राद्धमिति ब्रह्मपुराणात्।प्रायोमहाप्रस्थानं।युद्धमृतानांच।म्रियंतेपितरश्चास्यये चशस्त्रहतारणेइतिवृद्धमनुस्मरणात्।एतच्चशस्त्रघातादिनिमित्तंचतुर्दशीश्राद्धंपित्रादीनामप्येकोद्दिष्टमेवभवति।ननुपार्वणं।तथाचगार्ग्यः॥ चतुर्दश्यांतुयच्छ्राद्धंसपिंडीकरणात्परं।एकोद्दिष्टविधानेनतत्कार्यंशस्त्र

घातिनइति।पित्रादिषुत्रिष्वपिशस्त्रहतेषुसर्वेषामेकोद्दिष्टान्येवकार्याणि। पार्वणादिधायकवचनाभावात्।यत्तु।पित्रादयस्त्रयोयस्यशस्त्रघातादि भिर्मृताः।सभ्रातेपार्वणंकुर्यादाह्निकानिपृथक्पृथगितिवचनंतत्रामाणिकग्रंथेषदर्शनादनादरः।इदंचैकोद्दिष्टंसदैवकार्यं।प्रेतपक्षेचतुर्दश्यामेकोद्दिष्टविधानतः।देवयुक्तंतुतच्छ्राद्धंपित्रृणामक्षयंभवेदितिप्रयोगपारिजातोदाहृतवचनात्।यस्त्वेतस्यांचतुर्दश्यामेवमृतस्तस्यक्षयाहनिमित्तंश्राद्धंपार्वणमेवकर्तव्यं।अमावास्याक्षयोयस्यप्रेतपक्षेथवापुनः।पार्वे

एंनस्यकर्त्तव्यंनैकोद्दिष्टंकदाचनेतिविज्ञानेश्वरधृतवचनात्॥अमावास्या
यांविशेषमाह॥अपरार्केयमः॥हंसेकरस्थितेयातुअमावास्याकरा
न्विता॥सासेयाकुंजरछायाइतिवौधायनोब्रवीदिति॥आश्विन
शुक्लेप्रतिपद्यावाराजीवत्सितृकेणदौहित्रेणमहालयापरपक्ष
निमित्तंमातामहश्राद्धंकार्य्यंजातमात्रोपिदौहित्रोजीवत्यपिचमा
तुले॥कुर्यान्मातामहेश्राद्धंप्रतिपद्याश्विनेसितइति॥इदंचनाकरणं॥इ
यंसंगवव्यापिनीग्राह्या॥प्रतिपद्याश्विनेशुक्लेदौहित्रस्तुकुतूहलेन॥ ७७

श्राद्धंमातामहंकुर्यात्सपितासंगवेसतीतिवचनादितिनिर्णयदीपे॥इदमप्य
नाकरं॥इदंचमुंडनंपिंडदानंचेतिदक्षवचनेनजीवत्सितृकंप्रतिपिंडदान
निषेधादन्वष्टकावच्चविशेषवचनाभावात्पिंडरहितंकार्यमितिकेचित्॥अ
न्येतुनजीवत्सितृकंप्रतिपिंडदानमात्रमनेननिषिध्यते॥किंतु॥दर्शश्राद्धंग
याश्राद्धंश्राद्धंचापरपक्षिकं॥नजीवत्सितृकःकुर्यात्तिलैःकुत्रैश्चतर्पणं॥पि
त्र्यंजीवत्सितुर्नेष्टमित्यादिवचनैकवाक्यतयाश्राद्धमेवनिषिध्यते॥एवंचत
त्रविशेषवचनात्रान्नंश्राद्धंसपिंडमेवभवतीत्याहुः॥यदितुमहालयश्राद्धंदै

ववशादपरपक्षेनजातंतदाकार्तिकशुक्लामायां।येयंदीपान्विताराज्ञ्या
तापंचदशीभुविातस्यांदद्यान्नचेद्दत्तंपितॄणांतुमहालयेइतिवचनात्।य
द्यप्येतद्विधिर्मल्लिकाकर्तव्यताःमायामेवस्थितस्तथापिपतितशस्त्रहता
दिश्राद्धंकार्तिकशुक्लचतुर्दश्यामेवाचरंति।यद्यपिशस्त्रहतानांश्राद्धकर्म्म
णिचतुर्दशीशस्तेतिविष्णुवचनात्।चतुर्दशीमात्रेतच्छ्राद्धंकर्तव्यंतथापित
थातदकरणेभ्रमः।समाचारोवामूलमितिश्रीदत्तसमयदीपे॥ ॥अस्यामेव
नवरात्रव्रतारंभः॥ ॥तत्रव्रतस्वरूपंभविष्योत्तरे।एवंचविंध्यवासिन्यानव ७८

रात्रोपवासतः।एकभक्तेननक्तेनस्वशक्त्यायाचितेनच।पूजनीयाजनैर्देवी
स्थानेस्थानेपुरेपुरे।गृहेगृहेशक्तिपरैर्ग्रामेग्रामेवनेवने।स्नातैःप्रमुदितैर्हृ
ष्टैर्ब्राह्मणैःक्षत्रियैर्नृपैः।वैश्यैःशूद्रैर्भक्तियुक्तैर्म्लेछैरन्यैश्चमानवैः।स्त्री
भिश्चकुरुशार्दूलतद्विधानमिदंशृणु।देवीपुराणेपि।कन्यासंस्थेरवौ
शुक्लामाश्विनेप्राप्यनंदिकां।अयाचीतस्थवैकाशीनक्ताशीवायवाद्यदः।भू
मौशयीतचामंत्र्यकुमारीर्भोजयेन्मुदा।वस्त्रालंकारदानेश्चसंतोष्याःप्रति
वासरं।बलिंचप्रत्यहंदद्यादोदनंमांसमाषवत्।त्रिकालंपूजयेद्देवींजपस्तो

त्रपरायणइति।अत्रदेवीपूजाप्रधानमुपवासादिकमंगं।पूजयित्वाश्विनेमा
सिविशोकोजायतेनरः।एवमन्येरपिसदादेव्याकार्यंप्रपूजनं।विभूतिमतु
लांलभ्यचतुर्वर्गप्रदायकामित्यादौपूजायाएवफलसंबंधात्।अत्रप्रतिपदः
खंडलेकेचित्तावत्सरविद्धाग्राह्येत्याहुः।तथाहिचोक्तंमार्कंडेयदेवीपुराणयोः।
पूर्वविद्धातुयाशुक्लाभवेत्प्रतिपदाश्विनी।।नवरात्रव्रतंतस्यांनकार्यंशुभमिच्छ
ता।देशभंगोभवेत्तत्रदुर्भिक्षंचोपजायते।नंदायांदर्शयुक्तायांयत्रस्यान्मम
पूजनमिति।तथा।अमायुक्तानकर्तव्याप्रतिपत्पूजनेमम।मुहूर्तमात्राकर्त ७९

व्याद्वितीयादिगुणान्विता।तथा।नदर्शकलयायुक्ताप्रतिपच्चंडिकार्चने।।
उदयेद्दिमुहूर्तापिग्राह्यासोदयगामिनीति।शुद्धाधिकातुपूर्वैवग्राह्या।सं
पूर्णत्वादमायोगाभावाच्च।यदाचामाविद्धाप्रतिपत्परदिनेनास्तितदाविद्धा
पिग्राह्या।एतद्विषयाएवअमायुक्ताप्रकर्तव्येतिनृसिंहप्रसादोदाहृतव
चनानि।मातामहचरणेस्कंमाधवहेमाद्याधुक्तनक्तव्रतत्वात्।तस्यपाक्षि
कत्वादंगत्वाच्च।किंतुपूजारूपस्यप्रधानस्यनक्तकालसाध्यत्वात्।तच्च।नि
शिथमंतिभूतानिव्राक्तयःशूलभद्यतद्व्याद्दिसामान्यवचनात्।आ

श्विनेमासिमेघांतेप्रतिपद्यातिथिर्भवेत्।तस्यांनक्तंप्रकुर्वीतरात्रौदेवींप्र
पूजयेत्।तथा।रात्रिव्रतमिदंदेविसर्वपापप्रणाशनं।रात्रिव्रतमिदंतस्यरा
त्रौकर्तव्यतेष्यतेइत्यादिपुराणादिवचनेभ्यश्चावगम्यते।एवंचपूजारूपस्य
प्रधानस्यरात्रिकालत्वेस्थितेकर्मणोयस्मयःकालस्तत्कालव्यापिनीतिथि
रितिवचनात्प्रदोषव्यापिनीप्रतिपन्नवरात्रव्रतेग्राह्या।तत्रपूर्वदिनएवप्रदो
षव्याप्तौपूर्वा।एतद्विषयाएवअमयुक्तैवकर्तव्याप्रतिपच्चंडिकार्चने।न
ग्राह्यापरसंयुक्ताशुद्धसंतानकांक्षिभिरितिनृसिंहप्रसादोदाहृतवचनानि। ८०

लल्ल संहितायामपि।द्वितीयाशेषसंयुक्ताप्रतिपच्चंडिकार्चने।मोहादथोप
दिशाद्वाकृतापुत्रविनाशकृत्।आरंभेनवरात्रस्यद्वितीयात्रुटिसंमिता।नकेव
लंतिथिंहंतिवेधात्सापुत्रसंपदं।तथा।द्वितीयादिकलोपेताप्रतिपच्चंडिकार्चने।
वर्जनीयाप्रयत्नेनविषलेशोयथांभसि।धवलनिबंधेदेयुराच।प्रतिपछेषसं
युक्तद्वितीयायांममार्चनं।कृतंधर्मनाशयतिसंततिंपुत्रपौत्रिकीं।अमायुक्तै
वसाग्राह्याप्रतिपच्चंडिकार्चने।अन्यथाकरणेतावद्दान्यभंगःप्रजायतइति।
दिनद्वयेतद्व्याप्तावुत्तरा।दिनद्वयेतद्व्याप्तावप्युत्तरैवसायाङ्गरूपगौण

कालव्याप्ति लाभात्।एतद्विषयाएवद्वितीयायुक्तविधायकान्यमा
युक्तनिषेधकानिवचनानिद्विमुहूर्तापीत्यपिशब्देनकेमुत्यन्यायप्रदर्शना
त्कलादिशब्दाश्चविरुद्धाः।यत्तुआद्यास्तुनाडिकास्त्याज्याःषोडशद्वादशा
पिया।अपरार्द्धेचकर्तव्यंशुद्धंतत्तिथिकांक्षिभिरितिवचनंतदाद्यषोडशना
डीस्कलध्यायःकुरुतेनरः।कलशस्थापनंतत्रअरिष्टंजायतेध्रुवमितिव
चनांतरैकवाक्यतयाकुलाचारप्राप्तकलशस्थापनविषयं।एवंद्वितीयावि
द्धप्रतिपद्विधायकानिअमायुक्तनिषेधकानिवचनानिवस्तुतस्तद्विषया ८१

एवव।अमायुक्तासदाचैवप्रतिपन्निंदितातथा।तत्रचेत्स्थापयेत्कुंभंदुर्भिक्षं
जायतेध्रुवं।प्रतिपत्सहितीयातुकुंभारोपणकर्मणीतिरुद्रयामलेवचनात्।
यदपिप्रारब्धंनवरात्रंस्याद्विचित्रांचवेधतिमितिवचनंतदपि।त्वष्टवेधति
युक्ताचेत्प्रतिपच्चंडिकार्चने।तयोरंतेविधातव्यंकलशारोपणंगुहेतिवचनात्क
लशस्थापनविषयमेव।तत्रविशेषउक्तःकात्यायनेना।प्रतिपदाश्विनेमासि
भवेद्वैधृतिचित्रया।आद्यपादोपरित्यज्यप्रारभेन्नवरात्रकं।भविष्ये।।चि
त्रावैधृतिसंयुक्ताप्रतिपच्चेद्भवेन्नृप।त्याज्यास्तंशास्त्रयस्त्राद्यास्तुरीयांशो

तुपूजनमिति।तथारुद्रयामले।संपूर्णाप्रतिपद्देवचित्रायुक्तायदाभवेत्।
वैधृत्यावापियुक्तास्यात्तदामध्यंदिनेरवौ।अभिजित्तुमुहूर्तंयत्तत्रस्थाप
नमिष्यतइति।तथा।नरात्रौस्थापनंकार्यंनचकुंभाभिषेचनं।विष्णुधर्मे।
भास्करोदयमारभ्ययावत्तुदृश्यनाडिकाः।प्रातःकालइतिख्यातःस्थापना
रोपणादिषिति।रुद्रयामले।स्थानंमंगलिकंकृत्वाततोदेवीप्रपूजयेत्।शु
भाभिर्मृत्तिकाभिश्चपूर्वंकृत्वातुवेदिकां।यवान्वेवापयेत्तत्र गोधूमांश्चा
पिसंयुतान्।तत्रसंस्थापयेत्कुंभंविधिनामंत्रपूर्वकं।सोवर्णंराजतंवापि ८२

नाम्नेत्मन्मयजंतुवेति।देवीपूजाचजयंतीमंत्रेणकार्या।जयंतीमंगलाकाली
भद्रकालीकपालिनी।दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते।अनेने
वतुमंत्रेणजपहोमादिकारयेदितिदेवीपुराणात्।दुर्गालिंगकोवैदिकश्चाग
मिकोवा।तल्लिंगैःपूजयेन्मंत्रैःसर्वदावासमाहितइत्यग्निपुराणात्।प्रण वादि
चतुर्थ्यंतंनमोंतंनामवा।नाम्नासर्वंसमापयेदितिसाधारणवाक्यात्।पूजाच
षोडशोपचारैःपंचोपचारैर्वान्येश्चराजोपचारैश्छत्रचामरादिभिः।साच
त्रिकालंप्रदोषेविशेषेणपूजानंतरंचमार्कंडेयपुराणादिगतंदेवीमाहात्म्ये

पठेच्छृणुयाद्वा।माहात्म्यंभगवत्याश्चपुराणादिषुकीर्तितं।पठेच्चशृणुयाद्वा
पिसर्वकामसमृद्धयेइतिवचनात्।तथा।एकोनराप्तिरुद्धातुनवमीयावदेव
हि।चंडीपाठंजपेद्वापिजापयेद्वाविधानतइति।श्रवणंचब्राह्मणादेवकर्तव्यं।
वाचकंब्राह्मणंविद्वान्मान्यवर्णंजमादरात्।इतिभविष्यपुराणात्।पौरा
णस्तोत्रपाठश्चनारायणादीन्नमस्कृत्यकर्तव्यः।नारायणंनमस्कृत्यनरंचै
वनरोत्तमं।देवीसरस्वतींव्यासंततोजयमुदीरयेत्।इतिवचनात्।जयशब्दा
र्थश्चभविष्ये।अष्टादशपुराणानिरामस्यचरितंतथा।विष्णुधर्मादिशास्त्रा ८३

णिशिवधर्माश्चभारत।कार्ष्णेचपंचमोवेदोयन्महाभारतंस्मृतं।त्रैवाश्वध
र्माराजेंद्रमानवोक्तामहीपते।जयेतिनाम्नेतेषांप्रवदंतिमनीषिणइति॥पा
ठप्रकारश्चमत्स्यसूक्ते।प्रणवंचादिजप्त्वास्तोत्रंवासंहितांपठेत्।अंतेचप्रण
वंदद्यादित्युवाचादिपूरुषः।सर्वत्रपाठेविज्ञेयोह्यन्यथाविफलंभवेत्।शुद्धे
नान्यचित्तेनपठितव्यंप्रयत्नतः।नकार्योसक्तमनसाकार्यंस्तोत्रस्यवाचनं।
आधारेस्थापयित्वातुपुस्तकंप्रजपेत्सुधीः।हस्तसंस्थापनादेवयस्मादल्प
फलंभवेत्।स्वयंचलिखितंयत्नुयतिनालिखितंचयत्।अब्राह्मणेनलिखि

तंतंचापिविफलंभवेत्।ऋषिछंदादिकंन्यस्यपठेत्स्तोत्रंविचक्षणः।स्तोत्रेनद
श्यतेयत्रप्रणवन्यासमाचरेत्।संकल्पितस्तोत्रपाठेसंख्यांकृत्वापठेत्सुधीः॥
अध्यायंप्राप्यविरमेन्नतुमध्येकदाचन।कृतेविरामेमध्येतुअध्यायादिपठे
त्पुनरिति।दुर्गामंत्रंवैदिकमागमिकंवाजपेज्जापयेद्वा।दुर्गायैनोजपेन्मंत्रमेक
चित्तःसमाहितः इतिदेवीपुराणात्।कुमारीपूजनंचप्रत्यहंयथाशक्तिएक
द्यादिक्रमेणकार्यं।तत्प्रकारश्चदेवीपुराणे।ब्रह्मोवाच।नतथातुष्यतेशक्रो
मद्भानजपेनतुकुमारीभोजनेनात्रयथादेवीप्रसीदति।अत्रनवरात्रे।प्रशा ८४

स्यपादौसर्वासांकुमारीणांचवासव।सुलिप्तेभूतलेरम्येतत्रताआसनेस्थि
ताः।पूजयेद्गंधपुष्पैश्चवस्त्रैश्चापिमनोरमैः।पूजयित्वाविधानेनभोज
नंतासुदापयेत्।खंडलड्डुगुडंसर्पिर्दधिक्षीरंसमाक्षिकं।तासांदेयंकुमारी
णांशनैर्भुंजापयेत्ततः॥ पानीयंयाचितंदेयमन्नंवायाचितंशुभं।तास्तृ
प्तास्तुयदासर्वास्तदाचमनंददेत्।आचम्यचाक्षतान्दत्वातयाक्षंतव्यमि
युत।दातुःशिरसिदातव्याःकन्यकाभिरथाक्षताः।तेनापिप्रणिपातस्तुक
र्तव्योभक्तिपूर्वकः।अनेनविधिनाशक्रदेवीक्षिप्रंप्रसीदति।ददातिविविधा

न्कामान्मनोभीष्टान्सुराधिप।राज्यंकृत्वाततःपश्चाद्देवलोकंचगच्छतीति।
स्कांदे।एकैकांपूजयेत्कन्यांएकरुद्रध्यानतथैवच।द्विगुणंत्रिगुणंवापिप्रसे
कंनवकंवरं।नवभिर्लभतेभूमिमैश्वर्यंद्विगुणंनतु।एकरुद्र्याल्लभेत्क्षे
ममेकैकेनश्रियंलभेत्।एकवर्षातुयाकन्यापूजार्थेतांविवर्जयेत्।गंधपु
ष्पफलादीनांप्रीतिस्तस्यानविद्यते।द्विवर्षकन्यामारभ्यदशवर्षावधि
क्रमात्।तासांचक्रमेणकुमारिकात्रिमूर्तिकल्याणीरोहिणीकालीचंडि
कांशांभवीदुर्गासुभद्रेतिनामान्युक्तानि।स्कांदे।कुमारिकाद्विवर्षातुत्रि ८५

वर्षातुत्रिमूर्तिनी।चतुर्वर्षातुकल्याणीपंचवर्षातुरोहिणी।षड्वर्षातुभवेत्का
लीसप्तवर्षातुचंडिका।अष्टवर्षाशांभवीतुदुर्गातुनवभिःस्मृता।दशवर्षा
सुभद्रेतिनामभिःपरिकीर्तिता।अतऊर्ध्वंतुयाकन्यासर्वकार्येषुवर्जिता।आ
सांक्रमेणफलान्याहसएवादुःखदारिद्र्यनाशायशत्रूणांनाशनायच।आ
युष्यबलरुद्ध्यर्थंकुमारीपूजयेन्नरः।आयुष्कामस्त्रिमूर्तिंतुत्रिवर्गस्यफला
प्तये।अपमृत्युव्याधिपीडादुःखानामपनुत्तये।सौख्यधान्यधनारोग्यपुत्र
पौत्राभिवृद्धये।कल्याणीपूजयेद्यो मान्नित्यंकल्याणवृद्धये।आरोग्यसुख

कामीतुधनकामस्तथैवच।यशस्कामीनरोनित्यंरोहिणीपरिपूजयेत्।विधा
थश्चजयार्थश्चराज्यार्थश्चविशेषतः।शत्रूणांचविनाशार्थं कालिकांपू
जयेन्नरः।संग्रामेजयकामीचचंडिकांपरिपूजयेत्।सबलोत्कटशत्रूणा
मुग्रसाधनकर्मणि।दुर्गादुर्गार्तिनाशायपूजयेद्यत्नतोबुधः।सौभाग्यधन
धान्यादिवांछितार्थफलाप्तये।सुभद्रांपूजयेन्मर्त्यादासीदासविवृद्धये।पू
जाप्रकारश्चतत्रैव।प्रातःकालेविशेषेणकृताभ्यंगोविशेषतः।आवाहयेत्ततः
कन्यांमंत्रेणानेनभार्गव।मंत्राक्षरमयींलक्ष्मीमातृणांरूपधारिणी।नवदु ८६

र्गात्मिकांसाक्षात्कन्यामावाहयाम्यहं।आवाहनमंत्रः।ततःसंपूजयेद्धीमान्
मंत्रैरेभिःपृथक्पृथक्।पूजामंत्रः।जगत्पूज्येसर्ववंद्येसर्वशक्तिस्वरूपिणि।
पूजांगृहाणकौमारिजगन्मातर्नमोस्तुते।कुमार्यैः।त्रिपुरांत्रिपुराधारांत्रिव
र्गज्ञानरूपिणीं।त्रैलोक्यवंदितांदेवींत्रिमूर्तिंपूजयाम्यहं।त्रिमूर्तैः।कलात्मि
कांकलातीतांकारुण्यहृदयांशिवां।कल्याणजननींनित्यंकल्याणीपूजया
म्यहं।कल्याण्यैः।अणिमादिगुणाधारमकाराक्षरात्मिकां।अनंतशक्ति
कांलक्ष्मींरोहिणीपूजयाम्यहं।रोहिण्यैः।कामचारींशुभांकांतांकालचक्रस्वरू

पिणी।कामदांकरुणोदारांकालींसंपूजयाम्यहं।कालयाः।चंडचारांचंडमायांचंड
मुंडप्रभंजिनीं।पूजयामिसदादेवीचंडिकांचंडविक्रमां।चंडिकायाः।सदानंदक
रींशांतांसर्वदेवनमस्कृतां।सर्वभूतात्मिकांलक्ष्मींशांभवीं पूजयाम्यहं।शांभ
व्याः।दुर्गमेदुस्तरेकार्येभवदुःखविनाशिनीं।पूजयामिसदाभक्त्यादुर्गांदुर्गति
नाशिनीं।दुर्गायाः।सुंदरींस्वर्णवर्णाभांसुखसौभाग्यदायिनीं।सुभद्रांजननींदे
वींसुभद्रांपूजयाम्यहं।सुभद्रायाः।एवमभ्यर्चनंकुर्यात्कुमारीणांप्रयत्नतः।कंचु ८७
केश्चैववस्त्रैश्चगंधपुष्पाक्षतादिभिः।नानाविधैर्भक्ष्यभोज्यैर्भोजयेत्सायसा

दिक्षिः।हीनाधिकांगींकुष्ठादिविकारांदुष्कुलांतथा।ग्रंथिस्फुटितगर्भो
द्भवांरक्तपूयव्रणांकितां।जात्यंधांकेकरींकाणांकुरूपांतनुरोमशां।संत्यजेद्रोगि
णींकन्यांदासीगर्भसमुद्भवां।अरोगिणींसुपुष्टांगींसुरूपांव्रणवर्जितां।एकवं
शसमुद्भूतांकन्यांसम्यक्प्रपूजयेत्।ब्राह्मणीसर्वकार्येषुजयार्थेनृपवंशजां॥
लाभार्थेवैश्यवंशोत्थांसुतार्थेशूद्रवंशजां।दारुणेचांत्यजातींतांपूजयेद्विधि
नानरइति।क्वचित्तुसर्वासामेकएवमंत्रउक्तः।मंत्राक्षरमयींलक्ष्मींमातृणां
रूपधारिणीं।नवदुर्गात्मिकांसाक्षात्कन्यामावाहयाम्यहमिति॥अत्रवेदपारा

यणमुक्तंरुद्रयामले।एवंचतुर्वेदविदोविप्रान्सर्वान्प्रसादयेत्।तेषांचवरणं
कार्यंवेदपारायणायवाइति।तथादेवीपुराणे।यदाचेदिवसेकुर्याच्चंडिका
पूजनादिकं।द्विगुणंतद्द्वितीयेह्नित्रिगुणंतत्रेहनि।नवमीतिथिपर्यंतं
दृष्ट्वापूजाजपादिकमिति।अन्यत्रोक्तोपूजादिकमन्येनकारणीयं।स्वयंवाप्य
न्यतोवापिपूजयेत्पूजयीतवेतिदेवीपुराणात्।इदंचशुक्लास्वादावपिकार्यं।
नष्टेशुक्रेतथाजीवेसिंहस्थेचबृहस्पतौ।कार्योचैवस्वदेवार्चाप्रत्यहंकुल
धर्मतइति धर्मप्रदीपात्।अत्रसाश्वस्याश्वपूजनमुक्तंमदनरत्नोद्धृतेदे ८८

वीपुराणे।आश्वयुक्शुक्लप्रतिपत्स्वातियुक्तेसुशोभने।पूर्वमुच्चैःश्रवानाम
प्रथमंसूर्यमावहत्।तस्मात्साश्वैर्नरैस्तत्रपूज्योसौश्रद्धयान्वितैः।पूजनीया
श्चतुरगानवमीयावदेवहि।शांतिस्वस्ययनंकार्यंतदातेषांदिनेदिने।धान्यं
भल्लातकंकुष्ठंवचासिद्धार्थकांस्तथा।पंचरंगेणसूत्रेणकंठेतेषांतुबंधयेत्।।
वायव्येवीरुणैःसौरैःशाक्रैर्मंत्रैःसवैष्णवैः।वैश्वदेवैस्तथाग्नेयैर्होमःकार्योदि
नेदिने।तुरगारक्षणीयास्तुपुरुषैःशस्त्रपाणिभिः।दारिद्र्यतःक्वचित्तत्रनचवा
ह्याःकथंचनेति।तथाज्येष्ठायोगेपुरातत्रगजाश्चाष्टोमहाबलाः।पृथिवीम

वहन्पूर्वंसशैलवनकाननां।कुमुदेरावणःपद्मः पुष्पदंतोथवामनः।सुप्र
तीकोंजनोनीलस्तस्मात्तांस्तत्र पूजयेत्। शाक्राद्दक्षात्समारभ्यनवम्यंतंच पू
र्ववदिति।अत्रैवप्रतिपदाद्यष्टमीपर्यंतंजयार्थिनानृपेणलोहाभिसारिकाख्यं
कर्तव्यं।तथाचभविष्योत्तरे।जयाभिलाषी नृपतिःप्रतिपत्प्रभृतिक्रमात्।लो
लाभिसारिकंकर्मकारयेद्यावदष्टमी।प्रागुदक्प्रवणेदेशेपंताकाभिरलंकृतं।
मंडपंकारयेद्दिव्यंनवसप्तकरंशुभं।षोडशकरमित्यर्थः।आग्नेय्यांकारयेत्कु
ंडंहस्तमात्रंसुशोभनं।मेखलात्रयसंयुक्तंयोन्याश्चैवसलाभया।राजचिह्ना ८९

निसर्वाणिशस्त्राण्यस्त्राणियानिच।आनीयमंडपेतानिसर्वाण्येवाधिवासयेत्॥
ततस्तुब्राह्मणैःस्नातःशुक्लांबरधरःशुचिः।ओंकारपूर्वकैर्मंत्रैस्तल्लिंगैर्जुहुया
द्धृतं।लोहनामाभवत्पूर्वंदानवःसुमहाबलः।सदेवैःसमरेक्रुद्धैर्बहुधाशकलीं
कृतः।तदंगसंभवंसर्वंलोहंयद्दृश्यतेक्षितौ।लोहाभिसारिकंकर्मतेनेतदृषिणा
स्मृतं।शास्त्रास्त्रमंत्रैर्होतव्यंपायसंघृतसंयुतं।हुतशेषंतुरंगाणांराजान्नमुपहा
रयेत्।बद्धपक्षायनांस्तत्रगजाश्वान्समलंकृतान्।भ्रामयेन्नगरेनित्यंनंदिघोष
पुरःसरान्।प्रत्यहंनृपतिःस्नात्वासंपूज्यपितृदेवताः।पूजयेद्राजचिह्नानिफल

माल्यानुलेपनैः।हुतशेषंप्रदातव्यमोपनायनिकेगजे।तस्याभिहरणाद्राज्ञोविजयःस
मुदाहृतः।पूजामंत्रान्प्रवक्ष्यामिपुराणेऽस्मानहंतव।यैःपूजिताःप्रयछंतिकीर्तिमायुर्य
शोबलं॥ ॥यथाचंद्रश्छादयतिशिवायेमांवसुंधरां।तथाछादयराजानंविजयारोग्य
वृद्धये।इतिछत्रमंत्रः॥ ॥गंधर्वकुलजातस्त्वंमाभूयाःकुलदूषकः।ब्रह्मणःसत्यवा
क्येनसोमस्यवरुणस्यच।प्रभावाच्चहुताशस्यवर्धयस्वतुरंगम।तेजसाचैवसूर्य
स्यमुनीनांतपसातथा।रुद्रस्यब्रह्मचर्येणपवनस्यबलेनच।स्मरत्वंराजपुत्रंच
कौस्तुभंचमणिंस्मर।यांगतिंपितृहागछेद्ब्रह्महामातृहातथा।भ्रूमिहानृतवा ९०

दीचक्षत्रियश्चपराङ्मुखः।सूर्यचंद्रमसोवायुर्यावत्स्थयंतिदुष्कृतं।व्रजत्वंतां
गतिंक्षिप्रंतवपापंभवेत्तदा।निष्क्रांतोयदिवाछेनोयुद्धेऽश्वनितुरंगम।रिपून्
विजित्यसमरेसहभर्त्रासुखीभव॥अश्वमंत्रः॥ ॥शक्रकेतोमहावीर्यश्यामव
र्णार्चयाम्यहं।पतत्रिन्वेनतेयत्वंतथानारायणध्वज।काश्यपेयामृतत्रातर्ना
गारेविष्णुवाहन।अप्रमेयदुराधर्षरणेदेवारिसूदन।गरुत्मन्मारुतगतिस्त्व
यिसंनिहितायतः।अस्त्रचर्मायुधान्यत्रस्वंचरिपून्दह॥ ॥ध्वजमंत्रः॥ ॥कु
मुदैरावणःपद्मःपुष्पदंतोथवामनः।सुप्रतीकोंजनोनीलएतेवैदेवयोनयः॥

तेषांपुत्राश्चपौत्राश्चवनान्यष्टौसमाश्रिताः।भद्रोमंदोमृगश्चैवराजासंकीर्णएव
च।वनेवनेप्रसूतास्तेस्मरयोनिंमहागज ।यूथानिसुमहांतिचेतिमदनरत्नेपाठः।
यांतुत्वांवसवोरुद्राआदित्याःसमरुद्गणाः।भर्तारंरक्षना गेंद्रस्वामीचप्रतिपा
ल्यतां।अथाभुहिजयंयुद्धेगमनेस्वस्तिनोव्रज।श्रीस्तेसोमाद्बलंविष्णोस्तेजः
सूर्याज्जवोनिलात्।स्थैर्यंमेरोर्जयंरुद्राद्धीर्यंदेवात्पुरंदरात्।युद्धेरक्षंतुनागा
श्वदिग्नाश्वसहदेवतेः।अश्विनोसहगंधर्वैःपांतुत्वांसर्वतःसदा॥॥गजमंत्रः॥
हुनभुग्वसवोरुद्रावायुःसोमोमहर्षयः।नागाःकिंनरगंधर्वायक्षभूतगणा ९१

ग्रहाःप्रमथःसुमहादेव्योमृतेशोमातृभिःसह।शक्रःसेनापतिःस्कंदो
वरुणश्चाश्रितास्तयि।प्रदहंतुरिपून्सर्वान्त्राजाविजयमृछतु।यानिप्रयु
क्तान्यरिभि र्दूषणानिसमंततः।पतंत्युपरिशत्रूणांहतानितवतेजसा।काल
नेमिवधेयद्वत्तद्वत्त्रिपुरघातने।हिरण्यकशिपोर्युद्धेयुद्धेदेवासुरेतथा।शोभि
तासितथेवाद्यशोभयासमयंस्मर।नीलांश्वेतामिमांदृष्ट्वानश्यंत्वाशुनृपार
यः।व्याधिक्षिर्विविधेर्घोरैःशस्त्रैश्चयुधिनिर्जिताः।सद्यःस्वस्थाभवंतस्मा
त्तद्धातेनोपमार्जिताः।पूतनारेवतीगौरीकालरात्रीतियास्मृता।

दहत्वाशुरिपून्सर्वान्यताकेत्वंमयास्मृता॥इतिपताकामंत्रः॥ ॥असिर्विश्रामनःखड्गोविकर्मोचदुरासदः।श्रीगर्भोविजयश्चैवधर्मधारस्तथैवच॥इत्यष्टोतवनामानिस्वयमुक्तानिवेधसा।कृत्तिकाऋक्षमाहुस्तेगुरुर्देवोमहेश्वरः॥हिरण्यंचशरीरंतेधातादेवोजनार्दनः॥पितापितामहोदेवस्तन्मांपालयसर्वदा॥इयंयेनधृताश्रोणीहतश्चमहिषासुरः॥तीक्ष्णधारायखड्गायतस्मैशुभायतेनमः॥खड्गमंत्रः॥ ॥शर्मप्रदस्त्वंसमरेवर्मसर्वायसोहृदि।रक्षमांरक्षणीयोहंनहंतव्योनमोस्तुते।वर्ममंत्रः॥ ॥दुंदुभेत्वंसपत्नानांघोषाद्धृदयकंपनः।भव ९२

भूमिपसेन्यानांतथाविजयवर्द्धनः॥यथाजीमूतघोषेणप्रहृष्यंतिसुबर्हिणः॥तथास्तुतवशब्देन हर्षोस्माकंमुदावहः॥यथाजीमूतशब्देनस्त्रीणांत्रासोभिजायते॥तथाचतवशब्देनत्रस्यंत्वस्मद्विषोरणे॥इतिदुंदुभिमंत्रः॥ सर्वायुधमहामात्रसर्वदेवारिसूदन॥शिवभूतोसिसेन्यानांतथाविजयवर्द्धनः॥चापमांसर्वदारक्षसाकंसायकसत्तमैः॥धृतंरुष्णेनरक्षार्थंसंहारार्थंहरेणच॥त्रयीमूर्तिगतंदेवंधनुरस्त्रंनमाम्यहं॥चापमंत्रः॥ ॥पुण्यस्त्वंशंखपुण्यानांमंगलानांचमंगलं॥विष्णुनाविधृतोनित्यमतःशांतिप्रदोभव॥शंखमंत्रः॥

शशांककरसंकाशहिमडिंडीरपांडुर॥प्रोत्सारयाशुदुरितंचामरामरवल्लभ॥
चामरमंत्रः॥सर्वायुधानांप्रथमानिर्मितासत्वयाकिना।शूलायुधाग्न्निष्क्र
यस्त्वामुष्टिग्रहंशुभे।चंडिकायाःप्रदत्तासिसर्वदुष्टनिबर्हिणी॥तयाविस्ता
रिताचासिदेवानांप्रतिपादिता।सर्वसत्वांगभूतासिशुंभासुरनिबर्हिणी॥छु
रिकेरक्षमांनित्यंशांतिंयछनमोस्तुते॥छुरिकामंत्रः॥ ॥प्रोत्सारणायदुष्टानां
साधुसंग्रहणायच॥ब्रह्मणानिर्मितश्चापिव्यवहारप्रसिद्धये।यशोदेहिसुखं
देहिजयदोभवभूपतेः।तापयाशुरिपून्सर्वान्हेमदंडनमोस्तुते॥कनकदंडमंत्रः॥ ९३

विजयोजयदोनामरिपुघ्नोतिप्रियंकरः।सुखदोधर्मदःशांतःसर्वारिष्टविना
शनः।एतेष्टौसंनिधौप्रोक्तास्तवसिंहामहाबलाः।तेनसिंहासनेनित्यंविप्रैर्दे
वगीयसे।त्वयिस्थितःशिवःशांतस्त्वयिशक्रःसुरेश्वरः।त्वयिस्थितोहरिर्देव
स्त्वदर्थंतप्यतेतपः।नमस्तेसर्वतोभद्रसर्वदोभवभूपतेः।त्रैलोक्यजयसर्वस्व
सिंहासननमोस्तुते॥सिंहासनमंत्रः॥ ॥लोहाभिसारिकंकर्मशूले वंमंत्र
पूर्वकमिति॥प्रतिपदादिपूजाप्रकारविशेषोभविष्ये।केशसंस्कारद्रव्याणि
प्रदद्यात्प्रतिपद्दिने॥पट्टदोरंद्वितीयायांकेशसंयमेहनवे।दर्पणंचतृतीया

यांसिंदूरालक्तकंतथा॥मधुपर्केचतुर्थ्यांतुतिलकंनेत्रमंडनं।पंचम्यामंगराग
चशक्त्यालंकरणानिच।षष्ठ्यांबिल्वतरौबोधंसायंसंध्यासुकारयेत्।सप्त
म्यांप्रातरानीयगृहमध्येप्रवेशयेत्।उपोषणमथाष्टम्यामात्मशक्त्याचपू
जनं।नवम्यामुग्रचंडायाःपूजांकुर्याद्विलंतथा।संपूज्यप्रेषणंकुर्याद्दशम्यां
शाबरोत्सवैः।अनेनविधिनायस्तुदेवींप्रीणयतेनरः।स्कंदवत्पालयेत्तंतु
देवीसर्वापदिस्थितमिति॥उपवासेस्त्रीणांविशेषः॥मनुः॥पुष्पालंकारव ९४
स्त्राणिगंधधूपानुलेपनं।उपवासेनदुष्यंतिदंतधावनमज्जनं॥हेमाद्रौगारु

डे॥गंधालंकारतांबूलपुष्प माल्यानुलेपनं।उत्तरार्धंतुपूर्ववत्।अत्राविधवा
यास्त्रियाइतिप्रकृतं।मात्स्ये॥अंतरातुरजोयोगेपूजामन्येनकारयेत्।एवमाद्यो
चेपिसूतकात्प्राक्समारब्धमनेकाहंतु यद्व्रतं।कायिकंतत्तुकुर्वीतनतु
दानार्चनंजपं।सूतकाहेतुयत्किंचिद्दानाद्यंतरितंभवेत्।सूतकानंतरेतत्क्रित
त्कर्तव्यमतंद्रितैरितिवचनात्॥॥आश्विनशुक्लपंचम्यांउपांगललिताव्रतं
दक्षिणायेषुप्रसिद्धं॥तदुक्तं॥शुक्लपक्षस्यपंचम्यामीषेमासिचरेद्व्रतं।ग
र्जितेसंध्ययोस्यान्यंदिनरुद्रोक्षयेतथा।निर्वर्त्यावश्यकंकर्मशुचीरागविव

र्जितः। चत्वारिंशत्तथाचाष्टोकल्पितानिविधानतः। दंतकाष्ठान्युपादायत
डागंवानदीव्रजेत्। दंतधावनपूर्वाणिमज्जनानिसमाचरेत्॥ आयुर्बलंय
शोवर्चःप्रजाः पशुवसूनिच। ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते॥ मुख
दुर्गंधिनाशायरदानांचविशुद्धये। ष्ठीवनापचगात्राणंकुर्वेहंदंतधावनं॥
नंत्रः॥ ततोयथाविधिस्नात्वाशुक्लवासागृहंव्रजेत्॥ शुचौदेशेमंडपिकांकृ
त्वातिमनोहरां। सौवर्णीप्रतिमांकृत्वास्थापितांतत्रपूजयेत्॥ अथदूर्वांकु
रान्सायांश्चत्वारिंशत्तथाऽधिकान्। हस्तआदायमंत्रमेतंजपेद्बुधः॥ ९५

बूढुप्ररोहासततंममृताहरितालता। यथेयंललितेमानस्तथामेस्युर्मनोर
थाः। दूर्वापू जामंत्रः॥ इत्युक्त्वापूजयेद्देवीमेवमेवंविधंसुधीः। चत्वारिंशति
कृत्वस्तुअष्टकृत्वःसमाचरेत्। ततोवाणकमादायविंशत्यावटकादिकं। पठ्य
मानेनमंत्रेणआचार्यायनिवेदयेत्। तत्रमंत्रः॥ उपांगललितादेव्याव्रतसंपू
र्तिहेतवे। वाणकंद्विजवर्यायसहिरण्यंददाम्यहं॥ ततःकथांसमाकर्ण्यवाण
कांनस्यसंख्यया। स्वयमद्यात्तदेवान्नंवाग्यतःसहबांधवैः। रात्रौजागरणं
कुर्यान्नृत्यगीतादिमंगलैः॥ प्रभातेपूजयेद्देवींतनःकुर्याद्विसर्जनं। तत्रमंत्रः॥

सवाहनाशक्तियुतावरदापूजितामया।मातर्ममानुग्रह्याद्यगम्यतांनिजमंदि
रं।तामर्चेगुरवेदद्यान्निशिवास्याद्विसर्जनं।व्रतमेवंतुयःकुर्यात्सुतवान्ध
नवान्भवेत्।विद्यावान्त्रोगनिर्मुक्तःसुखीगोमांश्चजायते।अवैधव्यंचलभ
तेस्त्रीकन्यावरमुत्तमं।विजयंपुष्टिमायुष्यंयच्चान्यदपिवांछितमिति।आव
श्यकंप्रातःस्नानादि॥अत्राष्टचत्वारिंशद्दूर्वाकुरान्हस्तेगृहीत्वामंत्रेणपूजये
दित्युक्तएवमेवंविधांपूजामष्टचत्वारिंशद्वारंसमाचरेदितिवचनादेकैकाद्
क्तोअष्टचत्वारिंशद्दूर्वाविज्ञायंते।स्वयमद्यान्नदेवान्नमितिअन्नांतरपरिसं ९६

ख्याश्रूयते।नचत्रैदोष्यं।एवकारेणान्यनिवृत्तेरुक्तत्वात्।अत्रह्येवावपंती
तिवत्।अत्रकेचित्व्रतस्यास्यफलंप्रोक्तंजागरेमुनिसत्तमाइतिवचनाज्जाग
रणंप्रधानंतेनरात्रिव्यापिनीग्राह्येति।वस्तुतस्तुव्रतस्यजागरभिन्नत्वेनप्रती
तस्येव जागरेसतिफलसंबंधाभिधानात्तस्यांगत्वमेव।वचनंतुइतरांगापेक्ष
यावश्यकत्वद्योतनार्थं।युगभूतानामितियुग्मवा क्यात्।चतुर्थ्यसंयुताकार्या
पंचमीपरयानतु।दैवेकर्मणिपित्र्येचशुक्लपक्षेतथासितेइतिहारीतवचनात्।
शुक्लाजागरणेनक्तंचंद्रायार्घ्यंव्रतेतथा।तारावतेपुमर्घंपुरात्रियोगेविशिष्य

तइतिवचनाच्चपूर्वविद्धाग्राह्येतितुवक्तुंयुक्तं।ममतुप्रतिभातिपूजाव्रतेषुसर्वे
षुमध्याह्नव्यापिनीतिथिरितिवचनान्मध्याह्नव्यापिनीग्राह्या।उभयत्रतथात्वे
तथात्वेवापूर्वोदाहृतवचनेभ्यःपूर्वेति॥।आश्विनशुक्लसप्तमीबृहन्नंदिकेश्वरादिः।
अस्मिन्पक्षेमूलनक्षत्रेसरस्वतीस्थापनमुक्तंदेवीपुराणे।मूलेषुस्थापनंदेव्याः
पूर्वाषाढासुपूजनं।उत्तरासुबलिंदद्याच्छ्रवणेनविसर्जयेत्।इतिरुद्रयामले।मूल
ऋक्षेसुराधीशापूजनीयासरस्वती।पूजयेत्तत्रहंदेवयावद्वेष्यावमृक्षकं।नाध्या
पयेन्नचलिखेन्नाधीयीतकदाचनापुस्तकेस्थापितेदेवविद्याकामोद्विजोत्तमइ ९७

ति।षष्ठ्यादिपक्षेयुक्तः।कालिकापुराणे।बोधयेद्विल्वशाखायांषष्ठ्यांदेवीं
फलेषुच।सप्तम्यांबिल्वशाखांतामाहृत्यप्रतिपूजयेत्।पुनःपूजांतथाष्टम्यां
विशेषेणस माचरेत्।जागरंचस्वयंकुर्याद्बलिदानंमहानिशि।प्रभ
तबलिदानंचनवम्यांविधिवच्चरेत्।ध्यायेद्दुर्गांभुजांदेवींदुर्गामंत्रेणपूजयेत्।
विसर्जनंदशम्यांतुकुर्याद्वेशाखरोत्सवैः।धूलीकर्दमनिक्षेपैःक्रीडाकौतुकमंग
लैः।भगलिंगाभिधानेश्चभगलिंगप्रगीतकैरिति।देवीपुराणे।ज्येष्ठानक्ष
त्रयुक्तायांषष्ठ्यांबिल्वाभिमंत्रणं।सप्तम्यांमूलयुक्तायांपत्रिकायाःप्रवेशनं।

पूर्वाषाढायुताष्टम्यांपूजाहोमाद्युपोषणं।उत्तरेणनवम्यांतुबलिभिःपूजयेच्छि
वां।श्रवणेनदशम्यांतुप्रणिपत्यविसर्जयेत्।इति।अत्रनक्षत्रतिथीनांतत्तन्नक्ष
त्रयोगसंभवेफलातिशयार्थः।नतुसएवादरणीयः।तदुक्तंलेंगे।मूलाभावे
पिसप्तम्यांकेवलायांप्रवेशयेत्।तथातिथ्यंतरेष्वेवमृक्षेरुक्तेफलोच्चयः।देव
लः।तिथिनक्षत्रयोर्योगेहयोरेवानुपालनं।योगाभावेतिथिर्ग्राह्यादेव्याःपूज
नकर्मणीति।सप्तम्यादिपक्षोभविष्ये।व्रतीप्रपूजयेद्देवींसप्तम्यादिदिनत्रयइ
ति।भविष्योत्तरेपि।त्रिरात्रंवापिकर्त्तव्यंसप्तम्यादियथाक्रममिति।अष्टमीन

वम्योरेववापूजनंकर्त्तव्यं।अष्टम्यांचनवम्यांचजन्ममोक्षप्रदांशिवां।पूजयित्वाश्वि
नेमासिविशोकोजायतेनरइतिवचनात्।केवलाष्टमीपूजोक्ताब्राह्मे।तत्राष्टम्यां
भद्रकालीदक्षयज्ञविनाशिनी।प्रादुर्भूतामहाघोरायोगिनीकोटिभिःसह।अ
तोर्थेपूजनीयासातस्मिन्नहनिमानवैः। उपोषितैर्धूपदीपवस्त्रैर्माल्यानुलेप
नैरिति।।अयंचकेवलाष्टम्युपवासःपुत्रवतोनिषिद्धः।उपवासंमहाष्टम्यांपुत्रवा
न्नसमाचरेत्।यथातथैवपूतात्माव्रतीदेवींविसर्जयेदितिकालिकापुराणात्।
केवलानवमीपूजाभविष्ये।लब्ध्वाभिषेकावरदाभुक्तेचाश्वयुजस्यच।तस्मा

त्सातत्रसंपूज्यानवम्यांचंडिकाबुधैरिति।उपवासोप्यस्यामुक्तः।तस्मादियंमहापु
ण्यानवमीपापनाशिनी।उपोष्यातुप्रयत्नेनसततंसर्वपार्थिवैरिति।पत्रिकापूजा
यामाश्विनकृष्णानवम्यांबोधनासामर्थ्येनवरात्रांतर्गतषष्ठ्यांतत्कर्तव्यं।षष्ठ्यां
बिल्वनरोबोधंसायंसंध्यासुकारयेदितिभविष्यवचनात्।अतएवषष्ठीसायंसं
ध्याव्यापिनीग्राह्या।आमंत्रणंतुपत्रीप्रवेश्यव्यवहितपूर्वदिनेकार्यं।पत्रीप्रवे
शास्तूर्वेद्युःसायाह्नेबिल्वशाखिनी।चंडीमामंत्रयेद्विद्वान्नात्रषष्ठीपुरस्क्रिये
तिमत्स्यसूक्ते।ज्येष्ठावाप्यथवाषष्ठीसायंकालेनचेद्भवेत्।सायमेवतथापिस्या ९९

द्बिल्वशाखाग्निमंत्रणं।पूर्वांषष्ठींसनक्षत्रांसायंप्राप्तामपित्यजेत्।यदातुपत्रिका
पूजानपरेद्युर्भविष्यति।संनिरूप्यंतुयत्पूर्वंपत्रिकादिवसस्यतु।तद्दिनेवरणंकृत्वा
परेह्णारबोधंप्रवेशयेदिति।पत्रिकापूजायांसप्तम्यादितिथित्रयंप्रातःकालीनमुत्तरो
त्तरतिथिविद्धमेवग्राह्यं।भगवत्याःप्रवेशादिविसर्गांताश्चयाःक्रियाः।तिथावुद
यगामिन्यांसर्वास्ताःकारयेद्बुधइतिनंदिकेश्वरपुराणात्।अष्टमीतुप त्रीपूजा
तिरिक्तेपिदेवीपूजनेनवमी विद्धैवग्राह्या।वसुरंध्रयोरितियुग्मवाक्यात्॥
शारन्महाष्टमीपूज्यानवमीसंयुतासती।सप्तमीसंयुतानित्यंशोकसंतापकारिणी।

१००

सप्तमीशल्यसंयुक्तांमोहादज्ञानतोपिवा। महाष्टमीप्रकुर्वाणोनरकंप्रतिपद्यतइ
तिमदनरत्नधृतस्मृतिसंग्रहाच्च। स्मृतिसमुच्चये। सप्तमीशल्यसंविद्धावर्जनीया
सदाष्टमी। श्लोकापिसातिथिःपुण्यायस्यांसूर्योदयोभवेत्। दुर्गोत्सवे।मूलेना
पिहिसंयुक्तासदास्याज्याष्टमीबुधैः। लेशमात्रेणसप्तम्याअपिस्याद्यदिदूषि
ता। अतएवगौरीव्रतीयावदेव। अष्टम्याअल्पसप्तमीयोगेनत्याज्यत्वं। अल्पा
यामप्युत्तरस्याअष्टम्यायाग्राह्यत्वंइष्टव्यं। यदातुपरदिनेनवमीसूर्योदयंनस्पृ
शतिनदाष्टमीसप्तमीविद्धैवग्राह्या। यदासूर्योदयेनस्यान्नवमीचापरेहनि। १००

तदाष्टमींप्रकुर्वीतसप्तम्यासहितांनृपेतिस्मृतिसंग्रहात्। तथा। अहंभद्राचभ
द्राचनावयोरंतरंक्वचित्। तस्माद्वैसप्तमीविद्धाकार्यादुर्गाष्टमीतिथिरित्यादीन्ये
तद्विषयाएवेव। इयंभौमेअनिप्रशस्ता। अष्टम्यामुदितेसूर्येदिनांतेनवमीभ
वेत्। कुजवारोभवेत्तत्रपूजनीयाप्रयत्नतइतिमदनरत्नधृतवचनात्। अत्रवि
शेषेणपूजांकुर्यात्। पुनःपूजांतथाष्टम्यांविशेषेणसमाचरेत्। जागरंचस्वयंकु
र्याद्बलिदानंमहानिशीतिकालिकापुराणात्। बलिदानप्रकारोदेवीपुराणे। क
न्यासंस्थेरवौशुक्लेशुक्लाष्टम्यांप्रपूज्यतु। द्रोणपुष्पैश्चबिल्वाग्रैजातीपुंनाग

चंपकैः।पंचाब्दंलक्षणोपेतंगंधपुष्पसमन्वितं।विधिवत्कालिकालीनिंज त्वा
खड्गेनघातयेत्॥मंत्रस्तु॥ॐकालिकालियज्ञेश्वरि लोहदंडायेनमइतिनद
क्तं रुधिरंमांसंगृहीत्वापूतनादिषु।नैर्ऋतेभ्यःप्रदातव्यंमहाकौशिकमंत्रितं॥
मंत्रोवश्यतेकालिकापुराणे।उत्तराभिमुखोभूत्वाबलिंपूर्वमुखंतथा।निरी
क्ष्यसाधकःपश्चादिमं मंत्रमुदीरयेत्।पशुस्त्वंबलिरूपेणममभाग्यादुपस्थि
तः।प्रणमामितनःसर्वरूपिणंबलिरूपिणं।चंडिकाप्रीतिदानेनदातुरापद्वि १०१
नाशनं।चामुंडाबलिरूपायबलेतुभ्यंनमोस्तुते।यज्ञार्थेपशवःसृष्टाःस्वयमेव

स्वयंभुवा।अतस्त्वांघातयिष्यामितस्माद्यज्ञेवधोवधः।ऐंह्रींश्रीमितिमंत्रेण
तंबलिंमत्स्वरूपिणं।चिंतयित्वाग्यसेत्पुष्पंमूर्ध्नितस्यतुभैरव।अभिषिच्यब
लिंपश्चात्करवालंतुपूजयेत्।रसनालंचंडिकायाःसुरलोकप्रसाधकं।क्रींह्रींख
ड्गेतिमंत्रेणध्यात्वाखड्गंचपूजयेत्।पूजयित्वाततःखड्गंश्रींह्रींफडितिमंत्रकैः॥
गृहीत्वाविमलंखड्गंछेदयेद्बलिमुत्तमं।श्रींह्रींऐंह्रींकौशिकीतिरुधिरेणाप्या
यतामिति।स्थानेनियोजयेद्रक्तंशिरश्चसप्रतिदीपकं।एवंदत्वाबलिंपूर्णफ
लंप्राप्नोतिसाधकः।बलिदानेनुदुर्गायाःसर्वत्रैवंविधिःस्मृतइति॥इदंचबलि

दानं अग्नीषोमीयपशुहिंसान्यायेनधर्म्यमपिक्षत्रियादिविषयमेव। ब्राह्मणस्य
तु सात्त्विकीजपयज्ञाद्यैर्नैवेद्यैश्चनिरामिषैरितीयमेवपूजाभवति। तस्यसात्त्विक
र्मत्वेवाधिकारस्यभगवद्गीतादिषुप्रसिद्धत्वात्स्पष्टमुक्तंराजकर्तृकतंदेवीपुरा
णे। तदर्धयामिनीशेषेविजयार्थंनृपोत्तमः। पंचाङ्गलक्षणोपेतंगंधधूपस्रगर्चि
तं। विधिवत्कालिकालीतिजस्वारवङ्गेनघातयेदिति। एवंसुरयास्वगात्ररुधिरेण
चपूजाब्राह्मणस्यनभवति। स्वगात्ररुधिरंदत्वाब्रह्महत्यामवाप्नुयात्। मद्यंदत्वा
ब्राह्मणस्तुब्राह्मण्यादेवहीयतइतिकालिकापुराणात्। माषभक्तादीनांतुब्रा १०२

ह्मणस्यबलिदानंभवति। माषकुल्माषमांसाद्यैर्योदि – क्रुर्बलिर्निशि। कूष्मां
डमिक्षुदंडश्चमद्यंवैमांसमेवच। एतेबलिसमाज्ञेयास्तृप्तौछागसमाःस्मृताइ
तिकालिकापुराणात्। एतेष्वपिब्राह्मणस्यमद्यमांसव्यतिरिक्तमेवभवति। राज
सीबलिदानाद्यैर्नैवेद्यैःसामिषैस्तथेतिमांसबलिदानादेः राजसत्वाभिधा
नात्। रुद्रयामले। छागाभावेतुकूष्मांडंश्रीफलंवामनोहरं। वस्त्रसंवेष्टितंकृ
त्वाछेदयेच्छुरिकादिनेति। होमस्तु। पूर्वाषाढायुताष्टम्यांपूजाहोमाद्युपोषणा
मित्यष्टम्यां। नवम्यांबलिदानंचकर्तव्यंवेयथाविधि। जपहोमंचविधिवत्तु

र्यात्तत्रविस्तरइतिनवम्यांचविधानाच्छिष्टसमाचाराच्चाष्टम्यामारभ्यन
वम्यांसमापनीयोनवम्यामेववाकार्यः।होमद्रव्यंचाज्यतिलादि।पूजयेत्ति
लहोमेश्वरधिक्षीरघृतादिभिरितिदेवीपुराणात्।मंत्रश्चजयंतीत्यादिः।अने
नैवतुमंत्रेणाज पहोमादिकार्य्येदितिदेवीपुराणात्।केचित्तुमार्कंडेयपुराणग
तसप्तशतीस्तवेनप्रतिश्लोकंस्वाहाकारांतेनतिलसर्पिर्मिश्रपायसेनहोमंकु
र्वंति।प्रतिश्लोकंचजुहुयात्पायसंतिलसर्पिरितिरहस्याख्यग्रंथवचनंनत्रप्रमा
णमुपन्यस्यंति।रुद्रयामलेपि।प्रधानद्रव्यमुद्दिष्टंपायसान्नंतिलास्तथा।किं

शुकैःसर्षपैःपूगैर्लाजदूर्वांकुरैस्तथा।यवैर्वाश्रीफलैर्दिव्यैर्नानाविधफलैस्त
था।रक्तचंदनखंडैश्चगुग्गुलैश्चमनोहरैः।प्रतिश्लोकंचजुहुयात्सर्वद्रव्याणि
चक्रमादिति॥ ॥इतिमहाष्टमी॥ ॥आश्विनशुक्लनवमीमन्वादिः।इयंचनवमी
दुर्गापूजायामष्टमीविद्धाग्राह्या।युग्मवाक्यात्।श्रावणीदुर्गनवमीतथादूर्वाष्टमी
चयापूर्वविद्धैवकर्तव्याशिवरात्रिर्बलेर्दिनमितिरहस्यमवचनाच्च।तथाश्वयुक्
शुक्लपक्षेयाष्टमीमूलेनसंयुतासामहानवमीप्रोक्तेति।अस्यांपूजाहोमादिकृ
त्वाप्रभूतबलिदानंकार्यं।प्रभूतबलिदानंचनवम्यांविधिवच्चरेदितिकालिका

पुराणात्।यदातुनवम्यष्टमीविद्धाभूत्वाद्वितीयदिनेपिकियतीभवतितदानवमी
प्रयुक्तस्यपूजा देःपूर्वदिनेऽनुष्ठानेपिमहाबलिदानमात्रंद्वितीयदिनेकर्तव्यं।अ
ष्टम्यामुदिनेसूर्यैदिनांतेनवमीभवेत्।प्रभातेबलिदानेतुकियन्मात्रापिलभ्य
ते।नवम्यांतत्रसंपूज्यादुर्गादुर्गोर्तिनाशिनीतिवचनात्।अत्रपूजाबलिदानरू
पेव।सूर्योदयेपरेरिक्तापूर्णास्यादपरायदि।बलिदानंप्रकुर्वंतत्रदेव्याःश्रु
भावहं।बलिदानेकृतेऽष्टम्यांराष्ट्रभंगोभवेन्नृपेतिदेवीपुराणात्।इदंचबलि
दानंनवमीप्रयुक्तं।अष्टमीप्रयुक्तस्यनत्रैवकर्तव्यत्वात्।द्वितीयदिनेनवम्या १०४

श्लाघ्येतुपूर्वेद्युरेवनवमीमध्येकार्यं।दशम्यांबलिदानंतुदीयतेयत्रमानवैः।
तद्राष्ट्रंनाशमायातिमरकोपद्रवैःस्फुटमितिभविष्ये।नवमीप्रयुक्तस्यबलि
दानस्यदशम्यांफलंदोषश्च पुराणात्।एवंनवम्यांहोमकुमारीपूजनब्राह्मण
भोजनादिकृत्वादक्षिणांमाचार्यायदद्यात्।नवम्यांपूर्ववत्पूजाकर्तव्याभूमि
मिछता।दक्षिणांवस्त्रयुग्मंचश्राचार्यायनिवेदयेदितिमत्स्यसूक्तात्।विस
र्जनंतुदशम्यामेवकार्यं।संपूज्यप्रेषणंकुर्योद्दशम्यांशावरोत्सवेरितिभवि
ष्यपुराणात्।ततःसंप्रेषितादेवीदशम्यांशावरोत्सवैरितिकालिकापुराणा

व्रपारणास्यापिनियमत्यागरूपस्यविसर्जनोत्तरकालत्वात्तदपिविसर्जनोत्तरंदश्या
म्यामेवकर्तव्यं।अतएवहेमाद्रौधौम्यवचनेनवमीपर्यंतंव्रतमुक्तं।आश्विनेशुक्ल
पक्षेतुकर्तव्यंनवरात्रकं।प्रतिपदादिक्रमेणैवयावद्वनवमीभवेदिति।अन्यत्रा
पिनवमीतिथिपर्यंतंकृत्वापूजाजपादिकमिति।एवंविंध्यवामिन्यांनवरात्रोप च
वासतइतिभविष्योत्तरेच।यत्तुआश्विनेशुक्लपक्षेतुनवरात्रमुपोषितः।नवम्यां
पारणंकुर्याद्दशमीमिश्रितानचेदितिब्राह्मनाम्नाकेनचिल्लिखितंवचनंतदना
करं।प्रामाणिकदाक्षिणात्यनिबंधेषुप्राच्यनिबंधेषुचादर्शनादसंबद्धत्वाच्च १०५

अष्टमीविद्धायांनवम्यामुपवासविधानात्तन्मतेप्यष्टम्याउपोष्यत्वात्तत्रपार
णविधानस्यासंबद्धत्वं।यद्वायदाष्टमीविद्धानवमीत्रिमुहूर्तालभ्यतेतदापूर्वन
वम्यांनवमीकृत्ये सतिद्वितीयनवम्यांपारणाविधीयते।दशमीमिश्रितानचेदित्य
नेनतूत्तरनवम्यांनवम्यंतेप्राप्तायाःपारणायाःबाधेननवमीमध्यएवपारणावि
धीयते।यद्येदमष्टरात्रादिपक्षविषयमितिसंतोष्टव्यंनेवधौम्येनोक्ता।अथवान
वरात्रंचसप्तपंचत्रिकादिवा।एकभक्तेन नक्तेनायाचितोपोषितैःक्रमादिति।अ
त्रादिशब्देनाष्टरात्रद्विरात्रैकरात्रपक्षाःसंगृहीताःइत्युक्तंहेतुनिर्णये।तत्रैव

भविष्येपिप्रथमाद्वितीयातृतीयाचतुर्थ्यचनराधिप।एतासुएकभक्तेनप्रवदंतिमनीषिणः।पंचमीचतथाषष्ठीसप्तमीचाष्टमीषुच।उपवासपरोभूत्वापूजयेच्चंडिकांबुधइति।अत्रसप्तरात्रपक्षोरुद्रयामले।दुर्गोत्सवेस्मृतंदेवउपवासस्यसप्तकं।अष्टमेदिवसेहोमस्ततःकिंचित्तुभक्षयेदिति।पंचरात्रपक्षोभविष्ये।एकभक्तंतुपंचम्यांषष्ठ्यांनक्तंप्रवर्तयेत्।अयाचितंतुसप्तम्यामष्टम्यांसमुपोषितः।नवम्यांपारणंकुर्यादित्येवंपंचरात्रकमिति।अन्येपिपक्षाद्वैतनिर्णयेद्रष्टव्याः।नचनवरात्रंश्राद्धानुपपत्तिः।तस्यनवापिमतेपारिभाषिकत्वस्वीकारात्।येषांतु १०६

द्वितीयायुक्तप्रतिपदिकलशस्थापनंकृत्वातद्दिनमारभ्यकुलाचारयोग्यनवमीपूर्वदिनपर्यंतमुपवासपूर्वकंपूजादिकृत्वाकुलाचारयोग्यनवम्यांपूजाहोमब्राह्मणभोजनादिकृत्वापारणमित्येवंरूपकुलाचारस्तेषांभवतुतथैवानुष्ठानं।आचाराद्गृह्यमाणेषुतथास्यादितिन्यायात्।अत्रसप्तकादौपारणाकार्येयुक्तंरुद्रयामले।सप्तकेपारणंकुर्यान्नवम्यांहोमपूर्वकं।तदंतेभोजयेद्विप्रान्दानंदद्याच्चशक्तितइति।अंगिरास्तुनकार्यमित्याह।नियमस्थायदानारीप्रपश्येदंतरारजः।उपोष्यैवतुतारात्रीःस्नात्वाशोधंचरेद्व्रतमिति।अन्यत्रापिनियमस्थाव्रतस्थाचरजःपश्येत्कथंचन।

त्रिरात्रंतुक्षपेदूर्ध्वंव्रतशेषंसमापयेदिति।अत्राशौचग्रहणंरजोग्रहणंचोपलक्ष
णं।एवंचाचारतोव्यवस्थेतिकेचित्।सर्वेषामेषांनिर्मूलत्वादेकादशीव्रतवदत्रापि
सूतकमध्येपारणंकर्तव्यमित्यन्ये।ममतुप्रतिभाति।अत्रतुनवरात्रेहोमस्यपूजा
रूपत्वेनप्रधानत्वात्तस्यचानन्यसाध्यत्वेनाशौचेऽसंभवान्नतुदानार्चनंजपमिति
निषेधात्समाप्तिंविनाचनियमस्यौपवाससमाप्त्यसंभवादाशौचांतेहोमादि
पूर्वकंपारणंकर्तव्यं।प्राचीनशिष्टाचारोप्येवमेव।येस्तुहोमोनक्रियतेतेषां
भवत्येव॥ ॥अथसंक्षेपेणपूजाक्रमः॥ ॥प्रतिपदिप्रातरभ्यंगस्नानंकृत्वा १७७

सूर्यादिदेवताभ्योव्रतंनिवेद्याचम्यप्राणानायम्योदङ्मुखोवारिपूर्णेताम्रपा
त्रंगृहीत्वामासादिसंकीर्त्यश्रमुकफलकामःदेवीप्रीतिकामोवाद्यप्रभृतिनवमी
पर्यंतमुपवासादिनियमोपेतशारदनवरात्रविहितदेवीपूजात्मकंव्रतंकल
शस्थापनपूर्वकमसतिप्रतिबंधकेयथाशक्तिकरिष्येइतिसंकल्प्यशोभनेग्नि
हेचतुरस्रचतुर्हस्तवेदिकायांमहीद्यौरितिभूमिंस्पृष्ट्वातत्रौषधयःसमिति
यवान्निक्षिप्याकलशोद्विपंचाशत्कलशांसंस्थाप्येमंमेगंगेइतिशुद्धजलेनापूर्यगंध
द्वारामितिगंधयौषधीरितिसर्वौषधीःकांडात्कांडादितिदूर्वाःअश्वत्थेवइ

तिपंच पल्लवान्।स्योनापृथिवीतिसप्तमृदोयाःफलिनीरितिफलानिसहिर
ण्यानीतिपंचरत्नानिहिरण्यरूपइतिहिरण्यंचक्षिप्त्वायुवासुवासाइतिवस्त्रेण
सूत्रेणवावेष्ट्यपूर्णादर्वीतिपूर्णपात्रंनिधायतत्रवरुणमावाह्यसंपूज्यपूर्वस्था
पितप्रतिमायांनूतनायांवातदेवप्राणप्रतिष्ठापूर्वकंदेवीमावाह्यपूजयेत्।आ
वाहनमंत्रश्च।एहिदुर्गेमहाभागेरक्षार्थंममसर्वदा।आवाहयाम्यहंदेविसर्व
कामार्थसिद्धये।अस्यांमूर्तौसमागच्छस्थितिंमत्कृपयाकुरु।रक्षांकुरुमहा
भद्रेविश्वेश्वरिनमोस्तुते।सदाभगवतिदुर्गेइहागच्छेहतिष्ठसुप्रसन्नाभवे १०८

ति।ततोजयंतीमंगलाकालीभद्रकालीकपालिनी॥दुर्गाक्षमाशिवाधात्रीस्वाहा
स्वधानमोस्तुतेइतिमंत्रेण।ॐदुर्गायैनमःइदमासनमित्यादिप्रयोगेणासनपा
द्यार्घ्याचमनीयस्नानाचमनीयवस्त्राचमनीयगंधपुष्पधूपदीपनैवेद्यपुनराच
मनीयफलतांबूलदक्षिणादद्यात्।पुष्पमंत्रेविशेषः।अमृतोद्भवश्रीवृक्षोसंभ
वस्यसदाप्रियंबिल्वपत्रंप्रयच्छामिपवित्रंतेसुरेश्वरि॥द्रोणपुष्पमंत्रः।ब्रह्मावि
ष्णुशिवादीनांद्रोणपुष्पंसदाप्रियं॥ततोदुर्गेप्रयच्छामिसर्वकामार्थसिद्धये।ततो
नीराज्यपुष्पांजलित्रयंदत्वास्तुतिभिःस्तुत्वाप्रणम्यबद्धांजलिःप्रार्थयेदेभि

र्मंत्रैः।महिषघ्निमहामायेचामुंडेमुंडमालिनि।द्रव्यमारोग्यमैश्वर्यंदेहिदेवि
नमोस्तुते।कुंकुमेनसमालब्धेचंदनेनविलेपिते।बिल्वपत्रकृतापीडेदुर्गेहं
शरणंगतः।सर्वमंगलमांगल्येइति।एवमेवप्रत्यहंपूजनंदेवीगृहेचघृततै
लपूरितादीपाश्चहोरात्रंप्रज्वालनीयाः।वाद्यादिवादनंचकारणीयं।अत्राश
क्तस्यतुघंटावादनं।घंटाभवेदशक्तस्यसर्ववाद्यमयीयतइतिवचनात्।अष्ट
म्यामर्धरात्रेविशेषतःपूजनंगीतवाद्यादिनाजागरणंचनवम्यामेवमेवपूजयि
त्वाप्रभूतबलिदानंचकार्यं।होमश्चपूर्वोक्तप्रकारेणस्वगृह्योक्तविधिनाकार्यः। १०९

एवंनवमीपर्यंतंपूजाकुमारीभोजनादिकृत्वाऽऽचार्यायवस्त्रयुग्मंदक्षिणांचदत्वा
दशम्यांप्रातर्देवीपूर्ववत्संपूजयित्वास्तुवीत।तच्चस्तोत्रंलिख्यते।।दुर्गेशिवाशां
तिकरीब्रह्माणीब्रह्मणःप्रियां।सर्वलोकप्रणेत्रींचप्रणमामिसदाशिवां।मंगलां
शोभनांशुद्धांनिष्कलांपरमांकलां।विश्वेश्वरींविश्वमातांचंडिकांप्रणमाम्यहं।।
सर्वदेवमयींदेवींसर्वरोगभयापहां।ब्रह्मेशविष्णुनमितांप्रणमामिसदाउमां।।
विंध्यस्थांविंध्यनिलयांदिव्यस्थाननिवासिनीं।योगिनींयोगमातांचचंडिकांप्रणमा
म्यहं।।ईशानमानरंदेवीमीश्वरीमीश्वरप्रियां।प्रणतोस्मिसदादुर्गांसंसारार्णव

तारिणी।यइदंपठतिस्तोत्रंशृणुयाद्वापियोनरः।समुक्तःसर्वपापेभ्योदुर्गायास
हमोदतेइति।ततोबद्धांजलिर्महिषघ्नीत्यादिपूर्वोक्तमंत्रैःप्रार्थयित्वा।विधिही
नंक्रियाहीनंभक्तिहीनंयदर्चितं।पूर्णंभवतुतत्सर्वंतत्प्रसादान्महेश्वरीतिप्रसा
द्यक्षमस्वेत्युक्त्वाएकंपुष्पंगृहीत्वाऽंदुर्गायेनमइत्येतान्यांनिक्षिपन्विसृज्य।
उत्तिष्ठदेविचंडेशिशुभांपूजांप्रगृह्यच।कुरुष्वममकल्याणमष्टाभिःशक्ति
भिःसह।गच्छगच्छपरंस्थानंस्वस्थानंदेविचंडिके।व्रजस्तोतोजलेरुद्रेतिष्ठगे
हेचभूतयेइत्युत्थापयेत्।ततःस्तोतोजलसमीपंनीत्वा।दुर्गेदेविजगन्मातःस्व ११०

स्थानंगच्छपूजिते।संवत्सरेव्यतीतेतुपुनरागमनायवै।इमांपूजांमयादेवि य
थाशक्त्यानिवेदितां।रक्षणार्थंसमादायव्रजस्वस्थानमुत्तममितिस्तोतसिप्रवा
हयेत्।ततोगृहमागम्यशांतिकलशोदकेनब्राह्मणैरभिषिक्तोदुर्गापूजाप्रति
ष्ठासिद्ध्यर्थंब्राह्मणेभ्योदक्षिणांदत्वाब्राह्मणान्भोजयित्वाबंधुभिःसहभुंजी
तेति।पत्रिकापूजायांविशेषोऽन्यत्रमत्कृतोद्रष्टव्यं।।अस्यामेवदशम्यांराजाअ
थातःप्रस्थानंव्याख्यास्यामइत्यादिनागोपथब्राह्मणेनविवाहमुद्दिश्योक्तं
प्रास्थानिकविधिंकृत्वानत्रैवोक्तंप्रस्थानादिकंकुर्यात्।प्रास्थानिकविधिश्च

यथा।अथातःप्रस्थानंव्याख्यास्यामोराजन्येषुगमिष्यत्सुपार्थिवावानस्य
सादुंदुभयःस्युर्वीणाश्चोपवादयेरन्हृष्टाश्चलंकृताश्चास्रवदंतउदगयनेपू
र्वपक्षेपुण्यनक्षत्रेकेशश्मश्रुलोमनखानिवापयित्वासंभारानुपकल्पयित्वा
मेध्यंमुहूर्तमुपसमाधायशांतिप्रतिसरंकारयित्वावासोगंधान्स्रजश्चाबध्य
पुरःस्थातारंस्थापयित्वाकर्त्विग्भिर्लाजहोमंजुहोत्यभयेरपराजितेरायुष्यैःस्वस्त्य
यनैःशर्मवर्मभिर्जनवेदनेश्चहुत्वापार्थिवस्येतिमाप्रगामेतिचहुत्वाश्राग
छतागतस्येतीदंस्थालीपाकेनेष्ट्वाभातिष्ठजिष्णुरनृक्षराऋजवइतिपंथा ॥११॥

नमास्थायजयेदिमोपादोयतइंद्रयातारमिंद्रमाविदन्नभयंसोमोधेनुहस्प
तिर्नःपरिपातुपश्चादितिर्न्विष्णुकमान्क्रांतेतिप्रस्थानंयथाथापराजितर
शम्यांपूर्वोक्तविजयमुहूर्तेऽकप्रस्थानिकंइत्युपक्रम्यतदप्येतेश्लोकाः॥अलं
कृतोभूषितभृत्यवर्गःपरिष्कृतोत्तुंगतुरंगनागः।वादित्रनादप्रतिनादिताशःसु
मंगलाचारपरंपरास्त्री॥राजानिर्गत्यभवनात्पुरोहितपुरोगमः।प्रास्थानिक
विधिंकृत्वाप्रतिष्ठेत्पूर्वतोदिशि॥गत्वानगरसीमांतंवास्तुपूजांसमारभेत्।सं
पूज्यचाथदिक्पालान्पूजयेत्तथिदेवताः।मंत्रैर्वैदिकपौराणैःपूजयेच्चशमीत

रुं।अमंगलानांशमनीशमनीदुष्कृतस्यच।दुःस्वप्नशमनीधन्यांप्रपद्येहंशा
मीशुभां।ततःकृताशीःपूर्वस्यां दिशिविष्णुक्रमान्क्रमेत्।रिपोःप्रतिकृतिं
कृत्वाध्यात्वाचमनसाहितं।स्वरेणस्वर्णपुंखेनविध्येद्धृदयवर्म णि।दिशांवि
जयमंत्राश्चपठितव्याःपुरोधसा।एवमेवविधिंकुर्याद्दक्षिणादिदिशास्वपि।।पू
ज्यान्द्विजांश्चसंपूज्यसांवत्सरपुरोहितौ।गजवाजिपदातीनांप्रेक्षाकौतुकमाचरे
त्।जयमंगलशब्देनततःस्वभवनंविशेत्।नीराज्यमानःपुण्यानिगणिकाभिः
समंगलं।यएवंकुरुतेराजावर्षेवर्षेसुमंगलं।आयुरारोग्यमैश्वर्यंविजयंचस ११२

गच्छति।नाधयोव्याधयस्तस्यभवंतिनपराजयः।श्रियंपुण्यामवाप्नोतिवि
जयंचसदासुखीति।।ततोऽपराजितापूजांकुर्यात्सायथा।आश्विनशुक्लदश
म्यांक्षेमसिध्यर्थंयात्रायांविजयसिध्यर्थंचापराजितापूजांकरिष्यइतिसंक
ल्यचंदनादिलिखिताष्टदलमध्येॐअपराजितायैनमइत्यपराजितांत
र्दक्षिणतॐक्रियाशक्त्यैनमइतिजयांतद्वामतॐउमायैनमइतिविजयां
प्रतिष्ठाप्यॐअपराजितायैनमःॐजयायैनमःॐविजयायैनमइत्या
वाहनाद्युपचारैःसंपूज्यप्रणम्य।।चारुणासुरपद्मेनविचित्रकनकोज्वला।

जयादेवीशिवेभक्त्यासर्वकामान्ददातुमे। कांचनेनविचित्रेणकेयूरेणविभूषि
ता।जयप्रदामहामायाशिवभावितचेतसा।विजयाचमहाभागाददातुविजयं
मम।हारेणसुविचित्रेणभासत्कनकमेखला।अपराजितारुद्रतारुद्रातुविज
यंममेतिप्रार्थ्य।हरिद्रारक्तवस्त्रेदूर्वायुक्तसिद्धार्थकान्प्रदक्षिणंव लयाकारे
णाबध्य।सदापराजितेयस्मात्वंलतासूत्तमास्मृता।सर्वकामार्थसिद्ध्यर्थं
तस्मात्त्वांधारयाम्यहं।भवापराजितेदेविममसर्वसमृद्धये।पूजितायांत्व
यिश्रेयोममास्तुदुरितंहतमितितद्वलयमग्निमंत्र्य।जयदेवरदेदेविदश्र ११३

स्यामपराजिते।धारयामिभुजेदक्षेजयलाभाभिवृद्धये।बलमाधेहिवलय
मयिशत्रौपराजयं।त्वद्धारणाद्धवेयुर्मेधनधान्यसमृद्धयइतिमंत्रेणदक्षिण
बाहौधारयित्वाद्यांपूजांयथादेवियथाशक्त्यानिवेदितां।रक्षार्थंतुसमादा
यव्रजस्वस्थानमुत्तममितिविसर्जयेदिति।सर्वेचजनास्तस्यामपराह्णेग्रा
मसीमानमुल्लंघ्यापराजितांपूजयेयुः।तथापुराणसमुच्चये।दशम्यांचजनैः
सम्यक्पूजनीयाःपराजिता।ऐशानींदिशमाश्रित्यह्यपराह्णेप्रयत्नतइति।
तांचप्रार्थनावर्जंपूर्ववत्कुर्युः।आचाराद्ग्रामसीमानोबहिरीशानदिक्स्थ

तां। शमीं पूजयित्वा। अमंगलानांशमनीं शमनीं दुष्कृतस्यच। दुःस्वप्नशमनीं धन्यांप्रपद्येहंशमीं शुभामितिप्रार्थयेयुः॥ क्वचिदन्येपिमंत्राः। शमी शमयतेपापं शमीलोहितकंटका। धारिण्यर्जुनबाणानांरामस्यप्रियवादिनी। करिष्यमाणयात्रायांयथाकालंसुखंमया। तत्रनिर्विघ्नकर्त्रीत्वंभव श्रीरामपूजितेइति। तथा। गृहीत्वासाक्षतामार्द्रांशमीमूलगतांमृदं। गीतवादित्रनिर्घोषैरानयेत्स्वगृहंप्रति। ततोभूषणवस्त्रादिधारयेत्स्वजनैःसह इति। ज्योतिषेरुत्वानीराजनंराजाबलरद्धेयथाक्रमं। शोभनंस्वजनंपश्येन् ११४

जलगोगोष्ठसंनिधाविति। तत्रमंत्रः स्थितिनलेनीलग्रीवशुभग्रीवसर्वकामफलप्रदपृथिव्यामवतीर्णोसिखंजरीटनमोस्तुते। वसंतराजे। त्वंयोगयुक्तोमुनिपुत्रकस्त्वमदृश्यतामेमुनिशेखरुमेन। संदृश्यसेप्रावृषिनिर्गतायांत्वंखंजनाश्चर्यमयोनमस्ते। दर्शनफलंतिथितले। अश्वेषुगोषुगजवाजिमहोरगेषुशस्यप्रदःकुशलदःशुचिशाद्वलेषु। भस्मास्थिकेशनखलोमतुषेषुदृष्टोदुःखंददानिवदुशाःखलुखंजरीटइति। तत्रैव। विघ्नंब्रह्मणिकार्यसिद्धिरतुलाग्नेहुताशेभयंयाम्यामग्निभयंसुरद्विषिकलिर्लोभःसमुद्रालयेवा

यव्यांवरवस्त्रगंधमलिलंदिव्यांगनाचोत्तरेऐशान्यांमरणंध्रुवंनिगदितंदि
ग्लक्षणंरंजनइति।इमंचदशमीयद्युत्तरेवश्रवणयुक्तांतदेवोत्तरा।उद
येदशमीकिंचित्संपूर्णैकादशीयदि।श्रवणर्क्षंयदाकालेसातिथिर्विजयाभि
धा।श्रवणर्क्षंतुपूर्णेयांकाकुत्स्थःप्रस्थितोयतः।उल्लंघयेयुःसीमानंतद्दिन
र्क्षंततोनराइतिकाश्यपवचनात्।संपूर्णैकादशीतिवचनात्तदाकर्मकालव्या
प्तिर्नापेक्षिता।अन्यथासर्वपक्षेषुपूर्वा।दशम्यांतुजनैःसम्यक्पूजनीयाप
राजिता।ऐशानींदिशमाश्रित्यद्यपराह्णेप्रयत्नतइत्यपराह्णस्यकर्मकालत्वा ११५

भिधानात्॥॥आश्विनशुक्लैकादश्यांकार्तिकस्नानारंभ उक्तःपाद्मे।आश्विन
स्यतुमासस्ययाशुक्लैकादशीभवेत्।कार्तिकस्यव्रतानीहतस्यांवैप्रारभेत्सुधी
रिति।विष्णुनातुलासंक्रांतिमारभ्यकर्तव्यमित्युक्तं।तुलामकरमेषेषुप्रातःस्नायीस
दाभवेत्।हविष्यंब्रह्मचर्यंचमहापातकनाशनमिति।पूर्णआश्वयुजेमासिपौर्णी
मास्यांसमाहितइत्युक्त्वा।मासंसमग्रंपरयाचभक्त्यासमाप्यतेकार्तिकपौर्णमा
स्यामितिहेमाद्रिलिखितादित्यपुराणंपूर्णिमारंभेप्रमाणं॥आश्विनपौर्णमास्यां
कोजागरव्रतंमहार्णवे लेंगे।आश्विनेपौर्णमास्यांचरेज्जागरणंनिशि।कोमु तु
दीसासमाख्याताकार्यालोकैर्विभूतये।कोमुद्यांपूजयेल्लक्ष्मीमिंद्रमैरावतेस्थि

तं।सुगंधिर्निशिसद्देयश्चक्षेर्जागरणंचरेत्।निशीथेवरदालक्ष्मीःकोजाग
र्तीतिभाषिणी।तस्मैवित्तंप्रयच्छामिअक्षैःक्रीडांकरोतियः।नारिकेलैश्चपि
टकैःपितॄन्देवान्समर्चयेत्।बंधूंश्चप्रीणयेत्तेनस्वयंतदशनोभवेदिति।मद
नरत्ने।नारिकेलोदकंपीत्वाचक्षेर्जागरणंनिशि।तस्मैवित्तंप्रयच्छामिकोजा
गर्तिमहीतले इति।इदंचकोजागरव्रतंयद्दिनेपूर्णिमाप्रदोषनिशीथोभय
व्यापिनीतद्दिनेकार्यं।यदापूर्वेद्युर्निशीथव्याप्तिःपरेद्युःप्रदोषव्याप्तिस्तदाप
रेद्युःकार्यं।पूजारूपप्रधानकालव्याप्तिलाभात्।यदातुपूर्वेद्युर्निशीथव्या ११६

प्तिःपरेद्युर्नप्रदोषव्याप्तिस्तदापूर्वा।नक्तादिव्रतयोगेतुरात्रियोगोविशिष्य
तइतिवचनादितिस्मार्तार्चार्यचूडामणिप्रभृतयः।अत्रेवाश्वयुजीकर्मीहाश्व
लायनः।आश्वयुज्यामाश्वयुजीकर्मेति।आग्रयणस्यापिपूरर्दिविहितत्वात्य
दास्योपोर्णमास्यांक्रियतेतदाश्वयुजीकर्मणासहैवैकंतंत्रेणकर्तव्यमितिद अंग
त्तिरुत्।तंत्रतायामंगभूतक्रमलोपेनोभयोरपिवैगुण्यप्रसंगादाग्रयणा
स्यकालांतरसंभवेनतदंगीकारस्यानुचितत्वात्कालांतरएवतत्कर्तव्यापर्वो
तरेशुक्लपक्षेदेवनक्षत्रेषुवा।इदंचापदिमलेकार्यमन्यथानकार्यमित्याद्य

त्र
न्यइष्टव्यं।अस्याकरणेप्रायश्चित्तंकारिकायां।अकृताग्रयणेश्रीयान्नवान्नंय
दिवेनरः।वैश्वानरायकर्तव्यश्चरुःपूर्णाहुतिस्तुवेति।अस्यामेवदानविशेषोवि
ष्णुधर्मोत्तरे।आश्वयुज्यांकांस्यपात्रंघृतपूर्णंद्विजातये।ससुवर्णंतथादत्त्वादी
र्घोजास्त्विहजायते॥ ॥इत्याश्विनकृत्यं॥ ॥अथकार्तिकस्नानविधिः।तत्रस्नान
मंत्रः।कार्तिकेहंकरिष्यामिप्रातःस्नानंजनार्दन।प्रीत्यर्थंतवदेवेशदामोदरम
यासहेति।अर्घ्यमंत्रः।काशीखंडे।व्रतिनःकार्तिकेमासिस्नातस्यविधिवन्मम।
गृहाणार्घ्यंमयादत्तंदनुजेंद्रनिषूदन।निर्व्यूहेमित्तिकंरुद्रकार्तिकेपापनाशने। ११७

गृहाणार्घ्यंमयादत्तंराधयासहितोहरे।इमोमंत्रोसमुच्चार्यनरोयोर्घ्यंप्रयछ
ति।सुवर्णरत्नपुष्पांबुपूर्णेशंखेनपुण्यवान्।सुवर्णपूर्णांपृथिवीतेनदत्तानसं
शयइति।तत्रैव।स्नानंसमाप्तपस्नस्याकृतेयत्समवाप्यते।तत्कार्तिकेपंचनदेस
कृत्स्नानेनलभ्यते।कार्तिकेबिंदुतीर्थेयोब्रह्मचर्यपरायणः।स्नास्येतानुदितेभा
नोभानुज्ञातस्यभीःकुतइति।संपूर्णस्नानाशक्तौब्रह्मपुराणेकार्तिकमधिकृत्य।
एकादश्यादिषुतथातत्रपंचसुरात्रिषु।दिनेदिनेचस्नातव्यंशीतलासुनदीषु
चवर्जितव्यातथाहिंसामांसभक्षणमेवचेति।काशीखंडे।वाराणस्यांपंचन

देव्यहस्नानात्तुकार्तिके।अमीतेपुण्यवपुषःपुण्यभाजोतिनिर्मलाइति।त
त्रैव।कार्तिकेमासिमेयात्रायैःकृताभक्तितत्परैः।बिंदुनार्थकृतस्नानेस्ते
षांमुक्तिर्नदूरतः।पाद्मे।कार्तिकेनार्चितोयैस्तुकमलैःकमलेक्षणः।जन्मको
टिकृतंविप्रेंद्रनतेषांकमलागृहे॥नारसिंहे।विहायसर्वपुष्पाणिमुनिपुष्पेण
केशवं।कार्तिकेयोर्चयेद्भक्त्यावाजपेयफलंलभेत्।पाद्मे।तुलसीदललक्षे
णकार्तिकेयोर्चयेद्धरिं।पत्रेपत्रेमुनिश्रेष्ठलभतेमोक्षिकंफलं।स्कांदे।निवे
द्यकेशवेमालांतुलसीकाष्ठसंभवां।वहतेयोनरोभक्त्यातस्यनेवास्तिपातकं॥ ११८

विष्णुधर्मे॥स्त्रीत्तुयानिलोमानिधात्रीमालाक्षकोनृणां।तावद्वर्षसहस्त्रा
णिवेकुंठेवसतिर्भवेत्।मालायुग्मंतुयोनित्यंधात्रीतुलसिसंभवं।वहतेकंठ
देशेतुकल्पकोटिदिवंवसेत्।तुलसीकाष्ठसंभूतेमालेकृष्णजनप्रिये।बिभ
र्मितामहंकंठेकुरुमांकृष्णवल्लभं।एवंसंप्रार्थ्यविधिनामालांकृष्णगलेर्पितां।
धारयेत्कार्तिकेयोवेसगछेद्वैष्णवंपदं।स्कांदे।धात्रीछायांतुयःकुर्यात्पिंडदा
नंमहामुने।मुक्तिंप्रयांतिपितरःप्रसादंमाधवस्यतु।प्राप्यतिन्योपः।धात्री
फलविलिप्तांगोधात्रीफलविभूषितः।धात्रीफलकृताहारोनरोनारायणो

भवेत्। धात्रीफलाहारोजीर्णधात्रीफलविषयः। चातुर्मास्येनूतननिषेधस्य
दर्शितत्वात्। धात्रीछायांसमाश्रित्ययोर्चयेच्चक्रपाणिनं। पुष्येपुष्येश्वमेध
स्यफलंप्राप्नोतिमानवः। तथा। कार्तिकेवर्जयेत्तद्दिदलंबदुबीजकं। माषमुद्ग
मसूराश्चचणकाश्चकुलत्थकाः। निष्पावाराजमाषाश्चआढक्याद्विदलंस्मृ
तं। नूतनान्यपिजीर्णानिसर्वाण्येतानिवर्जयेत्। नारदीये। कार्तिकेवर्जयेत्तैलं
कार्तिकेवर्जयेन्मधु। कार्तिकेकृच्छ्रसेवीयः प्राजापत्यपरोपिवा। एकांतरोपवा
सीवात्रिरात्रोपोषितोपिवा। षड्रात्रादशपक्षंवामासंवावरवर्णिनीति। एकभ

क्तेननक्तेनतथै वायाचितेनवा। उपवासेनभैक्ष्येणव्रजतेपरमंपदं। काञ्जीरवे
ड्। र्जयेवान्नमश्नीयादेवान्नमथवापुनः। इंताकंसूरणंचैवश्रृङ्गीवींश्चवर्ज
येत्। नारदीये। अव्रतेनक्षपेद्यस्तुमासंदामोदरप्रियं। तिर्यग्योनिमवाप्नोतिना
त्रकार्यविचारणा। निर्णयामृतेपौष्करे। तुलायांतिलतैलेनसायंकालेसमागते।
आकाशदीपंयोदद्यान्मासमेकंहरिंप्रति। महतींश्रियमाप्नोतिरूपंसौभाग्य
संपदं। नहिधिर्हेमाद्रावादित्यपुराणे। दिवाकरेस्ताचलमौक्तिकस्तेगृहाददूरे
पुरुषप्रमाणं। यूपाकृतिंयत्तियवृक्षदारुमारोप्यभूमावथतस्यमूर्द्धि। कृता

श्वतस्रोष्टदलाकृतीस्तथाग्निर्मंवेदष्टदलानुसारी।तत्कर्णिकायांतुमहाप्रका
शोदीपःप्रदेयोदलगास्तथाष्टौ।निषेधधर्मापहरायभूम्येदामोदरायाथधर्म
राज्ञे।प्रजापतिभ्यस्त्वथसत्पितृभ्यःप्रेतेभ्यएवाथतमःस्थितेभ्यइति।कृत्यतत्वा
र्णवेनंदिपुराणे।योनरःकार्तिकेमासिमांसंतुपरिवर्जयेत्।संवत्सरस्यलभतेपुण्यं
मांसविवर्जनात्।तत्रैवब्रह्मांडपुराणे।विष्णुवेश्मनियोदद्याकार्तिकेमासिदीपकं।
अग्निष्टोमसहस्रस्यफलंप्राप्नोतिमानवः।वाराहपुराणे।नगृहेकार्तिकंकुर्याद्वि
शेषेणतुकार्तिकी।तीर्थेतुकार्तिकंकुर्यात्सर्वयत्नेनभामिनीति॥ ॥कार्तिकस्नान १२०

चतुर्थ्यांकृत्यविशेषःसंवत्सरप्रदीपे।आश्विनेकृष्णपक्षस्यचतुर्थ्यांरात्रियोगतः॥
मन्मयेवस्थितःपूर्ण्यारात्रौदशरथःस्त्रिया।दुर्गाचतत्रसंपूज्यासर्वसौख्यविवृद्धये।
आश्विनोत्रमुख्यश्चांद्रेणेतत्रैवोक्तं।इयंप्रदोषव्यापिनीग्राह्या।उभयत्रतथात्वप
रेतित्रैवोक्तं।इयमेवकरकाभिधासाचंद्रोदयव्यापिनीग्राह्यादिनद्वयेतथात्वेसंक
ल्पकालत्वात्सरा।कार्तिकस्यकृष्णासप्तमीवैकुंठकल्पादिः।कार्तिककृष्णाष्टमीकरका
भिधामहाराष्ट्रेषुन्येषुचप्रसिद्धासाचंद्रोदयव्यापिनीकार्या।कार्तिककृष्णाद्वादश्यां
गोवत्सद्वादशीव्रतं।तत्प्रदोषव्यापिन्यांकार्यं।नरोवायदिवानारीनक्तंसंकल्प्यचे

तसीत्युपक्रमेमाषान्नंकामतोश्नीयाद्रात्रौविगतमत्सरइत्यंतेचनक्तंभोजनपरामर्शी
न्।प्रतीक्षेतागमंभक्त्यागवांगोध्यानतत्परइतिगोष्ठगतासुसंध्यायांगोपूजाविधा
नाच्चदिनद्वयेप्रदोषसत्वेयुग्मवाक्याद्वत्सस्यपूजाशिवरात्रेरपापरविनिघ्नंतिनृपं
सराष्ट्रमितिवचनेनैतरविद्धानिषेधाच्चपूर्वोद्यात्या।तत्रकर्तव्यमुक्तंभविष्योत्तरे।स
वत्सांतुल्यवर्णांचशालिनींगांपयस्विनीं।चंदनादिभिरालिप्यपुष्पमालाभिरर्च
येत्।अर्घ्यंताम्रमयेपात्रेकृत्वापुष्पाक्षतेस्तिलैः।चंदनैःकुंकुमेर्गंधैःपुष्पैःकाल
ज्ञवेस्मृत्वापादमूलेतुदत्वाहेमंत्रेणानेनपांडव।मातारुद्राणामित्येषमंत्रःप्रोक्तो १२१

द्विजन्मनां।स्त्रीशूद्राणांमहाबाहोमंत्रोयंपरिकीर्तितः।क्षीरोदार्णवसंभूतेसुरासु
रनमस्कृते।सर्वदेवमयेमातर्गृहाणार्घ्यंनमोस्तुते।दत्वार्घ्यंतज्जलंपुण्यंसाक्षतंमू
र्ध्निनिक्षिपेत्।ततोमाषादिसंसिद्धान्वटकांश्चनिवेदयेत्।मंत्रः।सुरभिस्त्वंजगन्मा
तर्नित्यंविष्णुपदेस्थिते।सर्वदेवमयेग्रासंमयादत्तमिदंग्रस।प्रार्थनामंत्रः।सर्वदे
वमयेदेविसर्वदेवैरलंकृते।मातर्ममाभिलषितंसफलंकुरुनंदिनि।ततः।तद्दिने
नापिकापक्वंस्थालीपाकंयुधि ष्ठिर।गोक्षीरंगोघृतंचैवदधितक्रंचवर्जयेदि
ति।हेमाद्रावाग्नेये।कार्तिकःखलुवैमासःसर्वदेवमयोमहान्।कृष्णपक्षेविशेष

णतत्रपंचदिनानितु।पुण्यानितेषुयद्दत्तमक्षयंसार्वकामिकं॥नारदः।आश्विने
कृष्णपक्षेतुद्वादश्यादिषुपंचसु।तिथिपूक्तःपूर्वरात्रेनृणांनीराजनाविधिः।नी
राजयेयुर्दवांश्चविप्रांश्चैवतुरंगमान्।ज्येष्ठाज्येष्ठाञ्जघन्याश्चमान्मुख्याश्च
योषितइति।आश्विनग्रहणंमुख्यचांद्राभिप्रायेण।अमावास्यांतमासपक्षेणा
श्विनकृष्णत्रयोदश्यांयमोद्देशनसंध्याकालेबहिर्दीपदानंकार्यं।तदुक्तंस्कां
दे॥अश्वयुक्कृष्णपक्षेतुत्रयोदश्यांनिशामुखे।यमदीपंबहिर्दद्यादपमृत्युर्वि
नश्यति।तत्रमंत्रः॥मृत्युनापाशदंडाभ्यांकालेनामलयासह।त्रयोदश्यांदीप १२२

दानात्सूर्यजःप्रीयतांनमइति।कार्तिककृष्णचतुर्दश्यांप्रातरभ्यंगस्नानंकर्तव्यं।
तदुक्तंभविष्योत्तरे।कार्तिकेकृष्णपक्षेतुचतुर्दश्यांदिनोदये।अवश्यमेवकर्तव्यं
स्नानंनरकभीरुभिः।अपामार्गस्यपत्राणिभ्रामयेच्छिरसोपरि।अमावास्यांत
पक्षेणनारदसंहितायामपि।इयासितचतुर्दश्यामिंदुक्षयतिथावपि।उज्जीदोस्वा
तिसंयुक्तेतदादीपावली।भवेत्तैलेलक्ष्मीर्जलेगंगादीपावलितिथौवसेत्।अ
लक्ष्मीपरिहारार्थमभ्यंगस्नानमाचरेत्।इंदुक्षयेपिसंक्रांतावारेपातेदिनक्ष
ये।तत्राभ्यंगमदोषायप्रातःपापापनुत्तये इति।तत्रचतुर्दशीतावदभ्यंगेदिनो

दयप्रातःशब्दयोःसमानार्थत्वात्प्रातःकालव्यापिनीग्राह्या।क्वचिदिनोदयइतिप
ठित्वंतत्सूर्यसंवाद्येव।क्वचित्त्रायोदाक्षिणात्याचारसंवादीविधूदयइतिपाठः।त
दाचंद्रोदयकालिकीस्नानेग्राह्या।तत्रयापूर्वेवप्रातश्चंद्रोदयेवावर्ततेतावत्येवच
समाप्तातस्यांस्नानंयमतर्पणंचकार्यंतत्रश्चतर्पणंकार्यं धर्मराजस्यनामभिः।
यमायधर्मराजायमृत्यवेचांतकायचवैवस्वतायकालायसर्वभूतक्षयायच।
औदुंबरायदध्नायनीलायपरमेष्ठिनेवृकोदरायचित्रायचित्रगुप्तायतेन
मइति।भविष्योत्तरेऽभ्यंगस्नानानंतरंतर्पणविधानात्।तस्यकालविशेषा १२३

प्रातः नुक्तेश्च।यातुदिनद्वयेपिकालव्यापिनीतस्यांपूर्वस्यामेवस्नानादिकार्यसं
पूर्णतात्।भूयःकृत्यक्रमानुरोधाच्च।यादिनद्वयेपिकालास्पर्शिनीसापिपू प्रातः
र्वैवास्वकालादुत्तरःकालोगौणःपूर्वस्यकर्मणइति।उत्तरगौणकालव्यापित्वा
त्।पूर्वविद्धचतुर्दश्यांकार्तिकस्यसितेनरे।प्रत्यूषसमयेस्नानंकुर्यात्तत्रप्रय
त्नतइतिपृथ्वीचंद्रोदयधनवचनाच्च।प्रत्यूषसमयेप्रातःकाले।प्रत्यूषोहर्मु
खंकल्पमितिकोशात्युक्तंचेदंचंद्रोदयकालस्यमुख्यत्वात्प्रातःकालस्य
चगौणत्वाद्दिनद्वयेमुख्यकालव्याप्त्यभावेगौणकालव्यापित्वेनपूर्वस्यां

एवग्राह्यत्वमिति।स्नानंतुतत्कालेऽसत्यामपिचतुर्दश्यांचंद्रोदयएवभव
ति।तिथ्यादेश्चभवेद्यावन्नक्षासोदृद्धिःपरेहनि।तावान्ग्राह्यःसपूर्वेद्युरदृ
ष्टोपिस्वकर्मणीतिवचनादुत्तरतिथिक्षयप्रक्षेपेणशास्त्रतस्तत्रतिथेःस
त्वात्।अत्रस्नानेविशेषोब्रह्मपुराणे।अपामार्गमथोतुंबीप्रपुन्नाटमथाप
रं।भ्रामयेत्स्नानमध्येतुनरकस्यक्षयायवै।तत्रमंत्रः।सीतालोष्टसमायुक्त
सकंटकदलान्वित।हरपापमपामार्गभ्राम्यमाणपुनःपुनरितिमंत्रलिं
गात्सीतालोष्टस्यापिभ्रामणेपूर्वैःसाहित्यं॥यमतर्पणंचोपवीतिनाप्रा १२४

चीनावीतिनावाकार्यं।यज्ञोपवीतिनाकार्यंप्राचीनावीतिनाथवादेवतंचपि
तृत्वंचयमस्यास्तिहिरूपेतिवचनात्।हेत्वुक्तिबलाच्छुक्लतिलकृष्णतिल
सरुत्रिरावृत्यादिरूपधर्मविकल्पोद्रष्टव्यः।हेमाद्रौभविष्योत्तरे।इतिस्नात्वा
प्रदातव्यादीपाःसंपूज्यदेवताः।क्वचिदितिस्नात्वेत्यस्यस्थानेनरकायप्रदात
व्याइतिपठितं।नरकायनरकासुरोद्देशेनेतिबहवः।क्वचिन्मशकार्थेधूमइति
वन्निवर्त्यप्रयोजनत्वेनव्याख्यातं।तत्रैवाततःप्रदोषसमयेदीपान्दद्यान्मनो
रमान्।ब्रह्मविष्णुशिवादीनांभवनेषुमतेषुचेति।यदापूर्वदिनेप्रदोषसमये

चतुर्दशीस्नानयोग्याचोत्तरदिनेतदापूर्वदिनेप्रदोषदीपदानादिकृत्वापरेद्यु:
स्नानंकार्यं।कर्मानुरोधेनकालबाधस्यान्याय्यत्वात्।ज्योति र्ग्रंथेतुलासंस्थ
सहस्रांशोप्रदोषेभूतदर्शीयोल्काहस्तानरःकुर्युःपितॄणांमार्गदर्शनं।तत्रो
ल्काग्रहणेमंत्रः।शास्त्राशास्त्रहतानांचभूतानांभूतदर्शीयोः।उज्वलज्योतिषा
देहंदहेयंयोमवह्निनेति।तैदाने।अग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेमम।
उज्वलज्योतिषादग्धास्तेयांतुपरमांगतिमिति।तद्विसर्जने।यमलोकंपरि
त्यज्यआगतायेमहालये।उज्वलज्योतिषावर्त्मप्रपश्यंतोव्रजंतुतइति।अ १२५

न्यदपिकृत्यंलेंगे।ततःप्रेतचतुर्दश्यांभोजयित्वातपोधनान्।शेषान्विप्रान्धर्म
पराञ्छिवलोकेमहीयते।माषपत्रस्यशाकेनभुंक्तेतत्रदिनेनरः।प्रेतचतुर्दशी
कालेसर्वपापैःप्रमुच्यते।नक्तंप्रेतचतुर्दश्यांयःकुर्याच्छिवतुष्टये।नतत्क्रतु
शतेनापिप्राप्यतेपुण्यमीदृशमिति।तथाकृत्यतत्वार्णवेऽपिविष्णो।कार्तिकेभौ
मवारेतुचित्राकृष्णचतुर्दशी।तस्यामाराधितःस्थाणुर्नयेच्छिवपुरंध्रुवं।भौ
मवारचित्रा नक्षत्रयोगेमहाफलाइतितत्रैवव्याख्यातं।निर्णयामृतेतुइयंभौ
मवारयुक्ताचित्रेत्याह्युक्तापुष्करपुराणत्वेनेदमेववचनंकिंचित्पाठांतरे

णलिरिवतंतत्रपूर्वार्धंतुपूर्ववत्।तस्यांभूतेश्रीमभ्यर्चगछेछिवपुरंनरइति।
तथाकृत्यतत्वार्णवेतत्रैव।यांकांचित्सरितंप्राप्यकृष्णपक्षेचतुर्दशी।यमुना
यांविशेषेणनियतस्तर्पयेद्यमभिति।अमायामपिप्रातरभ्यंगस्नानंकार्यं।
एवंप्रभातसमयेत्वमावास्यांनराधिप।स्नात्वादेवान्पितॄंश्चभक्त्यासंपूज्याथ
प्रणम्यचेतिभविष्योत्तराच्च।नारदेनापितिथित्रयंदीपावलीत्वेनाभिधाय
तत्रतैलेलक्ष्मीरित्यादिनाप्यभ्यंगस्नानंविहितंपौष्करेस्वातिस्थितेरवाविंदुर्य
दिस्वातियुतोभवेत्।पंचत्वगुदकस्नायीकृताप्यभ्यंगविधिर्नरः।नीराजनोम १२६

हालक्ष्मीमर्चयन्श्रियमश्नुतइति।अमावास्याकर्तव्यदीपदानंतु।कृत्वातु
पार्वणश्राद्धमित्यभिधायततोऽपराह्णसमयइतिराजकृत्यमध्येदीपमालाकु
लेरम्येविध्वस्तध्वांतसंचयेप्रदोषदोषरहितेरात्रेदोषागमेशुभइत्यभि
धानात्श्राद्धानंतरंकर्तव्यमितियद्यपिप्रतिभातिश्राद्धदिनेचप्रदोषव्यापि
न्यांतत्संभवत्येव।तथापियदापूर्वेद्युरेवप्रदोषव्यापिन्यमावास्याश्राद्धयोग्या
चद्वितीयदिनेनदापूर्वेद्युरेवप्रदोषेलक्ष्मीसंपूज्यदीपदानंकार्यं।दिवातत्रन
भोक्तव्यमृतेबालातुराज्ञानात्।प्रदोषसमयेलक्ष्मीपूजयित्वाततःक्रमात्

दीपवृक्षास्तथाकार्याः शक्त्यादेवगृहेषुचेत्यादित्यपुराणेनस्यप्रदोषकालत्वा
भिधानात्।कालविरोधेचक्रमस्यानादरणीयत्वात्।परमार्थतस्तुस्वकाल
प्राप्तश्राद्धानुवादत्वात्क्रमस्यचाविधानमेवऔत्सर्गिकखंडतिथेरेवप्रायो
व्यवहारविषयत्वेननस्यप्राप्तत्वात्यदानुदिनद्वयेप्रदोषव्यापिन्यमावास्या
तदोत्तरायुग्मवाक्यात्।दंडैकरजनीयोगोदर्शस्यस्यात्कदाचना।तदाविहाय
पूर्वेद्युःपरेह्निसुखरात्रिकेतितिथितत्वोदाहृतवचनाच्च।लक्ष्मीपूजनंतुलक्ष्म्ये
नमःइतिनाममंत्रेणकार्यं।पूजानंतरंप्रार्थना॥नमस्तेसर्वदेवानांवरदासिहरि १२७

रिप्रिये।यागतिस्त्वत्प्रपन्नानांसामेभूयात्त्वदर्चनात्।इति।तथा।सुखरात्र्यांप्र
दोषेतुकुबेरंपूजयंतिवै।तत्रमंत्रः।धनदायनमस्तुभ्यंनिधिपद्माधिपायच।
भवंतुत्वत्प्रसादान्मेधनधान्यादिसंपदइति।दीपदानेमंत्रः।अग्निर्ज्योतिरविर्
ज्योतिश्चंद्रोज्योतिस्तथैवच।उत्तमःसर्वज्योतीनांदीपोयंप्रतिगृह्यतामिति।ए
वंदीपदानंकृत्वाब्राह्मणानन्यांश्चबुभुक्षितान्भोजयित्वास्वयमलंकृतोबं
धुभिःसहभुंजीत।ब्राह्मणान्भोजयित्वादोसंभोज्यचबुभुक्षितान्।अलंकृ
तनभोक्तव्यंनववस्त्रोपशोभिना।स्निग्धैर्मृग्धैर्विदग्धैश्चनिर्वृतैर्बंधुवैःसहै

नै

स्यादिसपुराणात्।अन्यदपिकृत्यंभविष्योत्तरे।ततोऽपराह्णसमयेघोषयेन्न
गरेनृपाअद्यराज्यंबलेर्लोकायथेष्टंचेष्टतामिति।लोकश्चापिपुरेहृद्येसुधा
धवलिताजिरे।दक्षचंदनमालोद्यैरर्चितेचगृहेगृहे।गीतवादित्रसंघुष्टप्रज्व
लितसुदीपके।दुकूलपट्टनेपथ्यरंगमाणिक्यभूषणे।युवतीजनसंकीर्णेव
स्त्रोज्वलविहारिणि।दीपमालाकुलेरम्येविध्वस्तध्वांतसंचये।प्रदोषेदोषरहि
तेशस्तेदोषागमेशुभे।यात्राविहारसंभारजयजीवेतिवादिभिः।मित्रस्वज
नसंबंधिस्वजातिगोत्रभूजिने।ततोर्धरात्रसमयेस्वयंराजाव्रजेत्सुरं।अवलोक १२८

यितुंहर्म्यपद्म्यामेवशनैःशनैः।महतातूर्यघोषेणज्वलद्भिर्हस्तदीपकैः।हर्म्य
शोभांतुसंपश्यन्बलिरक्षःस्वकैर्नरैः।तदृष्ट्वामहदाश्चर्यमृद्धिंचैवात्मनःशुभां।
बलिराज्यप्रमोदंचततःस्वगृहमाव्रजेत्।एवंगतेनिशीथेतुजनेनिद्रांधलोक
ने।तावन्नगरनारीभिस्तूर्यडिंडिमवादनैः।शूर्पडिंडिमवादनैरित्याधुनिकाः॥
निष्काश्यतेप्रहृष्टाभिरलक्ष्मीःस्वगृहांगणात्॥अन्यदपिकृत्यंभविष्ये।सुरव
रात्रेऽषःकालेप्रदीपोज्वलितालये।सर्वान्बंधूनबंधूंश्चवाचाकुशलयार्चयेत्।
प्रदीपवंदनंकार्यंलक्ष्मीमंगलहेतवे।गोरोचनाक्षतंचैवदद्यादंगेषुसर्वतः।वि

श्वरूपस्यभार्यासिपद्मेपद्मालयेशुभे।महालक्ष्मिनमस्तुभ्यंसुरवरात्रिंकुरुष्वमे।
वर्षाकालेमहाघोरेयन्मयादुष्कृतंकृतं।सुरवरात्रिप्रभातेद्यतन्मेःलक्ष्मीर्व्यपोहतु।
यारात्रिःसर्वभूतानांयाचदेवेष्ववस्थिता।संवत्सरप्रियायाचसाममास्तुसुमंगला।।
मातालंसर्वतानांदेयानांसृष्टिसंभवा।आख्याताभूतलेदेविसुरवरात्रिनमोस्तुते
इति।एतदुत्तरप्रतिपद्यपिदीपावलिंलात्वातरभ्यंगस्नानंकृत्वाघृतादिकर्तव्यं।
तथाचादित्यपुराणे।शंकरस्तुपुराघृतंससर्जसुमनोरमं।कार्तिकेशुक्लपक्षेतु प्र
थमेहनिसत्यवान्।जितश्चशंकरस्तत्रजयंलेभेचपार्वती।अतोर्थेशंकरोदुःखी १२९

उमानित्यंसुखोचिता।तस्माद्घृतंप्रकर्तव्यंप्रभातेतत्रमानवैः।तस्मिन्घृतेजयोय
स्यतस्यसंवत्सरंजयः।पराजयेविरूढंतुलब्धनाशस्ततोभवेत्।श्रोतव्यंगीतवाद्या
दिस्वनुलिप्तैःस्वलंकृतैः।विशेषतश्चभोक्तव्यंप्रशस्तैर्बोधवैःसह।तस्यांनिशायां
कर्तव्यंराज्यास्थानंतुशोभनं।गंधवस्त्रैस्तथापुष्पैरत्नमाल्यैरलंकृतं।दीपमाला
परिक्षिप्तंतथाधूपेनधूपितं।दयिताभिश्चसहितैर्नेयासाचभवेन्निशा।नवैर्व
स्त्रैश्चसंपूज्याद्विजसंबंधिबांधवाइति।भविष्योत्तरे।योयादृशेनभावेननिष्ठ
त्यस्यांयुधिष्ठिर।हर्षदैन्यादिरूपेणतस्यवर्षंप्रयातिहि।रुदितेरोदनेवर्षंह

ष्टेवर्षेप्रहृष्यतिभुक्तोभोक्तामवेद्वर्षेस्वस्थःस्वस्थोभविष्यति।तस्मात्संप्र
तिहृष्टेस्तुकर्तव्याकौमुदीनरैः। वेदव्वादानवीचेयंतिथिःपैत्रीयुधिष्ठिरेति।
तत्रैव।प्रभातसमयेराज्ञातोषणीयास्तनोजनाः।सुवासिनीभ्योदेयानिवस्त्रा
णयाभरणानिचासद्भावेनैवसंतोष्यादानेनचतथाद्विजाः।वस्त्रैस्तांबूलदानै
श्चपुष्पकर्पूरकुंकुमैः।भोजयेत्सूजयेद्वेश्यांतःपुरविलासिनीः।पदातिजनसं
घानान्यैर्वेयैः कंचुकैःशुभैः।स्वनामांकैः स्वयंराजातोषयेत्स्वजनान्पृथक्।
तथागणाधिपत्यांश्चतथामल्लान्नटान्भटान्।वृषभान्महिषांश्चैवयुध्यमा १३०

नान्यैरेःसह।गजानश्वांश्चयोधांश्चपदातीन्समलंकृतान्।मंचारूढःस्वयंप
श्येन्नटनर्तकचारणान्।कुद्धापयेत्रासयेच्चगोमहिष्यादिकंतनः।वृषान्कर्षापि
येद्गोभिरुक्तिप्रत्युक्तिवादिभिः।ततोपराह्णसमयेपूर्वस्यांदिशिभारत।मार्गपा
लींप्रबध्नीयात्तुंगस्तंभेथपादपे।कुशकाशमयीदिव्यालंबकैर्बहुभिर्नृपा।वि
धेयैःपुत्रदारायैःपुनरेहीतस्यमे।नीराजनंचतत्रैवकार्यंराष्ट्रजयप्रदं।मार्ग
पालीतलेचैत्यंयांतिगावोगजाहयाः।राजानोराजपुत्राश्चब्राह्मणाःशूद्रजा
तयः।मार्गपालींसमुल्लंघ्यनीरुजःस्युःसुखान्विताः।कृत्वैतत्सर्वमेवेहरात्रौ

दैत्यपतेर्बलेः।पूजांकृत्वानृपःसाक्षाद्भूमोमंडलकेहृते।बलिमालेख्यदैत्येंद्रं
वर्णकैःपंचरंगकैः।सर्वाभरणसंपूर्णंविंध्यावल्यासहासितं।कूष्मांडबाण
जंभोरुमुरुदानवसंवृतं।संपूर्णहृष्टवदनं किरीटोत्कटकुंडलं।द्विभुजंदैत्यरा
जानंकारयित्वानृपःस्वयं।गृहस्यमध्येशालायांविशालायांततोर्चयेत्।पत्रा
त्मात्मजनैःसार्धंसंतुष्टोबंधुभिःसह।कमलैःकुमुदैःपुष्पैःकल्हारैःपंकजो
त्पलैः।गंधपुष्पान्ननैवेद्यैरक्षतैर्गुडपूपकैः।मद्यमांससुरालेह्यदीपबल्युप
हारकैः।मंत्रेणानेनराजेंद्रसमंत्रीसपुरोहितः।बलिराजनमस्तुभ्यंविरोचन १३१

सुतप्रभो।भविष्येंद्रसुरारातेपूजेयंप्रतिगृह्यतां।एवंपूजांनृपःकृत्वारात्रौजा
गरणंततः।कारयेत्प्रेक्षणीयादिनटनर्तकनाटकैः।लोकश्चापिगृहस्यांतःग्रा
म्यांश्चकुतंडुलैः।संस्थाप्यबलिराजानंफलैःपुष्पैश्चपूजयेत्।बलिमुद्दिश्य
दीयतेदानानिकुरुनंदन।यानितान्यक्षयाण्याहुर्मयेतत्संप्रदर्शितमिति।बल्यु
द्देशेनदीपदानमुक्तं।।वामनपुराणे।।वामनकृतेबलिवरदानव्याजेना।वीरव्र
तिपदंप्राप्यतवभावीमहोत्सवः।तत्रत्वांनरशार्दूलहृष्टाःपुष्टाःस्वलंकृताः।
अर्घ्यदीपप्रदानेनअर्चयिष्यंतिमानवाइति।ब्रह्मपुराणे।एवंपूजांनृपःकृत्वा

रात्रौजागरणंततइति।इयंचप्रतिपद्युलिपूजनेपूर्वविद्धाग्राह्या।कालव्याप्ति
लाभात।श्रावणीदुर्गानवमीदूर्वाचैवहुताशनी।पूर्वविद्धैवकर्तव्याशिवरात्रि
र्बलेर्दिनमितिवचनाच्चगोपूजनादावपिपूर्वविद्धैव।प्रतिपद्दर्शसंयोगेक्री
डनंतुगवांमतं।परविद्धेघुयःकुर्यात्पुत्रदारधनक्षयः।याकुहूःप्रतिपन्मिश्रा
तत्रगाःपूजयेन्नृप।पूजनेत्रीणिवर्धंतेप्रजागावोमहीपतिरितिदेवलवचना
त्।अत्रयद्यपिपूर्वाह्णेक्रीडनंगवामितिवचनात्प्रातःकाल्यापिपुत्तरैवगो
क्रीडनादौप्रतिभाति।तथापिगवांक्रीडादिनेयत्ररात्रौदृश्येतचंद्रमाःसोमो १३२

राजापश्चान्हेतिसुरभिपूर्वकंतथेतिदेवलेनप्रतिषिद्धत्वात्सातत्रनग्राह्या॥
चंद्रदर्शनाभावेक्वचिदुत्तरापिग्राह्यत्वेनोक्ता।त्रियामगादर्शतिथिर्भवेच्चे
त्सार्धत्रियामाप्रतिपद्विवृद्धौदीपोत्सवेतेसु निशिःप्रदिष्टेअतोन्यथापू
र्वयुतेविधेयइति।अत्रदीपोत्सवपदेनगोपूजनादिकमेवगृह्यते।कालानुग्र
हान्नतुबलिपूजादि।कालबाधप्रसंगात्।चंद्रदर्शनाभावप्रयोजकसार्धत्रि
यामोक्तिसामर्थ्याच्च।पूजायांदीपदानसत्वेनदीपोत्सवपदस्यतत्रसंभवा
च्च।अमावास्यायामपि।स्त्रियःक्रीडंत्समावास्यांगावोनंदासुकार्तिके इति

वचनोक्तेस्त्रीक्रीडनेनीराजनेदीपसंबंधान्नत्रापिदीपोत्सवपदस्यसंभ
वात्।एतत्प्रकरणएवास्यवचनस्यग्रंथकारैर्लेखनादेतत्प्रकरणएवइदंव
चनंपठितमितिविज्ञायते।पुराणसमुच्चयवचनंचवर्धमानतिथौनंदायदा
साधत्रियामिकाद्वितीयाद्वियुगमीस्यादुत्तरानत्रचोच्यतेइति।तत्रगोक्रीड
नादौ।कार्तिकेशुक्लपक्षेतुविधानद्वितयंभवेत्।नारीनीराजनंप्रातःसायं
मंगलमालिकेतिब्रह्मपुराणोक्तंतुकर्मद्वयंस्वस्वायामपिद्वितीयाविद्धा
यामेवप्रतिपदिकर्तव्यं।लभ्यतेयदिगाप्रातःप्रतिपद्वटिकाद्वयं।तस्यांनी

राजनंकार्यंसायंमंगलमालिकेतिभविष्यत्पुराणात्।कार्तिकेशुक्लपक्षादाव
मावास्याघटीद्वयं।देशाभंगभयान्नैवकुर्यान्मंगलमालिकामितिदेवीपुरा
णेऽमायुक्तायानिषेधाच्च॥अस्यामेवक्वचिद्गोवर्धनपूजाप्युक्ता।प्रातर्गोव
र्धनंपूज्यघृतंचापिसमाचरेत्।भूषणीयास्तथागावःपूज्याश्चावाहदोहना
इति।पूजामंत्रस्तु।गोवर्धनधराधारगोकुलत्राणकारण।बहुबाहुकृतच्छा
यगवांकोटिप्रदाभवेति।गोपूजामंत्रस्तु।लक्ष्मीर्यालोकपालानांधेनुरूपे
णसंस्थिता।घृतंवहतियज्ञार्थेममपापंव्यपोहतु॥॥कार्तिकशुक्लद्विती

यायमद्वितीया।तस्यांभ्रात्पूजनंकार्यं।तथाचलिंगपुराणे।कार्तिकेतु
द्वितीयायांशुक्लेचभ्रातृपूजनं।यानकुर्याद्विनश्यंतिभ्रातरःसप्तजन्मसु।
तस्याइतिशेषः।भविष्योत्तरेपि।कार्तिकेशुक्लपक्षेतुद्वितीयायांयुधिष्ठिर।
यमोयमुनयापूर्वंभोजितःस्वगृहेस्वयं।अतोयमद्वितीयासाप्रोक्तालोकेयु
धिष्ठिर।अस्यांनिजगृहेपार्थनभोक्तव्यमतोबुधैः।यत्नेनभगिनीहस्तात्
भोक्तव्यंपुष्टिवर्धनं।दानानिचप्रदेयानिभगिनीभ्योविशेषतः।स्वर्णालं
कारवस्त्राणिपूजासत्कारभोजनैः।सर्वाभगिन्यःसंपूज्याअभावेप्रतिप १२५

न्नकाः।प्रतिपन्नकाःभगिनीत्वेनव्यवहृता इत्यर्थः।मित्रभगिन्यइतिहेमा
द्रिः।तथा।यमंचचित्रगुप्तंचयमदूतांश्चपूजयेत्।अर्घ्यंभ्रात्रेप्रदातव्योयमा
यसहजद्विजैः।भ्रातृभगिनीभिरित्यर्थः।अर्घ्यमंत्रः।एह्येहिमार्तंडजपाशह
स्तयमांतकालोकधरामरेशा।भ्रातृद्वितीयांरुतदेवपूजांगृहाणचार्घ्यंभ
गवन्नमस्ते।पूजानंतरंप्रणाममंत्रः।धर्मराजनमस्तुभ्यंनमस्तेयमुनाग्रज।
पाहिमांकिंकरैःसार्धंसूर्यपुत्रनमोस्तुते।इतिक्वचिद्भ्रातुर्भोजनदानेमंत्रः।
भ्रातस्तवानुजाताहंभुंक्ष्वभक्तमिमंशुभं।प्रीतयेयमराजस्ययमुनायावि

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

शेषतइति।ज्येष्ठातुतवायंजाताहमितिपठेत्।इयमपराह्णव्यापिनीग्राह्या।
कुर्जेशुक्लद्वितीयायामपराह्णेचयेयमं।स्नानंकृत्वाभानुजायांयमलोकंनप
श्यतीतिस्कंदपुराणेःपराह्णेयमपूजायाविधानात्।अष्टधाविभक्तदिन
पंचमभागव्यापिनीग्राह्येतिस्मार्तैः।अपराह्णशब्देनद्वेधाविभक्तदिनोत्तर
विभागोग्राह्यइतियुक्तं॥॥कार्तिकशुक्लचतुर्थ्यां नागव्रतं।तथाचकार्ति
कशुक्लपक्षमधिकृत्यकौर्मे॥तिथौयुगाह्नयायांचसमुपोष्ययथाविधि॥
शंखपालादिनागानांशेषस्यचमहात्मनः।पूजाकार्यापुष्पगंधक्षीराद्यायन १३५

पूर्वकमिति।एतच्चमध्याह्नव्यापिन्यांकार्यं।युगंमध्यंदिनेयत्रतत्रोपोष्यफणी
श्वरान्।क्षीरेणाप्याय्यपंचम्यांपारयेत्त्रयतोनरः।विषाणितस्यनश्यंतिनतं
हिंसंतिपन्नगाइतिस्कंदपुराणात्॥॥कार्तिकशुक्लषष्ठ्यांकृत्यविशेषोभविष्यो
त्तरे।षष्ठ्यांफलाशनोराजन्विशेषात्कार्तिकेनृप।राज्यच्युतोविशेषेणस्वराज्यं
लभतेनचिरात्।दत्वार्घ्यंकार्तिकेयायस्थित्वावैदक्षिणामुखः।दध्याघृतो
दकैःपुष्पैर्मंत्रेणानेनसुव्रत।सप्तर्षिदारजस्कंदसेनाधिपमहाबल।रुद्रोमा
ग्निषड्वक्त्रगंगागर्भनमोस्तुते।प्रीयतांदेवसेनानीःसंपादयतुदुर्ज्जनं।दत्वा

विप्रायचामान्नंयच्चान्यदपिवर्तते।पश्चाद्भुंक्तेत्वसौरात्र्यांफूत्कृत्वानुभाज
नमिति॥॥कार्तिकशुक्लाष्टमीगोष्ठाष्टमी।अस्यांगोपूजादिकार्यं।तथाचस्मृ
तत्वार्णवेभविष्ये।कार्तिकशुक्लमधिकृत्य।गोष्ठाष्टम्यांगवांपूजागोग्रासंगोप्रद
क्षिणंगवानुगमनंकुर्यात्सर्वपापप्रणाशनमिति॥॥इयमेवकंदर्पकल्पादिः
एतदुत्तरनवमीकृत्यंतत्रैव।कार्तिकामलपक्षस्यनवमीभूतिरुद्रये।प्रबुद्धां
तुजगद्धात्रीपूजयेद्दीपमालया।मासेश्वतुर्भिर्यत्पुण्यंविधिनापूज्यचंडिकां।
तत्फलंप्राप्यतेवीरनवम्यांकार्तिकस्यतु।जगद्धात्रीदुर्गा।इयंयुगादिः।नवम्यसौ १३६

कार्तिकशुक्लपक्षइतिवचनात्।अत्रश्राद्धंकर्तव्यंनिर्णयःपूर्वमुक्तः।तथाच
स्मृतत्वार्णवे।कार्तिकेनवमीशुक्लापितॄणांतृप्तिदासदा।तस्यांस्नानंतथादा
नमनंतफलसाधकमिति।अस्यामेवकूष्मांडदानाचारः।तत्रमंत्रः।ब्रह्म
त्यादिपापानांब्रह्मणानिर्मितंपुरा।कूष्मांडंबहुबीजाढ्यमतःशांतिंप्रयच्छमे।
पापानांक्षयार्थमितिशेषः।नचेदंपठनीयं।अनाम्नातेषुमंत्रस्मृतिन्याया
त्॥॥अस्यामेवविष्णुत्रिरात्रारंभः।पद्मपुराणे।कार्तिकेशुक्लनवमीमवाप्य
विजितेंद्रियः।हरिंविधायसौवर्णंतुलस्यासहितंविभुं।पूजयेद्विधिवद्भक्त्या

अतीतत्रदिनत्रयं।एवंयथोक्तविधिनाकुर्याद्देवाहिकंविधिमिति॥॥कार्तिक
शुक्लैकादशीस्तुत्यंनारदीये।कार्तिकेशुक्लपक्षस्यकृत्वाह्येकादशीनरः।प्रातर्दलाश्व
भानुंभान्सयातिहरिमंदिरमिति।मदनरत्नेवाराहेशुक्लपक्षंप्रकम्य।एकाद
शीसोमयुक्ताकार्तिकेमासिभामिनि।उत्तराभाद्रसंयोगोह्यनंतासाप्रकीर्तिता।
तस्यांयत्क्रियतेभद्रेसर्वमानंत्यमश्नुते।अनंतपुण्यफलदानेनानंतास्मृताप्रि
यइति॥॥अस्यामेवप्रबोधोत्सवउक्तोब्राह्मे।एकादश्यांचशुक्लायांकार्ति
केमासिकेशवं।प्रसुप्तंबोधयेद्रात्रौश्रद्धाभक्तिसमन्वितः।नृत्यैर्गीतैस्तथावा १३७

द्यैर्ऋग्यजुःसाममंगलैः।वीणाप्रणववेद्यैश्चपुराणश्रवणेनच।वासुदेवक
थाभिश्चस्तोत्रैरन्यैश्चवैष्णवैरिति।तत्रापिविशेषः।निशिस्वापोदिवोत्थानंस
ध्यायांपरिवर्तनमिति।ब्रह्मपुराणवचनेरात्रौसुप्तमित्यन्वयइत्याचार्यचू
डामणिः।वाराहपुराणेतुद्वादश्यांप्रबोधोत्सवउक्तः।इयंचद्वादशीरेवत्यंत
पादयुक्ताप्रबोधेप्रशस्ता।तथाचभविष्यत्पुराणे।आषाढकासितपक्षेषुमै
त्रश्रवणरेवती।आदिमध्यावसानेषुप्रस्वापावर्तनोत्सवाइति।नारदीयेपि।
मैत्राद्यपादेस्वपतीहविष्णुःश्रुतेश्चमध्येपरिवर्तमेति।पौष्णावसानेचसुरा

रिहंताप्रबुध्यतेमासचतुष्टयेनेति।यदातुद्वादशीषुरात्र्यादिभागेषुतत्तन्नक्ष
त्रभागोनास्तितदाद्वादशीनक्षत्रभागोपिरात्र्यादिगतोग्राह्यः।पादयोगोय
दानस्याद्दक्षेणापितदाभवेदितिवाराहपुराणात्।विष्णुर्दिवानस्वपितिनचरा
त्रौप्रबुध्यते।द्वादश्यामृक्षसंयोगःपादयोगोनकारणमितिविष्णुधर्माच्च।य
दानुद्वादशीषुतानिनक्षत्राणिनसंत्येवकिंत्वेकादशीषुत्रयोदशीषुवानदात
त्रापितत्तद्दक्षभागएवनिशादिवेलानादरेणप्रस्तावादिकार्य्या।अप्राप्तेद्वाद
शीमृक्षेउत्थानशयनेहरेः।पादयो गेनकर्तव्येनाहोरात्रंविचिंतयेदितिजी १३८

मूतवाहनधृतवचनात्।पादयोगादन्यतिथौद्वादश्यामृक्षसंगमादितिवच
नाच्च।द्वादश्यांनक्षत्रभागयोगस्यरात्र्यादावभावेपितत्रैवकार्यमित्यर्थः।अत
एववाराहेपि।द्वादश्यांसंधिसमयेनक्षत्राणामसंभवे।आषाढकार्तिकपक्षेषु
शयनावर्तनादिकमिति।संधिसमयश्चसायंसंध्येव।प्रबोधोपितत्रैव कार्यः।
रेवत्यंतोयदारात्रौद्वादश्यांवसमागतः।तदाविबुध्यतेविष्णुर्दिनांतेप्राप्यरेव
तीमितिजीमूतवाहनधृतवचनात्।विष्णुधर्मोत्तरेतुएकादश्यादिपंचस्व
पिप्रस्तावप्रबोधोत्सवावुक्तौ क्वचित्पूर्णमास्यामेव।रामार्चनचंद्रिकायांतु

पारणाहेपूर्वरात्रेघंटादीन्वादयन्मुहुरिति।अत्रचबहुषुवचनेषुचतुर्थभाग
वाच्चिपादग्रहणाच्चतुर्धाविभक्तानुराधारेवत्योराद्यांत्यपादयोरेवस्वापप्रबोधो
त्सवौकार्यौ।नचादिमध्यावसानेष्वितिवाक्येसमंस्यादश्रु तत्वादितिन्या
येनत्रेधाविभागएवच।अतएवमध्यग्रहणमप्युपपद्यतइतिवाच्यं।वचनां
तरेषुपादग्रहणेनविशेषश्रवणादश्रुतत्वादितिहेतोरसिद्धत्वात्।श्रवणस्य
तुत्रेधाविभक्तस्यमध्यभागएवग्राह्यः।प्रबोधमंत्रोवाराहे।ॐब्रह्मेंद्ररुद्रा
ग्निकुबेरसूर्यसोमादिभिर्वंदितवंदनीय।बुध्यस्वदेवेशजगन्निवासमंत्रप १३९

भावेनसुरेवनदेव।इयंतुद्वादशीदेवप्रबोधार्थंतुनिर्मिता।त्वयैषासर्वलोका
नांहितार्थंशेषशायिना।त्वयिसुप्तेजगन्नाथजगत्सुप्तंभवेदिदं।उत्थितेचेष्ट
तेसर्वमुत्तिष्ठोत्तिष्ठमाधव।एवंप्रबोध्यपुष्पांजलिंदद्यात्।तत्रमंत्रः।गतामेघा
वियच्चैवनिर्मलंनिर्मलादिशः।शारदानिचपुष्पाणिगृहाणममकेशवेति।अ
स्यामेवचातुर्मास्यव्रतसमाप्तिः।तदुक्तंवाराहे।चतुर्धापिहियच्चीर्णंचातुर्मा
स्यव्रतंनरः।कार्तिकेशुक्लपक्षेतुद्वादश्यांतत्समापयेदिति।चतुर्धाएकाद
शीद्वादशीपूर्णिमाकर्कसंक्रांतिद्वारब्धमित्यर्थः।भविष्योत्तरे।चातुर्मा

१४० स्येतुर्यस्यक्तंभक्षभोज्यादिकंचयत्। चतुरोवार्षिकान्मासान्नियमोयस्य
यःकृतः।कथयित्वाद्विजेभ्यस्तेदद्याद्धेनुंयथोचितं। दत्वाविसर्जयेद्वि
प्रंततोभुंजीतचस्वयमिति।व्रतसमापनेमंत्रःसनत्कुमारेणोक्तः।इदंव्र
तंमयादेवकृतंप्राप्येतवप्रभो।न्यूनंसंपूर्णतांयातुत्वत्प्रसादाज्जनार्द्दने
ति।केषुचिद्व्रतेषुदानविशेषःपूर्वमुक्तः।अस्यांरेवतीनक्षत्रांत्यपादयोगे
पारणंनकार्य्यं।सुप्तिप्रबोधपरिवर्तनमेववर्ज्यमितिप्राग्लिखितवचना
त्।इदंचचातुर्मास्यव्रतसमापनंशुक्लादावपिकार्य्यंनियतकालत्वात्। १४०

इयंचद्वादशीमन्वादिकार्त्तिकशुक्लचतुर्दश्यांलघूपवासःअरुणोदये
मणिकर्णिकायांस्नात्वाविश्वरंपूजयेत्।तत्रस्थाविश्वेश्वरंप्रतिष्ठादिन
त्वात्।तथाचसनत्कुमारसहितायां।नंदिकेश्वरउवाच।वर्षेचहेमलंबा
ख्येमासेश्रीमतिकार्त्तिके।शुक्लपक्षेचतुर्दश्यामरुणाभ्युदयंप्रति।महा
देवतिथौब्राह्मेमुहूर्तेमणिकर्णिकेस्नात्वाविश्वेश्वरोदेव्याविश्वेश्वरम
पूजयत्।संक्षेपंज्योतिषस्तस्यप्रतिष्ठाख्यंनदाकरोत्।स्वयमेवस्वमात्मानं
स्मरन्पाशुपतंव्रतमित्याद्युत्कायेपाशुपतव्रतस्वरूपं।भस्मोद्धूलितसर्वां

गोज्ञानामृतमहाव्रतः।जपन्वैज्ञानरुद्रीयंरुमहर्निशं।स्वयमेवस्वमात्मा।
नंनत्रैवोवासशंकरइत्यन्विध्यायातनःप्रभातेविमलेस्नात्वापूजांमहाद्भुतां
दंडपाणेर्महाधाम्निवनेस्मिन्कृतपारणइति।अत्रा।अत्रान्योप्येवंकुर्यादितिप वं
रिकृतिहरकृतिरूपेणार्थवादेनविधिःकल्प्यते।काशीखंडे।कार्तिकस्यचतु
र्दश्यांविश्वेशंयोविलोकयेत्।स्नात्वाचोत्तरवाहिन्यांननस्यपुनरागतिः।इ
यंखंडतिथिर्यदिपूर्वदिनेअपराह्णेचर्ननेतदापूर्वाग्राह्या।रुद्रव्रतेषुसर्वेषुकर्त १४१
व्यासंमुखीतिथिरितिवचनात्।पूजादावरुणोदयव्यापिनीग्राह्या।कर्मणोयस्य

यःकालइतिवचनात्।केचित्तुखंडतिथोवाअखंडतिथोवापूर्वदिनेकृतोप
वासःपरदिनेऽरुणोदयेपूजादिकुर्वंतिं।इयमेववैकुंठचतुर्दशीसानिशीथ
व्यापिनीग्राह्यादिनद्वयेतद्व्याप्तौनिशीथप्रदोषोभयव्यापिनीग्राह्या।तदुक्तं
हेमाद्रौपद्मविष्ये।कार्तिकस्यसितेपक्षेचतुर्दश्यांनराधिप।सोपवासस्तुसंपू
ज्यहरिंरात्रौजितेंद्रियइतिनिर्णयसिंधौ।अत्रैवकार्तिकव्रतोद्यापनमुक्तं
पाद्मेकार्तिकमाहात्म्ये।अथोर्जव्रतिनःसम्यगुद्यापनविधिंशृणु।ऊर्जेशु
क्लचतुर्दश्यांकुर्यादुद्यापनंव्रती।व्रतसंपूर्णतार्थायविष्णुप्रीत्यर्थमेवच।तु

लस्याउपरिष्टात्तुकुर्यान्मंडपिकांशुभां।द्वारेषुद्वारपालांश्चपूजयेन्मन्मयान्पृथक्।पुण्यश्लोकंसुश्लोकंचजयंविजयमेवच।तुलसीमूलदेशेतुसर्वतोभद्रमेवच।तस्योपरिष्टात्कलशंपंचरत्नसमन्वितं।पूजयेत्तत्रदेवेशं शंखचक्रगदाधरं।पीतकौशेयवसनंयुक्तंजलधिकन्यया।इंद्रादिलोकपालांश्चमंडलेपूजयेद्बुधी।तस्यामुपवसेद्भक्त्याशांतःप्रयतमानसः।पूजयेद्देवदेवेशंसोवर्णगुर्वनुज्ञया।रात्रौजागरणंकुर्यान्नीतवाद्यादिमंगलैः।ततस्तुपौर्णमास्यांवैसपत्नीकान्द्विजोत्तमान्।त्रिंशन्मितानथैकंवास्वशक्त्यावानिमंत्रयेत्। १४२

अतोदेवाइतिद्वाभ्यांजुहुयात्तिलपायसं।ततोगांकपिलांदद्यात्पूजयेद्विधिवद्गुरुं।सपत्नीकान्समभ्यर्च्यनत्वाविप्रान्क्षमापयेत्।युष्मत्प्रसादाद्देवेशप्रसन्नोममसर्वदा।व्रतादस्माच्चयत्पापंसप्तजन्मकृतंमया।तत्सर्वंनाशमायातुस्थिरामेचास्तुसंततिः।इतिक्षमाप्यताविप्रान्प्रसाद्यचविसर्जयेत्।नामचांगुरवेदद्याद्वस्त्रयुक्तांतदाव्रती।ततःसुहृद्गुरुयुतःस्वयंभुंजीतभक्तिमानिति।इयंचपौर्णमासीमन्वादिः।अत्रविशेषोहेमाद्रौब्राह्मे।पुण्यामहाकार्तिकीस्याज्जीवेंद्वोःकृत्तिकास्थयोः।पाद्मे।विशाखासुमदाभानुःकृत्तिकासुचचंद्रमाः।

सयोगःपद्मकोनामपुष्परेत्वतिदुर्लभः।पद्मकंपुष्परेप्राप्यकपिलांयःप्र
यछति।सहित्वासर्वपापानिवैष्णवंलभते पदम्॥यमः॥कार्तिक्यांपुष्क
रेस्नातःसर्वपापैःप्रमुच्यते।अन्यत्रापि।आग्नेयंतुयदाऋक्षंकार्तिक्यां
भवतिक्वचित्।महतीसातिथिर्ज्ञेयास्नानदानेषुचोत्तमा।यदातुयाम्यंभव
तिऋक्षंतस्यांतिथौक्वचित्।तिथिःसापिमहापुण्यामुनिभिःपरिकीर्तिता।प्रा
जापत्यंयदाऋक्षंतिथौतस्यांनराधिप।सामहाकार्तिकीप्रोक्तादेवानामपि
दुर्लभेति।अस्यामेवसंध्याकालेत्रिपुरदाहोत्सवोभार्गवार्चनदीपिकायां। १४३

पु

र्णमास्यांतुसंध्यायांकर्तव्यस्त्रिपुरोत्सवः।दद्यादनेनमंत्रेणप्रदीपांश्चसुराल
येकीटपतंगामत्राकाश्चवृक्षाजलेस्थलेयेविचरंतिजीवाः।दृष्ट्वाप्रदीपंनच
जन्मभागिनोभवंतिसर्वेश्वपचाहिविप्राइति।अस्यामेवमत्स्यावतारउक्तः
पाद्मे।कार्तिकमाहात्म्ये।वराहउवाचनोविष्णुर्मत्स्यरूपभवन्ततः।तस्यांदत्त
हुतंजप्तंतदक्षयफलंस्मृतमिति।अस्यांवृषोत्सर्गेकृत्वानक्तंकार्यं।तदुक्तं
मात्स्ये।कार्तिक्यांयोवृषोत्सर्गंकृत्वानक्तंसमाचरेत्।सोवंपदमवाप्नोतिशि
वव्रतमिदंस्मृतं।अस्यांकार्तिकेयदर्शनमुक्तं।काशीखंडे।कार्तिक्यांकृत्ति

कायोगेयःकुर्यात्स्वामिदर्शनंसप्तजन्मभ्वेद्विप्रोधनाढ्योवेदपारगइति।
तथाकृत्यतत्त्वार्णवेब्रह्मपुराणे।पौर्णमास्यांतुसंपूज्योभक्त्यादामोदरःसदा।
तस्मिन्नहनियत्नेनकर्तव्यंनक्तभोजनं।तथा।कार्तिकेपौर्णमास्यांतुसोपवा
सोर्चयेद्धरिं।सोग्निष्टोमफलंविंदेत्सूर्यलोकंचविंदति।।इतिकार्तिककृत्यं।।
तिथितत्वेमार्गशीर्षप्रतिपदिकृत्यंभविष्ये।रोहिणीप्रतिपद्युक्तामार्गमा
सिसितेनरा।गंगायांयदिलभ्येतसूर्यग्रहशतैःसमेति।मार्गशीर्षकृष्णा
ष्टम्यांभैरवोत्पत्तिः।तस्यामुपवासादिकार्यं।तदुक्तंकाशीखंडे।मार्गशी १४४

र्षासिताष्टम्यांकालभैरवसंनिधौ।उपोष्यजागरंकुर्वन्सर्वपापैःप्रमुच्य
ते।। त्रिस्थलीसेतौ।कृत्वाचविविधांपूजांमहासंभारविस्तरैः।नरोमार्गा
सिताष्टम्यांवार्षिकंविघ्नमुत्सृजेत्।अत्रपूजोपवासजागरणानिप्रधानानि।
फलसंबंधात्।एतेनउपोषणस्यांगभूतमर्घ्यदानमिहस्मृतं।न थाजाग
रणंरात्रौपूजायामचतुष्टयइतिवचनादुपोषणस्यैवप्राधान्यमितिप्रयुक्तं
वाक्यांतरविरोधेनोपोषणस्यांगभूतमित्यस्योत्तरार्धेननुषंगात्।इयं
चपूर्वविद्धायाह्या।कृष्णपक्षगतत्वादुद्व्रतत्वात्कालव्याप्तिलाभाच्च।।

यत्तुकेश्चिन्मध्याह्नस्याविर्भावकालत्वान्मध्याह्नकालव्यापिनीग्राह्येयु
क्तंतरयुक्तं।आविर्भावकालव्यापिन्याः कर्तव्यत्वेनानभिधानात्।जन्मा
ष्टम्यादावाविर्भावकालत्वेनार्धरात्रस्य।पूजाकाललोक्तिवत्।अत्रापितस्यै
वपूजाकालत्वमित्यन्ये।वस्तुतस्तुआविर्भावेपिनमध्याह्नएव।मध्येबहु
कृत्य विधानात्।अंतेसूर्यश्चास्तमुपागमदित्यभिधानाच्च।इयमेवाष्टमी
लक्ष्मीकल्पादिः॥ ॥मार्गशीर्षशुक्लतृतीयायांरंभाव्रतंभविष्योत्तरे।रंभा
तृतीयांवक्ष्यामिसर्वपापप्रणाशिनीमिसुपक्रम्यमार्गशीर्षशुभेमासित्व १४५

तीयायांनराधिपशुक्लायांप्रातरुत्थायदंतधावनपूर्वकंउपवासस्यनियमं
गृह्णीयादित्युक्तंसौभाग्यार्थंपुराचीर्णंरंभयाराजसत्तम।तेनरंभातृती
येयंपरसौभाग्यदायिनीति।इयंपूर्वविद्याग्राह्या।वृद्धत्तपातथारंभासावित्री
वरंपेतृकी।कृष्णाष्टमीचपूजाचकर्तव्यासंमुखीतिथिरितिस्कांदात्।मार्गशु
क्लपंचम्यां नागपूजोक्तास्कांदे।शुक्लामार्गशिरेपुण्याश्रावणेयाचपंचमी॥
स्नानदानेर्बहुफलानागलोकप्रदायिनीति।इयंचोत्तरविद्याग्राह्या।पंचमीना
गपूजायांकार्यषष्ठीसमन्विता।तस्यांतुतुष्टानागाइतरासचतुर्थिकेत्याचा

रसंवादिवचनात्।मार्गशुक्लषष्ठ्यांमल्लारिपूजासाचोत्तरविद्धायांकार्या।षण्मु
न्योरितियुग्मवाक्यात्।इयमेवयोगविशेषेण चंपाभिधा।तदुक्तंमल्लारिमा
हात्म्ये।मार्गभाद्रपदेशुक्लषष्ठीयाध्रुवसंयुता।रविवारेणसंयुक्तासाचंपेतीह
कीर्तितेति।इयमेवस्कंदषष्ठी।साचपूर्वविद्धाग्राह्या।कृष्णाष्टमीस्कंदषष्ठी
शिवरात्रिश्चतुर्दशी।एताःपूर्वयुताःकार्याइतिवचनात्।कृत्यतत्त्वार्णवेअदि
तिःकश्यपाज्ज्ञेमित्रोनामदिवाकरः।मार्गशीर्षस्यमासस्यशुक्लपक्षेशुभेति
थौ।सप्तम्यांतेनसाख्यातालोकेस्मिन्मित्रसप्तमी।तत्रोपवासःकर्तव्योभक्त्या १४६

एयथफलानिचेति।।मार्गशुक्लनवमीसंकल्पादिः।तत्रैव।मार्गशीर्षेसि
तेपक्षेद्वादश्यांनियतःशुचिः।कृतोपवासोदेवेशंसमभ्यर्च्यजनार्दनं।पंचग
व्येनसुस्नातःपंचगव्यकृताशनः।यवव्रीहिकृतंपात्रंदध्याढ्यंप्राश्यभक्तितः।
इदंचोच्चारयेन्नत्वादेवस्यपुरतोहरेः।सप्तजन्मसुयत्किंचिन्मयाखंडव्रतंकृ
तं।भगवंस्त्वत्प्रसादेनतदखंडमिहास्तुमे।यथाखिलंजगत्सर्वंत्वमेवपुरुषो
त्तम।तथाखिलान्यखंडानिव्रतानिममसंतुवाइति।मार्गशुक्लचतुर्दश्यांपि
शाचमोचनयात्राकार्या।मार्गपौर्णमास्यांदत्तात्रेयोत्पत्तिः।तदुक्तंस्कांदे

सह्यखंडे।मार्गशीर्षेतथामासिदत्रमेक्रिसुनिर्मले।मृगशीर्षयुतेपोर्णमास्यां
ज्ञस्यचवासरे।जनयामासदेदीप्यमानंपुत्रंसतीशुभं।तंविष्णुमागतंज्ञात्वा
अत्रिर्नामाकरोत्स्वयं।दत्तवान्स्वस्यपुत्रत्वाद्दत्तात्रेयमितीश्वरमिति।दत्रमेमा
सीत्यन्वयः।इयंपूर्वविद्धाग्राह्येतिवदंति।अस्यांप्रत्यवरोहणमाश्वलायने
नोक्तं।मार्गशीर्ष्यांप्रत्यवरोहणंचतुर्दश्यांपोर्णमास्यांवेति॥॥इतिमार्गशी
र्षकृत्यं॥ ॥पोषऊष्णाष्टम्यांअष्टकाश्राद्धं।हेमंतशिशिरयोश्चतुर्णामप
रपक्षाणामष्टमीष्वष्टकाइत्याश्वलायनवचनात्।तत्पूर्वदिनेपूर्वेद्युःश्राद्धं। १४७

उत्तरदिनेचान्वष्टक्यं।पूर्वेद्युःपितृभ्योदद्यात्।अपरेद्युरन्वष्टक्यमित्याश्व
लायनवचनात्।कोर्मेपि।अमावास्याष्टकास्तिस्रःपोषमासादिषुत्रिषिति।
अत्राष्टम्यपराह्णव्यापिनीग्राह्या।पूर्वेद्युःश्राद्धस्यान्वष्टक्यस्यचाष्टम्यनुरो
धेननिर्णयः।पूर्वेद्युःपितृभ्योदद्यात्।अपरेद्युरन्वष्टक्यमितिसत्त्रात्।अ
त्रश्राद्धप्रकोतत्रैव।अप्यनड्वहेयवसमाहरेदग्निनावाकक्षमुपोषेदेषामे
ष्टकेतिनलेवानष्टकःस्यादिति।अकरणेप्रायश्चित्तमग्निविधाने।एभिर्द्यु
भिर्जपेन्मंत्रंत्रातवारंतुतद्दिने।अन्वष्टक्यंयदाशून्यंसंपूर्णंयातिसर्व

थेति।अन्वष्टक्यग्रहणंअष्टकोप लक्षणं।मार्गादिषुमलमासपातेतत्राष्ट
कानकार्या।चतुर्णामित्युक्तेरितिवृत्तिकृत्।महालयाष्टकाश्राद्धपाककर्मा
दिकर्मयत्।स्पष्टमासविशेषाख्याविहितं वर्जयेन्मलइतिकाठकृह्याच्च।
पोषकृष्णनवमीसावित्र्यकल्पादिः।पोषशुक्लाष्टम्यांविशेषःकल्पतरौ
भविष्ये।पोषेमासियदादेविशुक्लाष्टम्यांबुधोभवेत्।तस्यांस्नानंजपोहो
मस्तर्पणंविप्रभोजनं।मत्प्रीतयेकृतंदेविशतसाहस्रिकंभवेत्।अत्रशो
हिण्यार्द्रायोगेपुण्यतमत्वं।पोषशुक्लदशमीस्नानकल्पादिः।पोषशुक्ले १४८

कादश्यादिः।अस्यामेवमाघस्नानारंभउक्तोब्राह्मे।एकादश्यांशुक्लपक्षे
पोषमासेसमारभेत्।द्वादश्यांपौर्णमास्यांवाशुक्लपक्षेसमापयेदिति।माघ
इतिशेषः।पक्षांतरमाहविष्णुः।दर्शेवापौर्णमासींवाप्रारभ्यस्नानमारभेत्।पु
ण्यान्यहानित्रिंशत्तुमकरस्थेदिवाकरइति।सएवतुलामकरमेषेषुप्रातःस्ना
यीसदाभवेत्।हविष्यंब्रह्मचर्यंचमहापातकनाशनमिति।स्नानकालउक्तो
ब्राह्मे।अरुणोदयेतुसंप्राप्तेस्नानकालेविचक्षणैः।माधवांघ्रियुगंध्यायन्यः
स्नातिसुरपूजितइति।अरुणोदयमारभ्यप्रातःकालावधिप्रभो।माघस्नान

भवंपुण्यंक्रमात्तत्रचधारणा।उत्तमंतुसनक्षत्रंलुप्ततारंतुमध्यमं।सवितर्युदि
तेभूपततोहीनंप्रकीर्तितमिति।एवंसतिसंप्राप्तेमाघमासेतुतपस्विजनवल्ल
भे।क्रोशंतिसर्ववारीणिसमुद्रंछतिभास्करे।माघमासेरटंत्यापःकिंचिदभ्यु
दितेरवौ।- - - - - - स्नायात्कूपभांडाश्रितेतथा।माघमासेवराहेहशस्त
वेनिम्नगाजलं।भांडाश्रितेतथंविशेषः।सरित्तोयंमहावेगंनवकुंभस्थितंत
था।वायुनाताडितंरात्रौगंगास्नानसमंस्मृतं।स्नातोवक्लिंनसेवेतह्यस्नातोगा
कथंचन।सेवेतापिनुहोमार्थंनशीतार्थंकथंचन।स्नानविधिमाहविष्णुः॥ १४९

तत्रचोत्थायनियमंगृह्णीयाद्विधिपूर्वकं।माघमासमिमंपूर्णंस्नास्येहंदेवमा
धव।तीर्थस्यास्यजलेनित्यमितिसंकल्प्यचेतसि।ततःस्नात्वाशुभेतीर्थेदत्वाश्रा
द्धंयथाविधि।वेदोक्तविधिनाराजन्सूर्यायार्घ्यंनिवेदयेत्।पितॄणांतर्पयित्वातुअ
वतीर्यततोजलात्।शंखचक्रधरंदेवंमाधवंनामपूजयेत्।वस्त्रोढुत्वाविधाने
नततस्त्वेकाग्रमानसोभवेत्।भूशय्याब्रह्मचर्यंचशक्तःस्नानंसमाचरेत्।अशक्त
स्यधनाढ्यस्यस्त्रेलासर्वत्रकथ्यते।धनाढ्यस्यबहुधनदानंकुर्वतः।अवश्यमे
वकर्तव्यंमाघस्नानमितिश्रुतिः।तिलस्नायीतिलोद्वर्तीतिलहोमीतिलोदकी।

तिलदस्तिलभोक्ताच षट्तिलीनावसीदति।तैलमामलकाश्चैवतीर्थदेयास्तुनि
त्यशः।तथाप्रज्वालयेद्दीपंस्तवनार्थंद्विजन्मनां।एवंस्नात्वावसानेतुभोज्यंदेय
मवारितं।भोजयेद्द्विजदांपत्यंभूषयेद्वस्त्रभूषणैः।कंबलाजिनरक्तानिवासांसि
विविधानिच।चोलकानिचदेयानिप्रछादनपरास्तथा।उपानद्योतथाछत्रमो
चकोपापमोचकौ।अनेनविधिनादद्यान्माधवःप्रीयतामिति।सवित्रेप्रसवि
त्रेचपरंधामजलेमम।त्वत्तेजसापरिभ्रष्टंपापंयातुसहस्रधा।दिवाकरजग
न्नाथप्रभाकरनमोस्तुते।परिपूर्णंकुरुष्वेहंमाघस्नानंतवाज्ञया।अयं १५०

समापनमंत्रः।अहन्यहनिदातव्यास्तिलाःशर्करयान्विताः।माघावसानेसु
भगेषडुसंभोजनंतथा।सूर्योमेप्रीयतांदेवोविष्णुमूर्तिर्निरंजनः।दंपत्योर्वास
सीसूक्ष्मेसन्नधान्यसमन्विते।त्रिंश त्तुमोदकादेयाःशर्करातिलसंयुताः।
भागत्रयंतिलानांतुचतुर्थःशर्करांशकः।अनभ्यंगीवरारोहेसर्वमासंनयेद्व्र
ती।इतिमाघस्नानविधिः॥ ॥मकरसंक्रमेपराविंशतिघटिकाःपुण्याः।तथा
चबृहद्वसिष्ठः।अतीतानागतेपुण्येहेउदग्दक्षिणायने।त्रिंशल्कर्कटकेना
ह्नोमकरेविंशतिःस्मृताः इति।ब्रह्मवैवर्ततु।मकरेतुदशाधिकाइतिपाठः।

रात्रौमकरसंक्रमेतुपरदिनेसूर्योदयोत्तरंपूर्वमहर्दलंपुण्यं।तथाचभविष्यो
त्तरे।कार्मुकंतुपरित्यज्यझषंसंक्रमतेरविः।प्रदोषेवार्धरात्रेवास्नानंदानंप
रेह नीति।बृद्धगार्ग्योपि।यदास्तमयवेलायांमकरंयातिभास्करः।प्रदोषे
वार्धरात्रेवास्नानंदानंपरेहनीति।परेहनीत्युक्तेपिपूर्वार्धएवआसन्नसंक्रमं
पुण्यं।दिनार्धस्नानदानयोरितिसामान्यवचनात्।अत्रकृत्यंशिवरहस्ये।त
स्यांकृत्वातिलैःस्नानंकार्यंचोद्वर्तनंशुभैः।तिलादेयाश्चविप्रेभ्यःसर्वदेवोत्त
रायणे।तिलतैलेनदीपाश्चदेयाःशिवगृहेशुभाः।कालिकापुराणे।होमंतिलैः १५१

प्रकुर्वीतसर्वदेवोत्तरायणे।तान्योविप्रायदेवेभ्योहाटकेनसमंददेत्।उत्तरा
यणमासाद्यनरःकस्मात्सशोचतीति।रुद्रयत्नात्पुरेवा।पौषमासेत्रयोदश्यां
घृतंविप्रायपार्थिव।समभ्यर्च्यार्चयेद्दद्यात्सर्वान्कामानवाप्नुयात्।तथाब्रह्म
लोकेनपस्तस्थापितरोलेभिरेमृतम्।पौषेतुपुष्यनक्षत्रेपिष्टकैर्विविधैःपित्र्
न्।अभ्यर्चयेत्तथादेवान्द्विजानात्मानमेवच।गोरसर्षपयुक्तेनसमभ्यर्च्यस्व
कांतनुं।सस्नात्वानेनतथाकार्यंअलक्ष्मीनाशनंपरं।उद्वर्त्यदेयंचतथासर्वौ
षधिजलैर्युतैः।स्नापयित्वानवंवस्त्रंगृहीत्वाछादनंततः।द्रष्टव्यंमंगलंशांत

धूपस्रङ्माल्यशोभितं।ततोनारायणःशक्रश्चंद्रःशुक्रबृहस्पती।संपूज्यपुष्पधू
पैश्चनैवेद्यैश्चपृथक्पृथक्।प्रशस्तैर्वैदिकैर्मंत्रैःहुत्वाग्निहवनंशुभांघृतेर्वि
प्रांश्चसंतर्प्यनवैर्वस्त्रैश्चशोभितान्।ततःपुष्टिकरंहृद्यंपोक्तंघृतपायसं।पु
ष्ययोगेतुकर्तव्यंराज्ञास्नानंतुसर्वदा।सर्वौषध्युक्ताश्छंदोगपरिशिष्टे।कुष्ठंमांसी
हरिद्रेद्वेमुस्तंशैलेयचंदनं।वचाचंपकमुस्ताचसर्वौषध्योदशस्मृताः।पोषीचेत्
पुष्ययुक्तास्यात्तस्यांगोरसर्षपकल्केनोत्सादितशरीरंगंधघृतपूर्णकुंभेना
भिषिक्तःसर्वौषधीभिःसर्वगंधैःसर्वबीजैश्चस्नातोघृतेनभगवंतंवासुदेवं

स्नापयित्वापुष्पधूपदीपनैवेद्यादिभिश्चाभ्यर्च्यचेष्णवैःसूक्तैर्बार्हस्पत्येश्चमं
त्रैःपावकंहुत्वासमुवर्णेनघृतेनब्राह्मणंस्वस्तिवाचयेत्।वासोयुगंचकर्त्रेदद्या
त्।अनेनकर्मणामुच्यते॥ ॥इतिपोषकृत्यं॥ ॥पौर्णमास्यंतंमाघमुपक्रम्यति
थितत्वेस्कंदे।पितॄणांदेवतानांचमूलकंनैवदापयेत्।ददन्नरकमाप्नोतिभुंजी
तब्राह्मणोयदि।ब्राह्मणोमूलकंभुक्त्वारेचांद्रायणव्रतं।अन्यथायातिनर
कंक्षत्रविट्शूद्रएवच।वरंभुक्तमभक्ष्यंतुपिबेद्वागर्हितंचयत्।वर्जनीयंप्रयत्ने
नमूलकंमदिरासमं।माघकृष्णसप्तम्यष्टमीनवमीषुपूर्वेद्युरष्टकान्च

ष्टकाः कार्याः। माघकृष्णदर्शाख्यघोरकल्यादिः। माघकृष्णद्वादश्यांतिलद्वा
दशीव्रतंब्रह्मपुराणे। माघेतुकृष्णद्वादश्यांयमोहिभगवान्पुरा। तिलानुत्पाद
यामासतपःकृत्वासुदारुणमित्युपक्रम्यतस्यामुपोषितःस्नातस्तिलैस्तस्यां
यजेद्धरिं। तिलतैलेनदीपांश्चदेयादेवगृहेषुच। निवेदयेत्तिलानेवहोतव्याश्च
तिलास्तथा। तिलान्दत्वाचविप्रेभ्योभक्षयेच्चतथातिलानिति। माघकृष्णच
तुर्दश्यांयमतर्पणमाहहेमाद्रौयमः। अनर्कास्युदितेकालेमाघकृष्णाचतुर्द
शी। स्नातःसंतर्प्यचयमंसर्वपापैःप्रमुच्यतइति। माघामायामधीदयोनाम १५३

योगविशेषोमदनरत्नेभारतेउक्तः। अमार्कपातश्रवणैर्युक्ताचेत्पुष्यमाघयोः।
अधीदयःसविज्ञेयःकोटिसूर्यग्रहैःसमइति। निर्णयामृते। दिवैवयोगः श्रा
द्धोयंनतुरात्रौकदाचनेत्यर्धमधिकंपठितं। पुष्यमाघयोर्मध्यवर्तिनी। अमापो
ष्यनंतराअमावास्येत्यर्थः। इतिनारायणभट्टाः। अतएवहेमाद्रौस्कांदे। माघा
मायांव्यतीपातेआदित्येविष्णुदैवते। अधीदयंतदित्याहुःसहस्रार्कग्रहैःस
मिति। अत्रपूर्णिमांतमासेनमाघामावास्येतिमदनरत्नः। कालादर्शेमद
नरत्नेच। पुष्यस्यमाघस्यवेत्युक्तं। तत्रैवाधीदयेतुसंप्राप्तेसर्वेगंगासमंज

लं।शुद्धात्मानोद्विजाःसर्वेभवेयुर्ब्रह्मसंमिताः।यत्किंचिद्दीयतेदानंतद्दानंमेरु
संनिभमिति।दानविशेषस्तुनिर्णयामृतेतत्रैव।चतुःषष्टिपलंमुख्यममत्रं
तत्रकारयेत्।चत्वारिंशत्पलंवापिपंचविंशतिरेववेति।एतच्चकांस्यमयं।एवं
सुघटितंकृत्वाकांस्यभाजनमित्युक्तत्वात्।तथानिधायपायसंतत्रपद्ममष्ट
दलंलिखेत्।पद्मस्यकर्णिकायांतुकर्षमात्रंसुवर्णकं।तदभावेतदर्धंवातदर्ध
वापिधारयेत्।भूमौतुतंडुलैःशुद्धैःकृत्वाष्टदलमुत्तमं।अमत्रंस्थापयेत्तत्र ब्र
ह्मविष्णुशिवात्मकं।तेषांपूजाततःकार्याश्वेतमाल्येस्तथोभनैः।वस्त्रादिभि १५४

रलंकृत्वाब्राह्मणायनिवेदयेत्।मंत्रः।सुवर्णपायसामत्रंयस्मादेतत्त्रयीमयं।
आपन्नेस्तारकंयस्मात्तद्गृहाणद्विजोत्तम।तथा।समुद्रमेखलांपृथ्वींसम्यग्द
तुश्चयत्फलं।तत्फलंलभतेमर्त्यःकृत्वेदंदानमुत्तममिति।माघशुक्लचतुर्थ्यां
ढुंढीपूजोक्ताकाशीखंडे।माघशुक्लचतुर्थ्यांतुनक्तव्रतपरायणाः।येत्वांढुंढेर्च
यिष्यंतितेर्चाःसुरासुरदुर्लभां।विधायवार्षिकींयात्रांचतुर्थीप्राप्यतापसी।शु
क्लाशुक्लतिलान्वाप्याप्राश्नीयाल्लड्डुकान्व्रती।तांयात्रांनात्रयःकुर्यान्नैवेद्यंनि
लडुकैः।उपसर्गसहस्रैस्तुसहतेव्योममाज्ञया।होमंतिलाज्यद्रव्येणयःक

रिष्यतिभक्तितः।तस्यांचतुर्थ्यांमंत्रज्ञस्तस्यमंत्रप्रसेत्स्य तीति।कोर्मे।माघशुक्ल
चतुर्थ्यांतुकुंदपुष्पैःसदाशिवं।संपूज्ययोहिनक्तंतु।सप्राप्नोतिश्रियंनरइति।
तिथितत्वेभविष्योत्तरे।माघशुक्लमधिकृत्य।चतुर्थीवरदानामतस्यांगौरीचपू
जिता।सौभाग्यंमंगलंकुर्यात्पंचम्यांश्रीरपिश्रियं।माघशुक्लपंचम्यांरतिकाम
पूजोक्तापुराणसमुच्चये।माघमासेसुरश्रेष्ठशुक्लायांपंचमीतिथौ।रतिकामौ
नुसंपूज्यकर्तव्यःसुमहोत्सवः।दानानिचप्रदेयानितेनतुष्यतिमाधवइति।
वाराहे।माघशुक्लचतुर्थ्यांतुवरमाराध्यचश्रियः।पंचम्यांकुंदकुसुमैःपूजां १५५

कुर्यात्समृद्धयेइति।माघशुक्लसप्तमीरथसप्तमीसंज्ञा।अस्यामरुणोदयेस्ना
नंकार्यं।तदुक्तंस्मृतिसंग्रहे।सूर्यग्रहणतुल्याहिशुक्लामाघस्यसप्तमी।अरुणो
दयवेलायांस्नानंतत्रमहाफलं।भविष्योत्तरे।माघेमासिसितेपक्षेसप्तमीकोटि
भास्करा।कुर्यात्स्नानार्घ्यदानाभ्यामायुरारोग्यसंपदइति।इदंचस्नानंतिथ्या
दिसंकीर्त्यसप्तार्कपत्राणिसप्तबदरीपत्राणिचशिरसिनिधायकर्तव्यंशिष्टस
माचारात्।तत्रमंत्रः।यद्यज्जन्मकृतंपापंमयासप्तसुजन्मसु।तन्मेरोगंचशोकं
चमाकरीहंतुसप्तमीति।अर्घ्यदानमंत्रः।सप्तसप्तीवहप्रीतसप्तलोकप्रदीपन।

सप्तम्यासहितोदेवगृहाणार्घ्यंदिवाकरेति।ततःप्रार्थना।जननीसर्वलोकानां
सप्तमीसप्तसप्तिके।सप्तव्याहृतिकेदेविनमस्तेसूर्यमंडलइति।इयंप्रयागेऽ
तिप्रशस्ता।अरुणोदयवेलायांशुक्लामाघस्यसप्तमी।प्रयागेयदिलभ्येत
कोटिसूर्यग्रहैःसमेतिवचनात्।अस्यामेवभविष्योत्तरोक्तस्नानविधिः॥
अरुंधतीप्रतिवसिष्ठवचः।माघस्यसितसप्तम्यांसर्वकामफलप्रदं।रूप
सौभाग्यजननंस्नानंकुरुवरानने।रुत्वाषष्ठ्यामेकभक्तंसप्तम्यांनिश्चलंज
लं।राज्यंतेचालयेथास्त्वंदत्वाशिरसिदीपकं।नकेनचाल्यतेयावत्तावत्स्नानं १५६

समाचरेत्।सोवर्णेराजतेपात्रेरात्र्याःलावुमयेतथा।तैलेनवर्तिर्दातव्याम
हाराजनरंजिता।महाराजनंकुसुंभं।समाहितमनाभूत्वादत्वाशिरसिदीप
कं।भास्करंहृदयेध्यात्वाइमंमंत्रमुदीरयेत्।नमस्तेरुद्ररूपायरसानांपतये
नमः।वरुणायनमस्तेस्तुहरिदासनमोस्तुते।जलोपरितरद्दीपःस्नात्वासंतर्प्य
देवताः।चंदनेनलिखेत्पद्ममष्टपत्रंसकर्णिकं।मध्येशिवंसपत्नीकंप्रणवेन
चसंयुतं।शाक्रेदलेरविःपूज्योभानुश्चैवानलेतथा।याम्येविवस्वान्नैर्ऋतेभा
स्करंपूजयेद्बुधः।पश्चिमेसवितापूज्यःपूज्योरुश्चानिलेदले।सोम्येसहस्र

किरणः श्रीवेसर्वात्मनेनमः।पूजाः प्रणवपूर्वास्तुनमस्कारांतयोजिताः।पुष्पैः सु
गंधधूपैश्चष्टथस्तेनयुधिष्ठिर।विसर्ज्यवस्त्रसंवीतंस्वस्थानंगम्यतामिति।त
तोगृहंगत्वा।ताम्रपात्रेयथाशक्त्यामृन्मयेवाथभक्तिमान्।स्थापयेत्तिलपिष्ट
चसघृतंसगुडंतथा।कांचनंतालकंकृत्वाअशक्तेस्तिलपिष्टकं।संछाद्यरक्त
वस्त्रेणपुष्पैर्धूपैरथार्चयेत्।ततस्तंवाचयेद्विप्रेर्दद्यान्मंत्रेणतालकं।मंत्रः।आ
दित्यस्यप्रसादेनप्रातःस्नानफलेनच।दुष्टदौर्भाग्यदुःखघ्नंमयादत्तंतुतालकं। १५७
तालकंकर्णाभरणं।पूजयित्वोपदेष्टारंविप्रानन्यांश्चपूजयेत्।ततःपारंद्या

दिक्षिरालापादीन्वर्जयेत्।सूर्यंध्यायन्दिनमतिवाहयेत्।ततःनक्तंभुंजीतच
नरोद्विजान्संभोज्यशक्तितइति।इयंमन्वादिः।माघशुक्लाष्टम्यांभीष्मतर्पणा
दिकार्यं।तदुक्तंपाद्मे।माघेमासिसिताष्टम्यांसतिलंभीष्मतर्पणं।श्राद्धंचैवतु
येकुर्युस्तेस्युःसंतानभागिनइति।अत्रश्राद्धंकाम्यं।तर्पणंतुकाम्यंनित्यंच।ब्रा
ह्मणाद्याश्चयेवर्णादद्युर्भीष्मायनोजलं।संवत्सरकृतंतेषांपुण्यंनश्यतिसत्त
मेतिमदनरत्नधृतवचनात्।इदंच जीवत्पितृकेणापिकार्यं।जीवत्पितापिकु
र्वंतर्पणंयमभीष्मयोरितिवचनात्।मंत्रश्च।भीष्मः शांतनवोवीरःसत्य

वादिजितेंद्रियः।आभिरद्भिरवाप्नोतुपुत्रपौत्रोचितांक्रियांवैयाघ्रपद्यगोत्रा
यसांकृत्यप्रवरायच।अपुत्रायददाम्येतज्जलंभीष्मायवर्मणेतिवैयाघ्रपद्य
गोत्रायसांकृत्यप्रवरायच।गंगापुत्रायभीष्मायआजन्मब्रह्मचारिणेअपु
त्रायजलंददामिनमोभीष्मायवर्मणेतिस्मृतिकोस्तुमेपाठः।माघशुक्लैका
दश्यांमहादश्यांसंज्ञातदुक्तंपाद्मे।त्वयाकृतमिदंवीरतवनाम्नाभविष्य
ति।सामीमहादशीह्येषासर्वपापहराशुभेति।द्वादशीएकादशी।एकादश्यां
निराहारःसम्यगभ्यर्च्यकेशवमिति।संकल्पमंत्रलिंगात्।इयंपरविद्धा या १५८

:

:

ह्यारुद्रेणद्वादशीयुक्तेतियुग्मवाक्यात्।इयमेवव्यानकल्पादिःमाघ्यांकृत्य
विशेषोभविष्योत्तरे।वैशाखीकार्तिकीमाघीतिथयोतीवपूजिताः।स्नानदा
नविहीनास्नाननेयाःपांडुनंदनेति।तत्रैवमाघ्यांस्नानंतथासम्यक्संतर्प्य
पितृदेवताः।तिलपात्राणिदेयानितिलाःसपललोदनाः।कार्पासदानमत्रैव
धेनुदानंप्रशस्यते।कंबलाजिनरत्नानिमोक्षकोपापमोचकः।उपानद्दानमत्रै
वतुल्यमश्वरथेनतु।यत्रक्वातत्रवास्नानंदानमत्रप्रशस्यते।भगिनीभागधे
यानांमातुलानांपितृष्वसुः।दरिद्राणांचबंधूनांदानंकोटिगुणोत्तरमिति।

तत्रतिलपात्रदानमंत्रः।देवदेवजगन्नाथवांछितार्थफलप्रद।तिलपात्रंप्रदा
स्यामितवांगेसंस्थितेरहं।तिलाःस्वर्णसमायुक्तादुरितक्षयकारकाः।विष्णु
प्रीतिकरानित्यमतःशांतिंप्रयच्छमे इतितिलदानमंत्रः।गवामंगेषुतिष्ठंति
भुवनानिचतुर्दश।यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच।इतिगोदानमंत्रः।
ओर्णयदृमनुध्येयस्वर्णबीजंतवप्रभो।दत्तंगृहाणदेवेशप्रायःसंहरसत्वर
मितिकंबलमंत्रः॥ ॥इयमेवयोगविशेषेणमहामाघी।तथाचगार्ग्यः।मेषरा
शोयदासोरिःसिंहेचंद्रबृहस्पती।भास्करःश्रवणर्क्षेचमहामाघीतिसास्मृता। १५९

सोरिःशनैश्चरः।इयंप्रयागेतिप्रशस्ता।महामाघीप्रयागेतुनेमिषेफाल्गुनी
तथा।शालग्रामेमहाचैत्रीकृतापुंसांमहाफलेतिगार्ग्यवचनात्।अत्रकृत्यवि
शेषमाहविष्णुः।माघीमघायुक्ताचेत्स्यात्तस्यांतिलैःस्नात्वाहुत्वापूतोभवति।
॥ ॥इतिमाघकृत्यं॥ ॥फाल्गुनकृष्णसप्तम्यष्टमीनवमीषुपूर्वेद्युरष्टकान्व
ष्टकाः।फाल्गुनकृष्णेकादशीवाराहकल्पादिः।फाल्गुनकृष्णचतुर्दशीशि
वरात्रिः।शिवरहस्ये।तत्प्रभृत्यथदेवर्षेमाघकृष्णचतुर्दशी।शिवरात्रिःस
मारख्याताप्रियेयंत्रिपुरद्विषइति।माघग्रहणमंतमासेन।स्कांदेपि।मा

घफाल्गुनयोर्मध्येऽसितायाचतुर्दशी।शिवरात्रिस्तुसाख्यातासर्वयज्ञोत्तमो
त्तमेति।शिवरात्रिव्रतंचोपवासपूजाजागरणरूपप्रधानत्रयसमुदायरूपं।उप
वासप्रभावेनबलादपिचजागरात्।शिवरात्रेस्तथातस्यांलिंगस्यापिचपूजया।
अक्षयान्लभतेभोगांछिवसायुज्यमाप्नुयादिति।नागरखंडे।त्रयाणामपिसं
बंधात्क्वचिदुपवासमात्रश्रवणंतितरयोरुपलक्षणं।क्वचिदन्नक्तंप्रत्यनुकल्प
त्वेनैकस्यद्वयोर्वाश्रवणं।अथवाशिवरात्रिंचपूजाजागरणैर्नयेत्। कश्चित्पुण्य
विशेषेणव्रतहीनोपियःपुमान्।जागरंकुरुतेतत्रसरुद्रसमतांव्रजेदित्यादिषु १६०

अथवादिनाब्दश्रवणात्।नापिजन्माष्टमीवद्रात्रावपित्रयोदश्यांवेधोभवतिरा
त्रिसाध्यव्रतत्वात्।तदुक्तंस्कांदे।निशिभ्रमंतिभूतानिनक्तंयःशूलभृद्यतः॥
अतस्तस्यांचतुर्दश्यांसत्यांतत्पूजनंभवेदिति।नागरखंडेपि।तस्माद्रात्रौहिमेपू
जांयःकरिष्यतिमानवइतितत्रार्धरात्रादूर्ध्वमप्यनुवर्तमानयात्रयोदश्यायुक्ता
चतुर्दशीपरेद्युर्निशीथयोगिन्यपिपरेवामाघासितेभूतदिनंहिराजन्नुपैति
योगंयदिपंचदश्याःजयायुक्तांनतुजातुकुर्याच्छिवस्यरात्रिंप्रियकृच्छिवस्ये
तिहेमाद्याद्युदाहृतवचनात्।जययात्रयोदश्याप्रकर्षेणयुक्तामितियुक्तत्वात्।

पूर्वेद्युस्त्रयोदश्यांबहुरात्र्यामिंप्रतीति।यातुपूर्वेद्युरेवनिशीथयोगिनीदि
नद्वयेपियानिशीथयोगिनीसापूर्वैव।तदुक्तंस्कांदे।कृष्णाष्टमीस्कंदषष्ठी
शिवरात्रिश्चतुर्दशी।एताःपूर्वयुताःकार्यास्तिथ्यंतेपारणंभवेत्।तथा।ज
यंतीशिवरात्रिश्चकार्यैभद्राजयान्विते।तथा।माघफाल्गुनयोर्मध्येयास्या
शिवचतुर्दशी।अनंगेनसमायुक्ताकर्तव्यासासदातिथिरिति।ननुपूर्वे
द्युरेवनिशीथयोगिनीकालयोगात्पूर्वलिखितवचनेभ्यश्चपूर्वैवेतियुक्तं
दिनद्वयेतद्योगिनीतुपरेद्युःप्रदोषनिशीथोभयव्याप्तिलाभात्संकल्प १६१

कालमारभ्यसत्वादहोरात्रोभययोगाच्चपरैवयुक्तानतुपूर्वा।अतएवमाध
वेनापिदिनद्वयेनिशीथव्यापिनीपूर्वैवग्राह्येत्युक्तं।तिथितत्त्वेप्येवमेवातत्क
थंपूर्वैवेत्युच्यतइतिचेत्।उच्यते।अर्धरात्रात्परस्ताच्चेत्तज्जयायोगोयदाभ
वेत्।पूर्वविद्धैवकर्तव्याशिवरात्रिःशिवप्रियेरितिपद्मपुराणवचनमीदृश
एवविषयेपूर्वविद्धाविधानार्थं।अंततःसर्वाण्यपि पूर्वविद्धाविधायका
निप्रायुक्तानिवाक्यानि।महतामपिपापानांदृष्टावैनिष्कृतिःपुरा।नदृष्टा
कुर्वतांपुंसांकुहूयुक्तातिथिंत्विमामितिस्कंदपुराणीयोअमावास्यायुता

निषेधश्चेतादृग्विषयएवसार्थकः।पूर्वस्याएवनिशीथयोगेपूर्वाग्रहणस्य
वचनांतरेणैवसिद्धत्वात्।तथा।नारदीये।माघकृष्णचतुर्दश्यामादिदेवोम
हानिशि।शिवलिंगात्समुद्भूतःकोटिसूर्यसमप्रभः।तत्कालव्यापिनीग्राह्या
शिवरात्रिव्रतेतिथिः।तथा।पूर्वेद्युरपरेद्युर्वामहानिशिचतुर्दशी।व्याप्ता
सादृश्यतेयस्यांतस्यांकुर्याद्व्रतंनरइति।एवंसतितत्रपूर्वोक्तवचनानामान
र्थक्यात्तानिदिनद्वयनिशीथव्यापिन्याःपूर्वस्याग्राह्यत्वंप्रतिपादयंति॥
किंच।अर्धरात्रात्परस्माच्चेदितिवचनेपूर्वविद्धैवेत्येवकारादुत्तरविद्धानिष १६२

र्तकादुत्तरविद्धायाःप्रसक्तिर्गम्यते।साचोभयत्रनिशीथयोगएवसंभवति।
नतुपूर्वत्रैवनिशीथयोगे।तस्मादुभयत्रनिशीथयोगिन्यपिपूर्वेतिं।यत्तुस्क
न्दपुराणे।आदौमार्गशिरेमासिदीपोत्सवदिनेपिवा।गृह्णीयान्माघमासेवाह्या
रंशोवमुपोषयेदि त्यादिवचनैःप्रतिमासकृष्णाचतुर्दशीषुपूजोपवासजा
गरणात्मकंकाम्यंशिवरात्रिव्रतंविहितंतत्रापिरात्रौप्रतियामंपूजाजागरणा
स्यचविधानात्सकलरात्रिसाध्यत्वाद्बहुरात्रिव्यापिनीतत्रग्राह्यादिनद्वयेरा
त्रिसाम्येपूर्वा।रुद्रव्रतेषुसर्वेषुकर्तव्यासंमुखीतिथिरितिब्रह्मवैवर्तात्।

येषांप्रदोषव्याप्तिरपिनिर्णायिकातेषांमतेऽन्नरेति।स्कंदपुराणे।माघकृष्णा
चतुर्दश्यांरविवारोयदाभवेत्।भोमोथवाभवेद्दिकर्तव्यंव्रतमुत्तमं।शि
वयोगस्ययोगेतुतद्व्रतेदुर्लभोत्तममिति।तथा।त्रयोदशीकलाप्येकामध्ये
चैवचतुर्दशी।अंतेचैवनिशीवालीत्रिस्पृश्यांशिवमर्चयेत्।इति।पारणं
चस्कंदपुराणेएवनिथ्यंतेनितिथिमध्येचविहितं।कृष्णाष्टमीस्कंदषष्ठी
शिवरात्रिश्चतुर्दशी।एताःपूर्वयुताःकार्यास्तिथ्यंतेपारणंभवेदिति।उ
पोषणंचतुर्दश्यांच तुर्दश्यांचपारणं।ऋतेःसुरुतलक्षेश्वलभ्यतेवाथ १६३

वानवेति।तत्रसात्वस्तमनपर्यंतव्यापिनीचेत्सरेहनिदिवैवपारणं कुर्यात्।
पारणान्नास्तिदोषभागितिशिवरात्रिप्रकरणपठितत्वात्कालादर्शादिलि
खितवचनात्तिथ्यंतंप्रतीक्ष्यदिवापारणस्यकर्तुं शक्यतेतिथ्यंतेनोचेत्ति
थिमध्येएवेतिव्यवस्था।अथमत्रसंक्षेपतःशिवरात्रिव्रतानुष्ठानप्रकारः।
विनाभस्मत्रिपुंड्रेणविनारुद्राक्षमालया।पूजितोपिमहादेवोनस्यात्तस्य
फलप्रदः।तस्मान्नरापिकर्तव्यंललाटेतुत्रिपुंड्रकमितिलैंगात्।धृतत्रिपुं
ड्रकरुद्राक्षस्तिथाद्युद्भिरव्यशिवप्रीतिकामः॥शिवरात्रिव्रतंह्येतत्करि

ष्येहंमहाफलं।निर्विघ्नमस्तुमेचात्रत्वत्प्रसादाज्जगत्पते।चतुर्दश्यांनिराहारो
भूत्वाशंभोपरेहनि।भोक्ष्येहंमुक्तिमुक्त्यर्थंशरणंमेभवेश्वरेतिपठित्वाज
लमुत्सृजेत्।ततोनित्यक्रियांविधायरात्रौप्रथमप्रहरेऽपिशिवपूजांकरिष्येइति
संकल्प्यपूर्वप्रतिष्ठितेलिंगेऽप्रतिष्ठितेवानदेवप्राणप्रतिष्ठांकृत्वावस्थमा
णपार्थिवलिंगपूजाप्रकारेणपंचाक्षरेणमंत्रेणवैदिकेनवापौराणमंत्रेवा
प्रणवादिचतुर्थ्यंतनमोंतशिवनाम्नावाऽवाहना द्युपचारैःपूजयेत्।तत्रविशे
षः।ॐह्रौंईशानायनमइतिप्रथमप्रहरेदुग्धेनस्नपनं॥शिवरात्रिव्रतंदेवपू १६४

जाजपपरायणः।करोमिविधिवद्दत्तंगृहाणार्घ्यंमहेश्वरेत्यर्घ्यदानं।तत्सूक्तमं
त्रजपेनतत्कथाश्रवणादिभिर्वाजागरणं।तद्ध्यानंतज्जपःस्नानंतत्कथाश्रव
णादिकं।उपवासस्तुतेह्येतेगुणाःप्रोक्तामनीषिभिरितिवचनात्।द्वितीयप्रह
रेॐअघोरायनमःइतिदध्नास्नपनं।नमःशिवायशांतायसर्वपापहरायच।
शिवरात्रौददाम्यर्घ्यंप्रसीदउमयासहेतिचार्घ्यदानं।तृतीयेप्रहरेॐह्रौंवा
मदेवायनमइतिघृतेनस्नपनं।दुःखदारिद्र्यशोकेनदग्धोहंपार्वतीपते।
शिवरात्रौददाम्यर्घ्यमुमाकांतगृहाणमेइत्यर्घ्यदानं।चतुर्थेप्रहरेॐह्रौं

सद्योजातायनमःइतिमधुनास्नपनं।मयाकृतान्यनेकानिपापानिहरशंक
र।शिवरात्रौददाम्यर्घ्यंसुमाकांतगृहाणमेइत्यर्घ्यदानं।एवंमूलमंत्रजपादिना
रात्रिमतिवाह्यप्रभाते।अविघ्नेनव्रतंदेवत्वत्प्रसादात्समापितं।क्षमस्वज
गतांनाथत्रैलोक्याधिपतेहर।यन्मयाद्यकृतंपुण्यंतद्रुद्रस्यनिवेदितं।त्वत्प्र
सादान्महादेवव्रतमद्यसमर्पितं।प्रसन्नोभवमेश्रीमन्सङ्गृहाणप्रतिपाद्यतां।
त्वदालोकनमात्रेणपवित्रोस्मिनसंशयइति।व्रतंसमर्पयेत्।परदिनेयथा
शक्तिब्राह्मणान्भोजयित्वा।संसारक्लेशदग्धस्यव्रतेनानेनशंकर।प्रसी १६५

दसुमुखोनाथज्ञानदृष्टिप्रदोभवेतिसंप्रार्थ्यबंधुभिःसहपारणंकुर्यादिति।
अत्रैवप्रसंगात्पार्थिवलिंगपूजाविधिरुच्यते।नंदिभविष्ययोः।आयुष्मान्ब
लवान्श्रीमान्पुत्रवान्धनवान्सुखी।वरमिष्टंलभेल्लिंगंपार्थिवंयःसमर्चयेत्।
वांछीवित्तप्रदंलिंगंस्फाटिकंसर्वकामदं।नर्मदागिरिजंश्रेष्ठमन्यदपिहिलिं
गवत्।स्थापूजयविप्रेंद्रलप्स्यसेचहितंफलमिति।देवीपुराणे।मृदाहरणसं
स्कृतिप्रतिष्ठाज्ञानमेवच।स्नपनंपूजनंचैवविसर्जनमतःपरं।हरोमहेश्वर
श्चैवशूलपाणिःपिनाकधृक्।पशुपतिःशिवश्चैवमहादेवइतिक्रमादिति।

अत्रमृदाहरणादयःसप्तपदार्थाःप्रणवादिचतुर्थ्यंतनमोंतहृदादिसप्तभिर्नाम
भिःकर्तव्याः।अन्येतुपंचाक्षरेणषडक्षरेणवाकार्याः।गोभूहिरण्यवस्त्रा
दिबलिपुष्पनिवेदने।ज्ञेयेनमःशिवायेतिमंत्रःसर्वार्थसाधकः।सर्वमंत्राधि
कश्चायमोंकाराद्यःषडक्षरइतिनंदीपुराणात्।नाममंत्रेणवा।तत्रचायमनु
ष्ठानक्रमः।ॐहरायनमइतिमृदमाहृत्यशोधितायांतस्यांशुचिजलंप्रक्षि
प्य।ॐमहेश्वरायनमइतिसंघट्टनंकृत्वातेनपिंडेनाशीतिरीतिकापरिमिता
दक्षादधिकपरिमाणमंगुष्ठादधिकोच्चंचलिंगंकृत्वा।ॐशूलपाणयेनमः १६६

शिवंहसुप्रतिष्ठोभवेतिप्रतिष्ठाप्य।।ध्यायेन्नित्यंमहेशंरजतगिरिनिभं
चारुचंद्रावतंसंरत्नाकल्पोज्वलांगंपरशुमृगवराभीतिहस्तंप्रसन्नं।पद्मासी
नंसमंतात्स्तुतममरगणैर्व्याघ्रकृत्तिंवसानंविश्वाद्यंविश्ववंद्यंनिखिलभय
हरंपंचवक्त्रंत्रिनेत्रं।।इतिध्यात्वा।ॐपिनाकधृषेनमःशिवेहागछेत्यावा
हनंकुर्यात्।ततःपाद्यार्घ्याचमनीयानिपंचाक्षरेणदत्वा।ॐपशुपतयेनम
इतिशुद्धोदकेनसंस्नाप्याचमनीयवस्त्राचमनीययज्ञोपवीतगंधपुष्पधू
पदीपनैवेद्याचमनीयफलतांबूलदक्षिणानीराजनप्रदक्षिणानमस्का

रानोंनमःशिवायेतिमंत्रेणकुर्यात्।ततः।मूर्तयोष्टौशिवस्येताःपूर्वादिक्रम
योगतः।आग्नेय्यंताःप्रपूज्यास्तुवेद्यांलिंगेशिवंयजेत् इति।भविष्योक्तम
ष्टमूर्तिपूजनंनप्राचीमयतःशंभोरितिरुद्रयामलेनिषेधाद्देवाग्नेस्तस्यवा
प्यग्नेप्राचीप्रोक्तागुरुक्रमेरित्यागमे कीप्राचीमनादृत्यप्राच्येशान्यादिक्रमे
णाग्नेयीपर्यंतंवामावर्तेनकुर्यात्।तच्चेत्थं।ओंशर्वायक्षितिमूर्तयेनमइति
यथास्थितप्राच्यं।ॐभवायजलमूर्तयेनमइत्येशान्यां।

ततःस्तोत्रादिनास्तुत्वा पुष्पांजलिंसमर्प्यनमस्कृत्यक्षमस्वेतिप्रार्थयित्वा
ॐमहादेवायनमइतिविसर्जयेदितिशिवपूजायांचबिल्वपत्राणिधतूरपु
ष्पाणिचातिफलदानि।धर्तूरकेस्तुयोलिंगंसकृत्पूजयतेनरः।सगोलक्ष
फलंप्राप्यशिवलोकेमहीयते।सर्वकामप्रदंबिल्वंदारिद्र्यस्यविनाशनं।बि
ल्वपत्रात्परंनास्तियेनतुष्यतिशंकरः।शुष्काण्यपिचपत्राणिश्रीवृक्षस्य
सदेवह्रीत्यादिभविष्यस्कांदादिवचनात्।यच्चशिवायसमर्पितंपुष्पनैवे
द्यादितत्प्रसादरूपेणविष्णुनिवेदितवत्स्वयंनोपयोज्यं।स्पृष्ट्वारुद्रस्यनि

र्माल्यंसवासाआप्लुतःशुचिरितिकालिकापुराणे।अयाह्यंशिवनैवेद्यंपत्रंपु
ष्पंफलंजलं।शालग्रामशिलास्पर्शात्सर्वयातिपवित्रतामितिपरिशिष्टे।दत्वा
नैवेद्यवस्त्रादिनादरीतकदाचन।यत्कंयच्छिवमुद्दिश्यतदादानेनतत्फलमि
तिचभविष्यनिषेधात्।निर्माल्यंयोहिमद्भक्त्याशिरसाधारयिष्यति।अशु
चिर्भिन्नमर्यादोनरःपापसमन्वितः।नरकेपच्यतेघोरेतिर्यग्योनौचसंभवेत्
ब्रह्महापिशुचिर्मुक्त्वानिर्माल्यंयत्कधारयेत्।तस्यपापंमहच्छीघ्रंनाशयि
ष्यमहाव्रतइतिस्कंदपुराणक्वनादशुचिनातन्नयाह्यंकिंतुस्नानादिनाशु १६८

मिति चिनेतिस्मार्तः।अपनीतंतन्नयाह्यंश्रीदत्तः।शिवदीक्षारहितेर्ज्योतिर्लिंगाति
रिक्तस्थानयाह्यमितिशेवाः।परिशिष्टवचनेशालग्रामशिलासंगात्सर्वया
तिपवित्रतामित्युक्त्वात्परार्थानुसमयेनपंचायतनपूजायांशालग्रामस्या
पितत्वसत्वान्नैवेद्यादावदोषइतिशिष्टाः।ममतुप्रतिभातिशालग्रामशिला
यांशिवनाभेयदाशिवपूजाक्रियतेतदानदोषइति।इदंचशिवरात्रिव्रतंनित्यं।
वर्षेवर्षेमहादेवनरोनारीपतिव्रता।शिवरात्रौमहादेवंकामंभक्त्याप्रपूज
येदितिस्कांदेवर्षेवर्षेइतिवीप्साश्रवणात्।परात्परतरंनास्तिशिवरात्रिव्र

तात्परं।नपूजयतिभक्त्येयंरुद्रंत्रिभुवनेश्वरं।जंतुर्जन्मसहस्रेणसभ्रमेन्ना
त्रसंशयइति।तत्रैवाकरणेदोषश्रवणाच्च।काम्यंच।शिवंचपूजयित्वायोजाग
र्तिचचतुर्दशीं।मातुःपयोधररसंनपिबेत्सकदाचन।ममभक्तस्तथादेविशि
वरात्रिमुपोषकः।गणत्वमक्षयंदिव्यमक्षयंशिवशासनं।सर्वान्भुक्त्वामहा
भोगांस्तनोमोक्षमवाप्नुयादिति।तत्रैवफलश्रवणात्।अत्रचचांडालप
र्यंतानामधिकारः।शिवरात्रिव्रतंनामसर्वपापप्रणाशनं।आचंडालमनुष्या
णांभुक्तिमुक्तिप्रदायकमितिईशानसंहितावचनात्।। ॥इतिशिवरात्रिव्र १६९

तनिर्णयः॥ ॥एतदुत्तरमायुगादिः।दर्शेतुमाघमासस्यप्रदत्तंह्यपरंयुगमि
तिस्कांदात्।अमावास्याचमाघस्येतिमात्स्याच्च।अत्रमाघोऽमांतमासेनग्रा
ह्यः॥ब्रह्मवैवर्तेतुमाघीपौर्णमासीयुगादिरित्युक्तं।माघेचपौर्णमास्यांतुघोरं
कलियुगंतथेतिविष्णुपुराणे।माघासितेपंचदशीकदाचिदुपेतियोगंयदिवा
रुणेन।ऋक्षेणकालःसपदःपितॄणांनह्यल्पपुण्येर्नृपलभ्यतेऽसौ।तत्रैवचे
द्वादृपदास्तूपूर्वाःकालस्तदायत्क्रियतेपितृभ्यः।श्राद्धंपरांतृप्तिमवाप्नुवंति
युगान्सहस्रंपितरश्चतेनेति।अत्रापिमाघोऽमांतमासेनग्राह्यः।वारुणंग्र

तत्रारका।महाभारते।काले धनिष्ठायदिनामतस्मिन्भवेत्तुभूपालतदापितृभ्यः।
दत्तंतिलानांप्रददातिलक्षंवर्षायुतंतत्कुलजैर्मनुष्यैरिति।इयंमन्वादिरपि।फा
ल्गुनशुक्लनवम्यनंतसंज्ञा।तथाचब्रह्मपुराणे।फाल्गुनामलपक्षस्यनवमी
यामहीपते।अनंतासामहापुण्यासर्वपापहरास्मृता।स्नानदानादिनेत्यर्थः॥
तथा।फाल्गुनामलपक्षस्यपुष्यर्क्षेद्वादशीतुया।गोविंदद्वादशीनाममहापातक
नाशिनी।अस्यांगोविंदपूजोपवासादिकार्यं।इयमेवसारस्वतकल्पादिः।फाल्गु
नपौर्णमास्यांकृत्यविशेषः कृत्यतत्वार्णवे।फाल्गुन्यामर्यमाज्ञातोह्यदितौकृ
ष्णपादपि।अत्रैश्वाप्यनुसूयायांजातःपूर्णकरःशशी।तोतत्रविधिवत्पूज्यो

प्राप्तेचंद्रोदयेसति।न्यूनेगतेस्तथावाद्येःकार्यस्तत्रप्रजागरः।इति।अत्रोपवा
सविधानाभावान्नक्तंकार्यं।अत्रदानविशेषमाहविष्णुः।फाल्गुनीफाल्गुनीयु
क्तावेत्स्यात्तस्यांब्राह्मणायसंस्कृतंसास्त्रीर्णशयनंनिवेद्यभार्यांमनोज्ञांप
क्षवतींदक्षिणवतींचाप्नोतिनार्यपिभर्तारमिति।यस्मादशून्यंशयनंकेशवस्य
जिवस्यच।शय्यामप्यशून्यास्तुतस्माज्जन्मनिजन्मनि।अशून्यंशयनंनि
त्यमनूनांश्रियमुन्नतिं।सौभाग्यंदेहिमेनित्यंशय्यांदानेनकेशवेति।शय्यादान
मंत्रो।अस्यामेवहोलिकोत्सवःभविष्योत्तरे।अथपंचदशीशुक्लाफाल्गुनस्य
नराधिपेत्युपक्रम्य।तथाह्यशंकितालोकारमंतुचहसंतुच।दारुजानिचखड्गा

निगृह्यतांसमरोत्सुकाः।योधाइवविनिर्यांतुशिशवःसंप्रहर्षिताः।संचयंशुष्क
काष्ठानांपलालानांचकारयेत्।तत्राग्निंविधिवद्दत्वाराक्षोघ्नैर्मंत्रविस्तरैः।ततः
किलकिलाशब्दैस्तालीशब्दैर्मनोरमैः।तमग्निंत्रिःपरिक्रम्यगायंतुचहसंतुच।
जल्पंतुस्वेछयालोकानिःशंकायस्ययन्मतं।भगंवद्विधेःशब्दैःकीर्तयन्देश
भाषया।विस्तारयंश्चगायंश्चसहस्रंनामतस्यवै।सर्वदुष्टापहोहोमःसर्वरोगो
पशांतिदः।क्रियतेस्यांद्विजैःपार्थतेनसाहोलिकास्मृता।अस्यांनिशागमेपा
र्थसंरक्ष्याःशिशवोगृहे।गोमयेनोपलिप्तेचसचत्वरेगृहांगणे।आकारयेच्छि
शुप्रायान्रवङ्क्व्यग्रकरान्नरान्।तेकाष्ठरवङ्गैःसंस्पृश्यगीतेर्हास्यकरैःशिशून्। १७१

रक्षंतितेषांदानंचगुडंपक्वान्नमेवच।होलिकापूजामंत्रआधुनिकनिबंधेषुअ
स्माभ्यःसंग्रहेणोक्तःसुतालंहोलिबालिशैः।अतस्तांपूजयिष्यामिस्मृतेर्भूतिप्र
दाभवेति।होलिकादीपनंचप्रदोषेकार्यं।तथाचपृथ्वीचंद्रोदयेदुर्वाससोवचनं।।
निशागमेतुपूज्येतहोलिकासर्वतोमुखेरिति।तत्रभद्रायांसत्यांनकर्तव्यं।भद्रा
यांदीपितादहोलीराष्ट्रभंगंकरोतिवै।नागरस्यचनैवेष्टातस्मात्तांपरिवर्जयेदिति
पुराणसमुच्चयवचनात्।तत्रपूर्वस्यांप्रदोषेभद्रायाअसत्वेतत्रैवकार्यं।यदातुत
त्रभद्राभवतितदाःष्टपंचभवेत्रातःशेषःसूर्योदयःस्मृतइतिपारिभाषिकस्
योदयात्पूर्वंभद्रांतंप्रतीक्ष्यहोलिकादीपनायदिकश्चित्कालोलभ्यतेतदात्र

दोषातिक्रमेणतत्रैवकर्तव्यं।राकायामहयादूर्ध्वंचतुर्दश्यांयदाभवेत्।होलांभद्रा
वसानेतुनिशीथांतेपिदीपयेदितिभविष्योत्तरात्।यदातुपूर्वदिनेभद्ररहितः
कालोनलभ्यतेउत्तरदिनेचसूर्यास्तात्पूर्वमेवपूर्णिमासमाप्तातदाभद्रापुच्छे
कार्ये।पृथिव्यांयानिकार्याणिशुभानिचाशुभानिच।तानिसर्वाणिसिध्यंतिवि
ष्टिपुच्छेनसंशयइतिलल्लवचनात्।विष्टिपुच्छमुक्तंज्योतिषे।मेषार्कनखना
डीभ्योभद्रापुच्छंघटीद्वयं।क्रमेणधवलेपक्षेकृष्णेचयुक्रमेणसितेतरइतिद्विपुञ्च भ२७
अर्क१२नख२० अस्मिन्नेवपक्षेयदोत्तरापौर्णमासीसार्धयामत्रयपरिमिता
अधिकावाप्रतिपच्चोत्तरदिनेवृद्धिगामिनीतदापौर्णमास्युत्तरप्रतिपत्प्रदो १७२

षएवकार्यनतुपूर्वरात्रौविष्टिपुच्छे।तथाचभविष्योत्तरे।सार्धयामत्रयंपूर्णा
द्वितीयेदिवसेयदा।प्रतिपद्वर्धमानातुतदासाहोलिकास्मृतेति।एवंसति
योत्तरदिनेपिरुक्त्वेप्रदोषेतदेकदेशेवावर्ततेसासुतरामुत्तरा।पूर्वोक्तंतुपू
र्वविद्धाग्राह्यत्वमुत्तरत्रप्रदोषास्पर्शेवृद्ध्यभावेचज्ञेयं।ननुयदापूर्वारात्रि
सर्वाभद्राव्याप्ताउत्तरदिनप्रदोषश्चपौर्णमासीशेषयुक्तोपिचंद्रग्रहणा
क्रांतस्तदासर्वेषामेववर्णानांस्नानदानहुतार्चनेइत्यशुचित्वाभिधानात्क
थंतत्रहोलिकादीपनं।उच्यते।स्नानादिकर्माणिकुर्वीतशृतमन्नंविवर्जये

दितिवचनात्स्नानोत्तरंनित्येनैमित्तिकेष्वधिकाराविघातात्।काम्यानितुग्र
हणात्पूर्वंग्रहणोत्तरंचकिंचिद्दिनपर्यंतंनभवंत्येव।तथाचज्योतिर्ग्रंथे।त्र
योदश्यादिनोवर्ज्यंदिनानांनवकंशुभं।मांगल्येषुसमस्तेषुग्रहणेचंद्रसूर्य
योः।द्वादश्यादिस्त्रयोयांतोवेधइंदुग्रहेस्मृतः।एकादश्यादिकःसौरेचतु
र्थ्यंतःप्रकीर्तितः।खंडग्रहेतयोःप्राक्तुभयत्रदिनद्वयमिति।अस्यापवा
दस्तत्रैव।नित्येनैमित्तिकेजप्येहोमयज्ञक्रियासुच।उपाकर्मणिचोत्सर्गेग्रह
वेधोनविद्यतइति।अत्रैवकृत्यविशेषःकृत्यचिंतामणौब्राह्मे।नरोद्वेलाग १७३

नंकृत्वागोविंदंपुरुषोत्तमं।फाल्गुन्यांसंयतोभूत्वागोविंदस्यपुरंव्रजेत्।इयं
मन्वादिरपि।एतदुत्तरप्रतिपदिकृत्यविशेषोभविष्ये।कृत्वावश्यककार्याणि
संतर्प्यपितृदेवताः।वंदयेद्वोलिकांभूतिंसर्वदुष्टोपशांतये।मंत्रेणानेनरा
जेंद्रपश्यमानंनिबोधमे।वंदितासिसुरेंद्रेणब्रह्मणाशंकरेणच।अतस्त्वंपा
हिनोदेविविभूतेर्भूतिदाभवेति।तथातत्रैव।प्रवृत्तेमाधवेमासिप्रतिपद्यु
दितेरवौ।विसृपक्रम्यमंत्रितेचर्चितेचैवउपलिप्तेगृहाजिरे।चतुष्कंकारयेच्छु
द्धवर्णकैश्चाक्षतैःशुभैः।तन्मध्येस्थापयेत्पीठंशुक्लवस्त्रोत्तरच्छदं।अय

तःपूर्णकलशंस्थापयेत्पल्लवैर्युतं।साक्षतंसहिरण्यंचसितचंदनचर्चितं।आ
सनेचोपविष्टस्यब्रह्मघोषेणभारत।चर्चयेच्चंदनेनारीअव्यंगांगासुलक्ष
णा।पद्मरागोत्तरपदाश्रेष्ठांशुकविभूषिता।वसुधाद्यंशिरोतंचदधिदूर्वाक्ष
तान्वितं।वर्धापयित्वाश्रीखंडमायुरारोग्यवृद्धये।वसुधाद्यमितिपादादा
रभ्यमूर्धांतंचंदनेनचर्चयेदित्यर्थः।तच्चंदनंवर्धापयित्वाकिंचिन्।पश्चा
च्चप्राशयेद्विद्वान्चूतपुष्पंसचंदनं।मनोभवस्यसापूजाऋषिभिःसंप्रद
र्शिता।प्राशनमंत्रश्च।दूतमग्र्यंवसंतस्यमाकंदकुसुमंतव।सचंदनंपिबा १७४

म्यघसर्वकामसमृद्धये।अनंतरंद्विजेंद्राणांसूतमागधबंदिनां।दद्याद्दानं
दैवज्ञोयथाशक्त्याकामोमेप्रीयतामिति।ततोभोजनवेलायांशृतंपाकेन
तेनहि।प्राशयेत्प्रथमंचान्नंततोभुंजीतकामतः।यएवंकुरुतेपार्थशास्त्रो
क्तंफाल्गुनोत्सवं।अनायासेनसिध्यंतितस्यसर्वेमनोरथाः॥ ॥इतिफाल्गु
नकृत्यं॥ ॥अथमलमासकृत्यंहेमाद्रौपद्मपुराणे।विष्णुरूपंसहस्त्राक्षंम
लमासेतुपूजयेत्।पूजितेतुसहस्त्राक्षोविष्णुर्भवतिपूजितः।मलमासस्त
मासानांमलिनःपापसंभवः।तस्यपापविशुध्यर्थंमलमासव्रतंचरेत्॥

दिनेदिनेप्रदेयानिविविधान्नानिभक्तितः।दक्षिणाघृतयुक्तानिकांस्य
पात्रयुतानिच।तत्रमंत्रः।विष्णुरूपीसहस्त्रांशुःसर्वपापप्रणाशनः।अ
पूपान्नप्रदानेनममपापंव्यपोहतु।अधिमासेतुसंप्राप्तेगुडसर्पिःसम
न्वितान्।दद्यादनेनमंत्रेणत्रयस्त्रिंशदपूपकान्।चंद्रांशुनिर्मलाःपूता
श्शालितंडुलमिश्रिताः।आहारःसर्वदेवानांतन्मेकुर्वंतुमंगलं।यावंति
तत्रछिद्राणिअपूपस्यचपार्थिव।तावद्वर्षसहस्राणिस्वर्गलोकेमही
यते।अधिमासेतुसंप्राप्तेत्रयस्त्रिंशत्तुदेवताः।उद्दिश्यापूपदानेन पृथ्वी ।१७५

दानफलंलभेत्।त्रयस्त्रिंशदपूपान्कांस्यपात्रेनिधायच।सघृतंसहि
रण्यंचब्राह्मणायनिवेदयेत्।नारायणजगद्बीजभास्करप्रतिरूपक।
व्रतेनानेनपुत्रांश्चसंपदंचाभिवर्धयेति।प्रार्थनामंत्रः।अशक्तस्यपक्षां
तरंतत्रैव।अधिमासेयदाराजन्द्वादशीवाथपूर्णिमाव्यतीपातदिने
वापिदद्यादन्नंहिशक्तितः।।साज्यपात्रंचसगुडंत्रयस्त्रिंशदपूपका
न्।।कांस्यपात्रेविनिक्षिप्यहिरण्येनसमन्वितान्।।उपानच्छत्रसं
युक्तान्विप्रायविनिवेदयेत्।।तत्रमंत्राः।।यस्यहस्तेगदाचक्रेगरु

डोयस्यवाहनं॥ शंखःकरतलेयस्यसमेविष्णुःप्रसीदतु॥ कलाका
ष्ठादिरूपेणनिमेषघटिकादिना॥ योवंचयतिभूतानितस्मैकाला
त्मनेनमः॥ कुरुक्षेत्रमयंदेशःकालःपर्वहिजोहरिः॥ पृथ्वीसमभि
दंदानंगृहाणपुरुषोत्तम॥ मलानांचविशुध्यर्थंपापप्रशमना
यच॥ पुत्रपौत्राभिवृध्यर्थंतवदास्यामि भास्कर॥ मंत्रेणानेन
वेदघात्रयस्त्रिंशदपूपकान्॥ अन्नदानात्परंदानंमलमासेन
विद्यते॥ गृहेतस्यस्थिरालक्ष्मीर्यैर्दद्यात्सूर्यसंनिधौ॥ दारिद्र्यं १७६

नभवेत्तस्यरोगक्लेशाविवर्जितः॥ इति॥ ॥श्रीमत्सदवाक्यप्रमाणा
भिज्ञतत्सदुपाख्यबाल्हकृष्णभट्टांगजविदुलभट्टाभिधबुधवरसू
नुधर्मशास्त्रपारावारीणश्रीमद्रामचंद्रभट्टविरचितोकृत्यरत्नाव
लिःसमाप्तिमगमत्॥ ॥संवत१८४३पिंगलसंवत्सरेशाके१७०८
पराभवनामसंवत्सरेउत्तरायणेवसंततौचैत्रशुक्लद्वितीयायांमंदवास
रेपुण्यस्तंभस्थितथाल्युपनामकनागेशभट्टात्मजश्रीपभट्टेनलिखि
तंस्वार्थंपरार्थं॥ ॥इतिकृत्यरत्नावलिःसमाप्ता॥ ॥श्रीः॥ ॥ ॥ १७७

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥इतिकृत्यरत्नावलिःसमाप्ता॥
॥पत्र१७७॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY